कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

त्वबोधि·

प१॥

श्रीगणेशायनमः॥ ॥ज्ञाताननाशानेदक्षं दीक्षितं सत्कृतक्षणे॥ वटमूलाश्रयं व्यक्षं दाक्षिणामूर्त्तिमाश्रये॥१॥ अथ मध्ये विघ्नविघातायकृतं मंगलं शिष्यशिक्षार्थं निबध्नाति॥ श्रोत्रेत्यादिना॥ श्रोत्रियस्य तावत् श्रौत्रं॥ हायनांतयुवादिभ्योऽणिति सूत्रे श्रोत्रियस्य यलोपश्चेति वार्त्तिकाद्यलोपे ऽन्यगत्ययेच यस्येति चेतीकारलोपः॥ अर्हतो भावकर्म्मार्हंती गुणवचनब्राह्मणादिभ्य इतिसूत्रे ऽर्हतो नुम्चेत्युक्ते नुमुभ्यत्र। खिला ङी षिह लस्त्व ङितस्येति यलोपः। ताभ्यां क्तिनैः श्रोत्रमार्हंतीवर्णेः। तेनवित्ताइति चणप्। श्रोत्रियत्वयोग्यताभ्यां प्रसिद्धेरित्यर्थः॥ किंचागुण्येगुणवद्भिः प्रशस्तगुणयुक्तैरितियावत्। रूपादाहतप्रशंसयोरितिसूत्रेणान्येभ्योपि दृश्यत इत्युक्तागुण्या ब्राह्मणा इत्यस्य भाष्यादावुदाहृतत्वात्। आह द्विविमिति। अहुन्यहेनि। गल्सहमित्यर्थः। अचतुरेत्यादिना निपातनात्साधुः। तोष्टूयमानइति॥ स्तौतेर्यङंतात्कर्मणि शानच्। सार्वधातुकेयगिति धातोर्यक्। आनेमुक्। अपिशब्देन विरोधं द्योतयति। वस्तुतस्तु न विरोधः। स्तुतिप्रयोजकीभूतानामनंतकल्याणगुणानां श्रुतिस्मृतिसिद्धत्वेपि विपदादिवद्व्यावहारिकत्वात्तदभावस्य पारमर्थिकत्वात्। एतच्चोत्तरमीमांसायां स्पष्टमेव। विभुर्व्यापकः परमेश्वरः। अतिशयेन विजयते विजयतेतरां सर्वोत्कर्षेण वर्त्तत इति फलितोर्थः॥ विपराभ्यांजेरिति तङ्। तदंताद्द्विवचनविभज्येत्यादिना तरप्। किमेत्तिङव्ययादामित्याम्। नन्विह तरप् दुर्लभ एव विजयत इत्यस्याप्रातिपदिकत्वादतिङ्नाच्चान त्वसहसुपेत्यत्र सहेति योगविभागात्तिङंतेन विशब्दस्य समासे प्रातिपदिकत्वं स्यादेवेति वाच्यं। सच्छंदस्येवेति तत्रसर्थ्येन सह विरोधापत्तेः। किंच। प्रातिपदिकत्वाभ्युपगमे सोरुत्पत्तिः स्याल्लिंगसर्वनामताभ्युपगमेन नपुंसकत्वात्सो

Acc. No. ~~298~~ M1484

Title - तत्त्वबोधिनी. (अपूर्ण)

(Comm. on सिद्धान्तकौमुदी)

Author - ज्ञानेन्द्र सरस्वती.

Date - ?

Subject - व्याकरण.

folio - 61

Xerox - 122

K K S U LIBRARY
RAMTEK
441 106
M-1484
Dist Nagpur

Checked 2012

र्थ्यं कपि कस्यो नपुंसक इति कस्योदुर्वारः स्यात् । समुदायांतरस्य जयत इत्यस्य तिङंतत्वेपि साकांक्षत्वेन असामर्थ्यात्ततोपि न वितुं नाह
समर्थः पदविधिरिति परिभाषितत्वात् । ओंमंतेन विग्रहो युज्यत इति कल्पनायां तु अंतरंगत्वात्परस्मैपदम् हत्वो विजयतितरामिति स्यादिति व
दत्राऊः । समुदायांतर्गतात्तु ज्ञायते इत्यस्मादेव तरप् । न च तस्य विग्रहे न सह साकांक्षत्वेनासामर्थ्यं शंक्यं । तिङंतस्य प्रधानत्वेन सापेक्षत्वेपि दोषा
भावा उपसर्गस्य द्योतकत्वेन गम्यैकमर्थ एव नास्तीति साकांक्षतायां एव कुमशंक्यत्वादेवेति । एतत्कथनपूर्वकं वर्त्तिष्यमाणमाहोप्रवर्द्ध इति । हलंतेषु
त्र स्पृशोनुदके क्विन् । ऋत्विग्दधृक्त्वादादिषि लादिना क्विन्नादिषु त्पादनं प्रासंगिकमिति भावः । तुर्यश्चतुर्थः । चतुरश्छयतावाद्यक्षरलोपश्चे
त्युक्तत्वात् । अथेति । इहापि लुप्तस्तु णत्वः स्त्रियामत्र अणिलुण इत्यादिषु त्पादनं प्रासंगिकं बोध्यं । प्राधान्येन तु तृतीयाध्यायस्थाएवेहोच्यं
त इति भावः । अनुबंधसंदेहनसंदेहमाशंक्याह दशलकारा इति । प्रदर्श्यंत इति । यद्यपि पंचमे लकारे रूपाणि अधुना नस्तुत्पाद्यंते तथापि लकारः स्वरूपे
ण प्रदर्श्यते । लस्येत्यादिसूत्रविषयतां लः कर्मणि च भावे चाकर्मकेभ्यः लस्येत्यादिसूत्रविषयतां नुत्पादयितुमिति भावः । पंचम इति । लेडित्यर्थः । लट्
लडिति स्वोक्तक्रमापेक्षयैव लेटः पंचमत्वं न तु सूत्रोक्तक्रमेणेति बोध्यं । वर्तमाने लट् । वर्तमान इत्येतल्लस्यार्थविशेषणमित्याह । वर्तमाने क्रियावि
त्तेरिति । धातोरिति सूत्रमातृतीयाध्यायांतमधिक्रियते इति भावः । लस्यादिति । तस्य वाच्यं त्वनुपदमेव स्फुटीभविष्यति । वर्त्तमानकालस्तु न तद्वाच्यः । कि
तु द्योत्य एव लडादिष्वपि भूतादिकालो यथायथं द्योत्य एवेत्यवगंतव्यः । वस्तुतस्तु वाच्यत्वाभ्युपगम इति विध्यादिसूत्रे वक्ष्यामः । अटावितावितिः । अकार
उच्चारणार्थ इति तु नोक्तं लिङादिवैलक्षण्यसंपादनायत्वस्यावश्यवक्तव्यत्वात् । लः कर्मणि च । चकारात्कर्त्तरि इत्यतः कर्त्तरीत्यनुकृष्यते । सक
र्मविषयं चेदं अकर्मकेषु कर्मणीत्यंशस्य बाधितत्वात् भावे चेत्युत्तरवाक्येन तत्र विशेषविधानाच्च । तदेतदाह । सकर्मकेभ्य इति भावेचेति । चका
रेण कर्त्ता वानुकृष्यते न तु कर्म अस्संभवान्नदाह । भावे कर्त्तरि चेति । ननु भावकर्मणोरात्मनेपदविधानात् शेषात्कर्त्तरीति परस्मैपदविधा
नाद्य ज्ञापकाल्लकाराणां भावकर्मकर्त्तारोर्था अनुमातुं शक्यं तत इति किमनेन सूत्रेण । मैवं । असत्यस्मिन्सूत्रे सकर्मकेभ्यो घञादिवद्भावे लका
रापत्तौ घटः क्रियते देवदत्तेनेत्यादिप्रयोगः प्रसज्येततन्मा भूदित्येतदर्थमेतत्सूत्रस्यावश्यकत्वात् । न चैवमकर्मकेभ्यो भावे इत्येवास्

आख्निनीति

२॥

चा२ पा२

ख्यातां भावेऽकर्मकेभ्य एवेति नियमार्थ इति वाच्यं। अकर्मकेभ्यो भाव एवेति विपरीतनियमापत्त्या कर्त्तरि तेभ्यो लकारानापत्तेः तस्माद्भावे एवेति चका
र आवश्यकः। न चैवं भावेऽकर्मकेभ्य इत्येवास्त्विति वाच्यं। भावे कर्त्तरि चाकर्मकेभ्य एवेति नियमापत्तौ सकर्मकेभ्यो भाव इव कर्त्तर्यपि लकारानाप
त्तेः। नन्वेवमपि लश्च भावे चाकर्मकेभ्य इत्यत्र चकारेण कर्त्तरीत्यनुकर्षणात्तल्लकाराः सकर्मकेभ्यः कर्त्तरि स्युरकर्मभ्यो भावे कर्त्तरि च स्युरि
त्यर्थः। पर्यवसितः कर्मणि तूक्तज्ञापकाद्भविष्यतीति किमनेन कर्मणीत्यनेनेति चेन्मैवं। उत्तरसूत्रे तयोरित्यनेन कर्मणोपि परामर्शार्थं तस्या
वश्यकतया ज्ञापकानुसरणक्लेशस्य वैयर्थ्यात्। तस्माद्यथान्यासमेव रमणीयं॥ ॥अत्र नैयायिकाः। लकाराणां कृतावेव शक्तिः लाघवान्न
तु कर्त्तरि। कृतिमतः कर्त्तृत्वेन तत्र शक्तौ गौरवात्। देवदत्त इत्यादिप्रथमान्तपदेन तल्लाभाच्च। देवदत्तः पचतीत्यत्र हि देवदत्तो विशेष्यः यत्नो विशेष
णं। आश्रयं तु संसर्गस्तथा च पाकानुकूलकृत्याश्रयो देवदत्त इत्यादिशाब्दबोधोप्युपपद्यत इति। तन्न। पचतीत्यत्र पाककर्त्तृक इत्याकां
क्षानुरोधेन लकाराणां कर्त्तरि शक्तिरित्यभ्युपगंतुमुचितत्वात्। पाकानुकूला कृतिरिति शाब्दबोधाभ्युपगमे तु कस्मिन्नित्याकांक्षास्या कस्येति
वा। न चैककर्त्तृका पचिक्रियेति शाब्दबोधाभ्युपगमेपि कस्याकांक्षा नोपपद्यत एवेति शंक्यं कृत्सामान्यबोधे सति क इति कर्त्तृविशेषाकांक्षायां
बाधकाभावात्। नापि देवदत्तकर्त्तृका पचिक्रियेत्यत्रापि कस्मिन्निति कस्य वाकांक्षा दुर्वारैवेति शंक्यं पक्तरि त्वनुकूलव्यापारस्यैव पचिक्रि
यात्वात्तदाश्रयस्य देवदत्तस्य कर्त्तृत्वात् क्रियाश्रयत्वे। निश्चिते कस्मिन्नित्याकांक्षाया अप्रवृत्तेः। किंच। पचंतं देवदत्तं पश्य पचते देवदत्ताय देहि।
पचमानस्य देवदत्तस्य द्रव्यमित्यादौ शतृशानजादीनामपि तिबादिवल्लादेशानामविशेषेण तेभ्योपि कृतिमात्रबोधापत्तेः। एवं न चेष्टापत्तिराश्र
यत्वं संसर्ग इत्युक्तत्वेन पाकानुकूलकृत्याश्रयं देवदत्तं पश्येत्याद्यर्थस्वीकारे दोषाभावादिति वाच्यं। नामार्थयोर्भेदेनान्वयस्य स्वपरसिद्धांत
विरुद्धत्वात्। न चैवं नामार्थयोरभेदसंसर्गव्युत्पत्त्यनुरोधेन शतृशानजादीनां कर्त्तरि शक्तिः तिबादीनां कृतावेवेति वैषम्यं स्वीक्रियतां प्रा
माणिकगौरवस्यादोषत्वादिति वाच्यं। स्थान्येव वाचको लाघवान्न त्वादेशो गौरवादिति स्वसिद्धांतस्य परित्यागापत्तेः। रामः। ज्ञानं। क
रदित्यादौ विसर्गसो रमिसोरदडिच कृते लाघवात्सुत्वेनैव शक्तिर्न तु तत्तद्रूपेणेत्यादिसवरीयव्यवहारस्यासंगत्यापत्तेश्च। एवं ॥२॥

बादानां शत्रादीनां च स्मारकतया लिपिस्थानीयत्वबोधकस्तु लकार एवेति स्थिते स च शत्राद्यंते कर्त्तरि शक्त इत्यभ्युपगमे [illegible]ते कथंया
तिं बोधयेत्। अन्याय्यश्चानेकार्थत्वमिति न्यायात्। यदि तु वैयाकरणरीतिमाश्रित्य सर्वत्रादेशा एव वाचका इत्यभ्युपगम्यते तर्हि घटं घटेन
हरे वा विसर्गो वेत्यादिषु सर्वे सर्वपदादेशा इति न्यायेन पदस्फोटो वाक्यस्फोटश्चासिध्येदिति सर्वलोकतन्महदनिष्टं। किंच कर्त्तरि कृत् द्वितीयत्वकर्
ग्रहणं तद्वत्तः कर्मणीति सूत्रे चकारेणानुकृष्यत इति कथं ण्वुलादीनां लकाराणां च शक्तौ वैलक्षण्यं। नञ्च नामार्थयोरभेदान्वयसंसर्गा
भ्युपगम एव ण्वुलादौ कर्त्तृवाच्यत्वे बीजमिति वाच्यं। पचतिरूपं पचतीतिकल्पं देवदत्त इत्याद्यनुरोधेन तिङ्क्ष्वपि कर्त्तृवाच्यतौचित्यात्।
ननु समुदायस्य नामत्वेपि तिङ्प्रत्ययो न नामेति चेत् पावक इत्यत्रापक इत्येतन्नामेति तुल्यं। अकान्तं नामेति चेत्तद्रूपबाधकमपि
नामेति तुल्यं। अतश्चात्र शास्त्रे पाचकः कर्त्ता देवदत्त इत्याद्यभेदान्वयो सर्वैरभ्युपगंतव्य इति तिङ्क्ष्वपि कर्त्तृवाच्यता स्वीकर्त्तव्यैव।
किंच। कर्त्तृवाच्यत्वानभ्युपगमे युष्मदादिसमानाधिकरणे मध्यम अस्मद्युत्तम इति सामानाधिकरण्यप्रयुक्ता पुरुषव्यवस्था अपि ते
कर्त्तरि प्रथमेत्यादि किंच त्वन्मते कथं संगच्छतां। यत्तु नभिहित इत्यस्यानभिहितसंख्यावत इत्यर्थवर्णनेन देवदत्तः पचत्योदनमोदनः
पच्यते देवदत्तेनेत्यादौ प्रथमाद्वितीयादिव्यवस्थापनमुक्तं। तन्न। कृत्तद्धितसमासेषु संख्याभिधानस्यासिद्धत्वात्। ततश्च पक्व
व्यस्तं उलः शलः शातिकोश्वः आस्तोदको ग्राम इत्यादिषु कर्मणि द्वितीयेत्यस्य प्रवृत्तौ प्रथमा न स्यात्। न चौतिष्ठतीत्यध्याहारेण संख्या
भिधानमिहाप्यस्तीति वाच्यं। स्थित इत्यध्याहारे तदभावात्। शाब्दिकोयं देवदत्तो न तु नैयायिक इत्यादिषु नीलं भिदं न तु रक्तमि
त्यत्रैव वा क्रियापदाध्याहारस्यानावश्यकतया। आख्यातेन शब्ददर्दुरं करोतीति ठक्प्रत्ययेन वा कर्त्तृसंख्याया अनुक्तत्वाद्देवदत्ते कर्त्तरि तृ
तीयोत्पत्तिप्रसंगाच्च। तस्मादनभिहिते कर्त्तरि इत्यादिव्याख्यानमेवाभ्युपेतव्यं। अपिच। धातूपात्तव्यापाराश्रयः कर्त्ता। तत्राश्रय
मात्रं कृतां लकाराणां चा~~श्रय~~र्थः। ननु व्यापारोऽपि तस्य धातुनैव लभ्यत्वात्। अत एव कर्त्ता कारक इत्यादौ प्रकृतिगत्यस्यपार्थ

त्वबोधिनी

॥३॥

योर्नान्वयः। व्यापाराश्रयस्य प्रत्ययार्थत्वे तु तस्य प्रकृत्यर्थेन व्यापारेणान्वयः कुतः स्यात्। यस्तु वदति कृधातोः कृतिरर्थः कृत्प्रत्ययस्यापि तु तावेव शक्तिस्तु कर्तरि। कर्तरि कृदित्यत्र हि कर्तरीति भावप्रधानो निर्देशः। कर्तृत्वं हि तमर्थः। तच्च कृतिरेव। यत्र तु देवदत्तादिपदसमभिव्याहारस्तत्र तद्गतो बोधः। तमतिलक्षणेत्यादि। तन्मते एवं चि किं कर्तृत्यादिदोषो सुतरामन्वयः। कर्मवत्कर्मणेति सूत्रे करोतिरुत्पादनार्थः उत्पत्तिश्च कर्मस्था। यत्नार्थत्वे तु करिष्यते घट इत्यादि न सिध्येदिति वक्ष्यमाणवचनं च दुरुद्धरं। आश्रयमात्रस्य प्रत्ययार्थत्वे तु रथो गच्छतीत्यत्र रथस्याचेतनस्य यत्नाभावेपि गमनानुकूलचक्रभ्रमणादिव्यापाराश्रयत्वान्न काचिदनुपपत्तिः। एवं स्थिते कृतौ शक्तिरित्यस्योक्तिसंभव एव नास्ति कृतेरपि व्यापारविशेषतयाश्रयेण धातुत एव लाभात्। जानातीत्यादावाश्रयत्वप्रत्ययस्यार्थ इति स्वीकृत्य फलार्थत्वस्य त्वयापि त्यक्तव्यत्वात्। न यत्नमन्तरेण ज्ञानं नोदेतीति कश्चिदभ्युपैति तस्मात्कृतौ तिङः च चैत्वलक्षणं प्रकृतं भमिति कर्त्रर्थं किलमभ्युपेयं। एतेन कर्त्रधिकरणे ल्युडारब्धानुवाच्यत्वं कर्तुर्निरस्य जंजभ्यमानाधिकरणपदताद्धि हितस्य जंजभ्यमान इति शानचः कर्तृवाचकत्वं स्वीकुर्वतां मीमांसका अपि प्रत्युक्ताः। यत्तु ते रुकृशानचो कर्तरि कृदिति त्वाकरणं शक्तियाहकमस्तीति। तन्न। रुद्धवाक्यशेषाध्ययमर्याकांक्षायामनिर्दिष्टार्थेषु ण्वुलादिष्वेवोपतिष्ठते। आकांक्षितविधानं ज्याय इति न्यायान्न तु शत्रादिषु स्थानिभूतलकारार्थेनैव तेषां निराकांक्षत्वात्। अन्यथा भावे कर्मणि च शानचो दौर्लभ्यापत्तेः। ततश्च शय्यमाने आस्यमाने चायं गत इत्यादिप्रयोगो भावे न स्यात्। कर्मणि तु क्रियमाण इत्यादिप्रयोगो न स्यात्। यत्तु सहृपादाकुः। कर्तरि यदेकवचनं तत्र तिप्। कर्तरि यद्द्विवचनं तत्र तस् इत्यादिक्रमेण लः कर्मणीत्यस्य द्व्येकयोरित्यादेश्चैकवाक्यतया व्याख्यानान्न कर्तृवाच्यतासूत्रादायातीति। तच्चिन्त्यं। तान्येकवचनद्विवचनेति विहितद्विवचनादिसंज्ञा हि तिबाद्यादेशनिष्ठा। ततश्च द्विवचनादिसंज्ञकतिबादिविधिना द्व्येकयोरित्यस्यैकवाक्यतास्तु न च तिबादिविधौ कर्तरीत्यस्ति येन द्वित्वैक

त्वादिविशेषणतया कथं विज्ञायेत। ननु लः कर्मणीति सूत्रे कर्त्तरि कृदित्यतोनुवृत्तं कर्तृग्रहणं तिबादिविधावस्यैव लविधौ तिबादिविध्योरप्येकवाक्य
तास्वीकारादिति चेत्सत्यं। वाक्यैकवाक्यता हि सा न तु पदैकवाक्यता। लः कर्मणीति विहितलकारानुवादेन तिबाद्यादेशविधेः प्रवृत्तत्वात्। तथा च लवि
धौ श्रूयमाणं कर्तृग्रहणं कथं संख्यां विधौ नष्टं। न हि यत्र कर्तृग्रहणं तत्र संख्यापरिच्छापकमस्ति। लकारस्य द्विर्वचनादिसंज्ञाविनिर्मुक्तत्वात्।
ततश्च कर्त्तरि यदेकत्वमिति व्याख्या कथमपि न संभवत्येव। स्यादेतत्। लः कर्मणीति सूत्रे ल इत्यकारानुबंधिकयोर्लङ्लटोः सामान्यग्रह
णं न संभवति किंतु स्वस्वानुबंधकलकाराणां सामान्यग्रहणमिति निर्विवादं। तत्र ल इति जसंतं मास्तु किंतु ङसंतमस्तु। लः परस्मैपदमितिव
त्। आदेशापेक्षायेयं षष्ठी। लस्य य आदेशः स कर्मणि चेत्स्यादि। न वा विहितस्य लस्यानुवादो येन संसंभवतीति वाच्यं। वर्त्तमाने लडित्यादिवि
शेषलविधानात्। तथा च लस्य स्थाने य आदेशः सः सकर्मकात् कर्मणि कर्त्तरि च स्यात् अकर्मकाद्भावे कर्त्तरि चेत्यर्थ उक्तः स्यात्। सोपि तिबादी
नामेव न तु शत्रादीनां तेषां द्विवचनादिसंज्ञाविरहात्। द्व्येकयोरित्यादिना अस्यैकवाक्यतायाः सर्वाद्युक्तत्वात्। न च तत्र उक्तरीत्या कर्त्त
रीत्यनेन निर्वाहः। स्तावे कर्मणि च शानचौ तौ लैन्त्यापत्तेरुक्तत्वात्। न च शानजादेर्विधिना सहात्मनेपदव्यवस्थापकानामेकवाक्यतया भा
व कर्मणोरित्यनेनेष्टसिद्धिः सकर्मकादपि भावे शानजापत्तेः। किंच जसंतले श्रुतेनैव संबंधः षष्ठ्यन्तले त्वादेशशब्दस्याध्याहारा
द्गौरवमित्याहुः। अत्रेदं बोध्यं। भावे चाकर्मकेभ्य इत्यकर्मकग्रहणेनाविवक्षितकर्मणोपि ग्रहणं। अत एव णेरणाविति सूत्रे
नेह पच्यते नेह भुज्यते इति भावे लकार इति हरदत्तः। अत्यंताविद्यमानकर्मणामेव ग्रहणं नेह पच्यत इत्यादौ तु कर्मण्येव
लकारः। गम्यमानस्याच कर्मन प्रयुज्यते इति मतांतरेण तत्र गतिबुद्ध्यादिसूत्रे हरदत्तग्रंथे स्पष्टं। यत्तु कैश्चिदुक्तं तत्र
विवक्षितकर्मकाणां भावे लकार इति प्रमादकृतोक्तं भाष्यादिविरोधादयुक्तमिति तच्चिंत्यं। पदद्वयस्यापि भाष्यकैयटा
दिग्रंथारूढत्वात्। प्रत्युत अविवक्षितकर्मणोप्यकर्मकत्व इति पक्ष एव प्रबलः। तथाहि। समानकर्तृकेषु तुमुन् इति सूत्रे
इच्छता क्रियते इति भावे लडुक्तो हरदत्तेन। णेरध्ययने वृत्तमिति सूत्रे कैयटहरदत्तादिभिरपि नपुंसके भावे क्तोऽकर्म

6

कर्म्मकेभ्य एव। तयोरेव कृत्यक्तखलर्था इत्यत्र मध्यग्रहणात्तत्र च भावे चाकर्मकेभ्य इत्यनुवर्त्तनादन्यथा घञ्। कृतमिति प्रसज्येतेति तु सिद्धान्तितं। एवं स्थिते यथ विवक्षितकर्मणोऽपि लसूत्रे सकर्मकग्रहणेन न गृह्येरन्। तर्हि पीता गावो भुक्ता ब्राह्मणा इत्यादौ क्तो न स्यादिति चेदत्र गत्यर्थाकर्मकेत्यादि कर्मणि क्त इति सूत्रे हरदत्तेन वक्ष्यमाणं कृतपूर्वी कटमित्यत्र साधयिष्यत इति कैयटाद्युक्तं च कथं संगच्छतां। कथं च गतो तिरश्चीनमित्यादिप्रयोगाः संगच्छेरन्। गतिबुद्धीति सूत्रे तेऽकर्मकग्रहणेनाविवक्षितकर्मणो न गृह्यंत इत्युक्तं तेनाणौ यः कर्त्ता स ण्यंते स ण्यंते कर्म न भवतीति सिद्धं। गत्यर्थाकर्मकेति सूत्रेऽपि न गृह्यंते तेन हि सूत्रेण कर्त्तर्यपि क्तो विधीयत इति दत्तवान् पक्ववान् इत्याद्यर्थे दत्तः पक्व इत्यापत्तेः। इह सूत्रे तु विवक्षितकर्मणामकर्मकग्रहणेन कोऽपि दोष इत्यास्तां तावत्। लस्य॥ वर्णग्रहणे जात्यर्थं ग्रहणपरिभाषाऽर्थवद्ग्रहणपरिभाषा च न प्रवर्त्तत इति लुनाति चूडाल इत्यादौ तिबाद्यादेशाः कुतो न भवन्तीति चेत्। अत्राहुः॥ लः कर्मणीति सूत्रे निर्दिष्टानां कर्त्राद्यर्थानामनुवृत्तेः कर्त्राद्यर्थे विहितस्य लकारस्य ग्रहणमिति। अतोऽपि तिबाद्यादेशानुवादेन कर्त्राद्यर्थविधिरिति कल्पना निरस्ता। लस्यानिकृतिबादीनां कर्त्राद्यर्थविधानं कर्त्राद्यर्थे विहितस्य लस्य तिबादिविधानमित्यन्योन्याश्रयापत्तेः। यद्वा। धातोरित्यधिकारात् धातोर्विहितस्यैव लस्य ग्रहणमिति नोक्तातिप्रसंगः। लस्येत्संज्ञा तु न भवति फलाभावात्। न च लित्स्वरः फलं। णलो लित्त्वेन तदभावस्य ज्ञापनात्। नाप्यश्रवणमेव फलं उच्चारणस्यानर्थक्यापत्तेरादेशविधिनैवाश्रवणलाभाच्च। लस्य तिबादिस्थानित्वाभ्युपगमे तु लः परस्मैपदमित्यादि स्वरसतः संगच्छत इति दिक्॥ तिप्तस्झि॥ समाहारे द्वन्द्वः। इट् वकारस्त्वागमलिंगं न भवति सप्तदशादेशैः सुमहमिति प्रत्याहारात्। किंतु टो दिति विशेषणार्थः। एरेदित्युच्यमाने एधेवहि एधेमहि इत्यत्रापि स्यात्। वर्णग्रहणे जात्यग्रहणार्थवद्ग्रहणपरिभाषयोरप्रवृत्तेः। केचित्तु इटो दित्यत्र लिङ इत्यनुवर्त्तनाल्लिङादेशस्यैकारस्येति सामानाधिकरण्येन व्याख्यानात् एधेवहि एधेमहि इत्यादावतिप्रसंगो नास्त्येव। न हि तत्र एकारमात्रमादेशोऽस्ति। तेन टो दित्यत्र टकारः स्पष्टप्रतिपत्त्यर्थ एवेत्याहुः। तच्चिंत्यं। इकारस्य विशेषणत्वे विशेषणेन तदंतग्रहणादिवर्णान्तस्य लिङो ह्यादित्यर्थप्रसक्त्या उक्तातिप्रसंगस्य तदवस्थत्वात्। वहिमहीत्यस्यापि स्थानिवत्त्वेन लिङ्त्वात्। महिङो ङकारस्तु ङ इति तिङ्प्रत्याहारार्थः। स च समुदायानुबंधो न त्ववयवानुबंधो व्याख्यानात्। तेन दृषेः कर्मणि आशीर्लिङि एषिषीमहि इत्यत्र गुणनिषेधो न। तथा वृश्चतेः पृच्छतेश्च कर्मणि लिटि वव्रश्चिमहे पपृच्छिमहे इत्यत्र हि ङित्त्वात् संप्रसारणं न।

तङानौ। लस्येत्यस्यानुवृत्तेर्लादेशा एवानेनाग्ध्यत इत्याशयेनाह। शानच्कानचौ चेति। तेन परस्मैपदित्वयोऽपि नात्रोत्यवयोः क्वसुनेलिचानशः सवत्येवाक
तीह निघ्नानाः। अनुदात्तङितः। अनुदात्तश्च ङश्च अनुदात्तङौ तौ इतौ यस्य सः अनुदात्तङित्। इदं द्वंद्वांते श्रूयमाण इत्थं अत्येकं संबध्यते तत्रानुदात्तांशो
वदंतविधेः फलाभावात् अंशांतर एव तदंतग्रहणमित्याशयेनाह। अनुदात्तेत इत्यादि। उपदेशेऽजनुनासिक इदिति तोऽनुवृत्तमुपदेशग्रहणम
पि ङिदंश एव संबध्यते नान्यत्राव्यभिचारात्तदाह। उपदेशे यो ङिदिति। विशेष्यमंतरेण तदंतविधिरिह दुर्लभ इत्याह। धातोरिति। लस्येति। नोन्वि
हानुवृत्तेरभावादुभयमपि दुर्लभं। भूवादय इति सूत्रान्मंडूकप्लुत्यानुवृत्तस्य धातव इत्यस्य विपरिणामात्कथंचिद्धातोरिति पदे लभ्येऽपि ल
स्येत्येतन्न लभ्यत इति चेत्। अत्राहुः। इकोऽसलित्यत्र सना धातोरिवेहात्मनेपदेन लकारधातोराक्षेपो बोध्यः। तिङां लादेशत्वाल्लस्य च धा
तोर्विधानादिति। उपदेशे इति किं। कुकुटीयति। गांकुटादिभ्य इति सन आतिदेशिकं ङित्वं। धातोः किं। चङ्ङ्भ्यां माभूत्। अनुवदत्। अवोचत्।
ननु लावस्थायामेव स्यतासीत्यादिना स्यप्रत्यये कृते व्यवधानादात्मनेपदपरस्मैपदरूपनियमाप्रवृत्तावपि लकारसामान्याश्रयत्वेनांतरंग
त्वात्स्यप्रत्ययात्पूर्वमेव लस्य तिबादिषु सत्सु परस्मैपदपक्षे चात्मनेपदं स्यादेवेति वृद्भ्यः स्यसनोरिति सूत्रे स्यस्य ग्रहणं व्यर्थं सत्
तेनैव स्यग्रहणेन विकरणेभ्यो नियमो बलीयानिति ज्ञापितं। तेनानुदात्तेत्वादिविषयत इत्येवं नियमात्मनेपदमा वृद्भ्यः स्यसनोरिति परस्मैप
दमपि पक्षे भवति। तथा च विकरणेभ्यो नियमस्य बलीयस्त्वात् वृङ्ङोर्न दोषः। विकरणात्प्रागेव परस्मैपदप्रवृत्तेरिति चेत् सत्यं। स्यग्रह
णं विकरणव्यवधाने नियमभंगं ज्ञापयति तेन पक्षे च ङङोर्दोषः स्यादेव। अयं पक्षः शाब्दिकैरवधृतः सूत्रे भाष्यकैयटयोः स्पष्टः। किंच तदंत
विधिलाभार्थमपि धातुग्रहणमावश्यकं। धातोरेकाच इत्यादिना यङ्। बोभूयते। ऋतेरीयङ्। ऋतीयते। एते ङकारस्य चनु व्यपदेशिवद्भावेन
ङिदंतत्वं। न मोव रिव ङ्ति यङ् इतस्य चिचिज्ञायते इत्येतत्कथमिति चेत्। अत्राहुः। अवयवे चरितार्थो ङकारः कथं जंतस्य विशेषणं भवति। त
था च समुदायानुबंधो ङकार इति व्यपदेशिवद्भावेनैव ङिदंतत्वं बोध्यमिति। स्वरितञितः। पूर्ववदित्यतः अत्येकं संबध्यते। कर्त्रभिप्रा
ये इति गच्छतीति कर्त्रभिप्रायं। कर्मण्यण्। धातोरिति। धातोर्लस्येत्यर्थः। लकारधातोराक्षेपः पूर्ववद्बोध्यः। तिङस्त्रीणि त्रीणि।।

तिङः षट् त्रिकाः संज्ञास्तास्तिस्र इति यथासंख्यं न प्राप्नोतीत्यत आह। उत्तमयोरिति। परस्मैपदमात्मनेपदमिति चानुवर्तते तेन पदद्वये प्रत्येकं त्रयस्त्रयस्त्रिका इति यथासंख्यं संज्ञाः प्रवर्तंते इति भावः। ननु प्रथमश्च प्रथमश्च प्रथमश्च प्रथमौ। मध्यमश्च मध्यमश्च मध्यमश्च मध्यमौ। उत्तमश्चोत्तमश्चोत्तमश्चोत्तमाविति कृतैकशेषाणां प्रथमादीनां प्रथमौ च मध्यमौ च उत्तमौ च प्रथममध्यमोत्तमा इति द्वंद्वे सुपगते त्रिकद्वयस्य त्रिकद्वयस्य यथासंख्यं प्रथममध्यमोत्तमसंज्ञाः प्रवर्तंत इति भावः। ननु प्रथमश्च प्रथमश्च प्रथमौ मध्यमश्च मध्यमश्च मध्यमौ उत्तमश्च उत्तमश्चोत्तमाविति) सुः नत्वेकैकस्येति णलुत्तमो वेति सूत्रं विरुध्येत। णलुत्तमसंज्ञकत्वाभावात्। ततश्च प्रथममध्यमोत्तमा इत्यत्र कृतद्वंद्वानां प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्चेत्येकशेषश्चाश्रीयतां। तथा हि सति संज्ञा अपि षिङिति परस्मैपदात्मनेपदग्रहणान्न हि चिकीर्षितं विनेष्टसिद्धेरिति चेन्मैवं। एकशेषाश्रयणे गौरवात्। वैयर्थ्याच्च त्वयापि हि परस्मैपदात्मनेपदग्रहणमनुवर्त्यमेव। अन्यथा शतृक्वस्वोः सावकाशा परस्मैपदसंज्ञा प्रथमादिसंज्ञया बाध्येत। ततश्च क्राम्यति क्रामतीत्यादौ क्रमः परस्मैपदेष्विति दीर्घो न स्यात्। आक्रामन्नित्यादौ तस्य सावकाशत्वात्। परस्मैपदानामिति विहितस्य णलो णलुत्तमो वेति णित्वविकल्पविधानाज्ज्ञापकात् परस्मैपदसंज्ञा प्रथमादिसंज्ञया न बाध्यत इति चेत्तर्हि सुतरां प्रतिपत्तिगौरवं। तान्येकवचनानि तानीत्यस्य व्याख्यानं लचेत्यादि। अन्यथा एकसंज्ञाधिकारात् प्रथमादिसंज्ञानामेकवचनादिसंज्ञानां च पर्यायः स्यात्। इष्टापत्तौ तु अन्ते लोटो मेनिरिति कृते एकत्वविवक्षायामुत्तमसंज्ञा तावाद्वातु नमस्येत्यस्याप्रवृत्त्या अहद्ध्रीसादिप्रयोगोऽपि साधुः स्यादिति भावः। प्रत्येकमिति। यत्तु प्राचा एकैकश इत्येकैकशः सैव वीप्साया उक्तत्वेन द्विर्वचनायोगात्। येन नाप्राप्तिन्यायेन द्विर्वचनापवादः शसिति सिद्धांतात्। तथा सुप इति सूत्रेऽप्येकैकश इति प्राचोक्तमप्ययुक्तमेव। एतत्क्रमनोरमाग्रंथानुरोधेनोक्तं। अन्ये तु एकैकमेवैकैकशः स्वार्थे शस् न तु वीप्सायां। न च स्वार्थे यः शस् स आकरग्रंथान्नावगम्यत इति वाच्यं। एकां कपिलां एकैकशः सहस्रं चोदयेति भाष्यात्। शसंतस्य प्रत्येकमित्यर्थकत्वेन कैयटेन व्याख्यानाच्च वार्त्तिकस्यापि शसोऽवगम्यमानत्वात्। तच्च एकैकश इति प्राचोक्तमयुक्तमित्युक्तं तदेवायुक्तमित्याहुः। युष्मदि। समानाधिकरण इत्यस्य व्याख्यानं तिङ्वाच्यकारकवाचिनीति। भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं। स्थानिनीत्यस्य व्याख्यानमप्रयुज्यमान इति। समानाधिकरणे किं। त्वां पश्यति। त्वया क्रियते। तुभ्यं ददाति। मन्योपपद इति। सप्तम्यां तस्यानुगुणत्वेन व्याचष्टे। तस्मिन्निति कृते सतीति। तस्माद्धातोर्लस्य स्थाने इत्यर्थः।

तथा भवत इत्यर्थः इति । तिङ् वाच्यकारकवाचिनि प्रयुज्यमानेऽप्रयुज्यमाने चेत्यर्थः । तिङ्शित् ॥ धात्व । धकारोक्ता इति किं । हरीन् । शसः सा
र्वधातुकमपिदिति ङित्त्वे घेङितीति गुणः स्यात् । लिहः क्ङियइत्यादि शसस्तेषु सार्वधातुके ञीयतीतिय स्यात् । केचित्तु । वारिणीत्यत्र नुमि कृते
पित्वल्घूपधगुणः स्यादित्याहुः । तन्न । क्ङितीति निषेधात् इगंतलघ्वप्रयुक्तस्य नुमो गुणप्रयोजकत्वे संनिपातपरिभाषाविरोधाच्च । कर्त्त
रि शप् । सार्वधातुके यगित्यतः सार्वधातुक इत्यनुवर्त्तते धातोरेकाच इति सूत्राद्धातोरिति च । तदाह । कर्त्रर्थ इत्यादि । श्रोतः । लकारादका
रउच्चारणार्थः । आयनेयीनी इति सूत्रात्प्रत्ययग्रहणमनुवर्त्तते न त्वादिग्रहणमेकदेशेऽस्वरितत्वज्ञापनात् । तस्याप्यनुवृत्तौ तु शयातः
तिनसिध्येत् । शा उ लेट् लेटोडाटौ विस्तंतदनेन प्रत्युक्तं । इह मनोरमायामादिग्रहणं निवृत्तमित्युक्तं तदापाततः । अन्यत्र प्रवृत्तस्या
दिग्रहणस्य निवृत्त्ययोगात् । निवृत्तमित्यस्यानुवृत्तमित्यर्थ इति वा कथंचिद्व्याख्येयं यत्तु प्रत्ययादेरिति ग्रंथः समर्थनाय व्याच
ष्टते आडागमेन तेन सहितोपि प्रत्ययोऽस्तु नाम न तु तत्सहित एव प्रत्यय इति नियमोस्तीति । तन्न । अवयवविनिर्मुक्तस्यावयविलापो
गात् । अन्यथा भयास्तामित्यादौ तामादिना मिडागमापत्तेः । ननु अंगात्परस्य प्रत्ययस्य इड्यासुडंतं तु नांगमिति चेत् । न । आगम
विनिर्मुक्तस्यापि प्रत्ययत्वमिति वदतां मते भवामि भविष्यामीत्यादौ विकरणांतस्यैव तदादिग्रहणबलेन यासुडंतस्याप्यंगताया उ
वीरत्वात् । किंच लविषयेत्यत्र विशेषविहितत्वादासीयुटि कृते लिङः स्थाने इष्टस्यागमेनादिविघाताल्लस्याद्युदात्तत्वं न आप्नोति
साशं क्यपु प्रत्ययस्वरे कर्त्तव्ये आगमो अविद्यमानवदित्यतिदेश आद्युदात्तश्चेति सूत्रे भाष्यादौ स्वीकृतः । न चैतदर्थं लस्यापि प्रत्य
यत्वे युज्यते । नच तन्मते आगमसहितस्यापि प्रत्ययस्येत्यादिकारः स्यादुदात्तः स्यात् तद्वारणाय प्रत्ययस्वरे कर्त्तव्य इत्यादिग्रंथः स्वीकर्त्त
व्य एव लिनास्से वाकरयं च विरोध इति वाच्यं । आगमा अनुदात्ता इति विशेषवचनेनागमस्याप्युदात्तत्वे ङिते आद्युदात्तत्वस्य तत्रा
गवृत्तेरिति दिक् । सस्येति । सकारादकार उच्चारणार्थः । अतो गुण इति । अतो दीर्घो यञीति तु नगवृत्तस्यान्यलोपादेर्विधेः स्थानि
नत्वनिषेधादिति भावः । अतो दीर्घो । तुरुस्तुशम्यमः इति सूत्रात्सार्वधातुक इत्यनुवर्त्तते । सार्वधातुके किं । केशवः अंगना ॥ अतश्चा

॥६॥

इतिवक्तव्ये दीर्घग्रहणं दीर्घ एव यथा स्यादित्येवमर्थं। अन्यथा आपाली रोदनं देवदत्त नन्वुपवामि सोरित्यत्रानंत्यस्यापि प्रश्नाख्यानयोरिति प्लुतः स्यात्। केचित्तु ओत आदिति सुवचं तपरणसामर्थ्याद्विकारनिवृत्तिर्भवेदिति प्लुतस्याप्रसंगात्। उदात्तस्थाने उदात्त आकारः अनुदात्तस्थाने अनुदात्त आकार इत्यादि। तुल्यस्थानेंतरतम इत्यनेनैव सिद्धिं। अत एव वृद्धिर्यथा कप्यग्नीति सूत्रे वृषाकपिशब्दो मध्योदात्त एकस्वरोदात्तत्वप्रयोजनं यस्याग्यादिषु त्रिषु तुल्यस्थानेंतरतमित्येव सिद्धमिति मनोरमादावुक्तं। ततश्च प्रयोजनाभावात्तपरकरणमननिर्विषयार्थमिति नाशंकनीयमेवं यदि तु हल्ङ्याप्भ्य इत्यत्रैव अ आ आविति वत् अत आ इत्यत्रापि आ आ इति प्रश्लेषः क्रियते तदा तपरकरणं विनापीष्टसिद्धिरित्याहुः। प्रहासे चेति सूत्रस्योदाहरणमाह। एहि मन्ये इति। ओदनं भोक्ष्ये इति त्वं मन्यसे इत्यर्थः। एवं तं एत एवेति। एतं मन्ये ओदनं भोक्ष्येथे एतं मन्ये ओदनं भोक्ष्यध्व इत्यन्वयः। भोक्ष्यावह इति युवां मन्येथे भोक्ष्यामहे इति यूयं मन्यध्वे इति इति क्रमेणार्थः। परोक्षे लिट्। यद्यप्यधिश्रयणादिव्यापाररूपा सर्वक्रिया परोक्षैव। उक्तं हि भाष्ये क्रियानामेयमत्यन्तापरिदृष्टा स्वविपरीकृतावयवा न शक्या पिंडीभूता निदर्शयितुमिति। तथापि तदनुकूलशक्तिमतां व्यापाराविष्टानां साधनानां परोक्षत्वमिह विवक्षितं तेन क्रियानाविष्टसाधनमात्रप्रत्यक्षे पि लिट् न भवत्येव। अयं पपाच। त्वं पेचिथ। ननु क्रियाया इव व्याधिश्रयणाधःश्रयणादिव्यापाराणां युगपत्सकृत्प्रत्यक्षाविषयत्वे क्रमशः प्रत्यक्षविषयत्वमस्तीति यत्र तु क्रमशोपि प्रत्यक्षविषयत्वं नास्ति तत्रहि परोक्षत्वं क्रियायाः तत्श्च लिड्युत्तमपुरुषे बोधुलेस इति चेत्। अत्राहुः। स्वव्यापारस्यापि वर्तमानतादशायां व्यासंगादिना स्वयमसंनिधानेन ततः कार्येणानुमितौ सत्यामेव बहु जगद पुरस्तात्तस्य मत्ता किलाहमिति वदति। लिड्वार्धधातुकसंज्ञ एवेति। लङः शाकटायनस्यैवेति सूत्रादेवकारोनुवर्तत इति त्वावः। परस्मैपदानां। अत्र थत्रात्राह्वस्याकारो विधीयमानोऽन्त्यस्य प्राप्नोति। न वाकारस्याकारविधेर्निरर्थकत्वमिति वाच्यं। यथासंख्यसंपादनेन कृतार्थत्वात्। अत्राहुः। धातोरित्यधिकारादादेः परस्येति व्यंजनमात्रस्य कृते द्वयोरतो गुण इति पररूपं यद्वा। द्वयोरकारयोः पररूपेण सूत्रे निर्देशात्तथा वानेकाल्त्वात् सर्वादेशः सिद्धमिष्टमिति। ननु सुबंतानामेव द्वंद्वस्तत्रत्वकारद्वयकनाशा सवर्णदीर्घः स्यादिति चेत्। मैवं। आदेशानां रत्रान्यर्थेनैवार्थवत्त्वात् थत्राह्वस्य विधीयमानमकारद्वयं प्रश्लेषेकमर्थवन्न भवतीति समुदितस्य प्रातिपदिकत्वेनातो गुण इति पररूपस्यैव

॥६॥

११

गवत्तेः। भुवोवुक्॥ अचि श्नुधातुभ्रुवेति सूत्रादचीत्यनुवर्त्तते तदाह। लुङ्लिटोरचीति। अचीति किं। अभूत्। अभूः। लुकि सति लोपो
व्योरिति लोपं बाधित्वा परत्वाद्धल्ङ्यादिलोपः स्यात्। ननु हल्ङ्यादिलोपादंतरंगत्वाल्लोपो व्योरिति लोप एव प्रवर्तिष्यति। तथा त्वमव्यते
यङ्लुङंताल्लुङि तिप्सिपोरमामभूमामभूः स च व्योर्लोप एव माधवादिभिः स्वीकृतः एवं चाज्ग्रहणं उपधाया इत्युत्तरार्थमनुवर्त्तमा
नमिहाप्युपरंजकतया वार्त्तिकारादिभिर्योजितं न त्वावश्यकतयेत्येव विनिष्कर्षः उचितमिति चेत्। अत्राहुः। भुवो वुगित्यस्यांगबाह्यकपक्षे ले
न हल्ङ्यादिलोपस्येव वुकोपि बहिरंगतया असिद्धत्वे सति व्लिलोपस्याप्राप्तेरेवाभावादज्ग्रहणमिहार्थमपीत्येव युक्तमिति। अयं
च शंकायंथः समाधानं ग्रंथस्य मनोरमायां स्थितः। अत्र नव्याः। मव्यातिर्यङ्लुगंत एव नास्ति। अमामदित्यादिरूपं तु दूरापास्तमेवय
कारवकारांतानाम् ऊङ्भाविनां यङ्लुङ् नास्तीति भाष्ये ध्वनितं कैयटेन स्पष्टीकृतं। इदं च व्योरिति यलोप इति द्विषयकं ज्वरत्वरेत्यूठ्
साविनोः स्थिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यं। माधवादिसंमतं च। मव्यबंधने। अयं यांत ऊङावीति मूले वक्ष्यमाणत्वात्तथा
च तमूर्थेन सह मनोरमायं पौर्विरुध्येते स्याऽहुः। यदि तु भवतेरिति पथेतेन दान विरोधः। अजादेरिति यदि बहुव्रीहिः षष्ठी तदा ईक्षमात्मनइ
च्छतिइत्यत्रापि तु मिच्छतिइत्यादौ यिपत्तौ तत्र दकारस्य नंद्राइति द्वित्वनिषेधः स्यात् किंतु अत्र तासावादिभ्य आजादिस्तस्मादिति कर्मधार
यादेषा पंचमी तदाह। आदिभूतादचः परस्येति। भूव भूवइतीयं घपत्र धात्ववयवत्वं आधर्म्यं च न संगच्छते तथापि व्यपदेशि
वद्भावेन तद्बोध्यं। न त्विह च तदारएकाचः तत्रावयवाश्रयः भूऊऊवइति तु विति समुदायश्चतुर्थः। तथा च नियमेन यस्य कस्यचित्
द्वित्वं स्यात्। मैवं। समुदायैकाच एव द्विर्वचनस्य न्याय्यत्वात्। तस्मिन् द्विरुच्यमाने अवयवा अपि द्विरुच्यंत एव वत्सचलनेसर्वावयव
चलनवत्॥ अचेति॥ एकाचो द्वे इति प्रकरणे। हलादिः। अभ्यासस्येति। जातिपरो निर्देशः तेन आनर्तुः आदनुरित्यादौ तकारादीनां
वृत्तिः सिध्यति क्वचिदभ्यासे आदेर्हलः सत्वेमाभिज्यसवर्त्तानादेर्लोपविधानात्। सवतेरः। अत्र लोपोऽभ्यासस्येति सूत्रादभ्या

सग्रहणमनुवर्त्तते। अत्र प्राञ्चोक्तं। भवतेरिति कर्त्तृनिर्देशाद्भावकर्मणोर्नालमिति व्याख्यातं च तत्सोऽयेण। कर्त्रर्थयोः श्तिप्शपोर्निर्देशादे
त्यर्थ इति। तन्न। धातुनिर्देशमात्रे श्तिपो विधानात्। शपश्च विकरणत्वेनानर्थकत्वात्। कर्त्रर्थकेऽपरे विहितस्यापि तस्य श्तिपः शीलसामर्थ्या
देवेह प्रवृत्तेः। अन्यथा त्वदुक्तरीत्या उपसर्गात्सुनोतीति सुवतीत्यादीनामपि भावकर्मणोरप्रवृत्तौ सर्वोऽपि प्लव एव स्यात्। आपसिद्धान्तश्चा
यमिति स्पष्टमेवाकरदर्शो। प्रयुज्यते च कर्मण्यपि प्रकारं कवयः। तस्यातपत्रं बिभरांबभूवे विसावरा। लिबिभरांबभूविरे इत्यादि। एतच्च प्रक्रि
याप्रसाददूषणे मनोरमायां स्थितं। अत्र नव्याः श्तिपः शित्त्वसामर्थ्यादेवेह शपः प्रवृत्तिरिति यदुक्तं तन्न बिभर्तिम्लायतीत्यादौ विबाधादेश
प्रवृत्त्या आत्वनिवृत्त्या च शित्त्वस्य चरितार्थत्वात्। एवं चोपसर्गात्सुनोति सुवतेः ध्यायतेः संप्रसारणं चेत्यादि निर्देशादकर्त्तृवाचिन्यपि परे
शबादय इत्येव व्याख्येयं। अन्ये त्वाहुः। श्तिपाविति सूत्रे वक्ष्यमाणरचग्रंथेन सह विरोधापत्तेः। केचित्तु। शित्वात् श्तिपः सार्वधातुकत्वेन भवति
रित्यादावार्धधातुकस्येड्वलादेरिति इडागमनिवृत्त्या ब्रवीतीत्यत्र ब्रुव ईडिति ईडागमप्रवृत्त्या च शित्त्वं चरितार्थमिति व्याचख्युः। तच्चिंत्यं।
तितुत्रेत्यनेनैव निषेधादार्धधातुकत्वेऽपि श्नस्याभावात्। न च हलादेः [illegible]सयस्य साधातुकस्येति विशेषणाभावे ब्रुवो लिटि वच्यादेशे
शिपस्थलि उवक्थेत्यत्रातिप्रसंगः स्यादिति वाच्यं थलोऽत्र पित्त्वाभावात्। न च स्यानिवद्भावेन पि[illegible]तः रमनुवः शित्वेन लिंगेन क्वचि
दनुबंधकार्येष्वनल्विधाविति तन्निषेधात्। तस्मात्पूर्वोक्तरीत्यैव श्तिपः शीलसामर्थ्यादकर्त्तर्यपि शपः प्रवृत्तिरिति ग्रंथो निराकर्त्तव्य
इत्याहुः। तदपरे न क्षमंते। थलः पित्त्वाभावे असंयोगाल्लिट् किदिति कित्त्वाद्वचिस्वपीति संप्रसारणे सत्युवचिथ उवक्थेति न सि
ध्येत्। किंतु कुविथ कुवक्थेति स्यात्। तस्माद्धस्योनिवलेन थलः पित्त्वेऽभ्युपगते उवक्थेत्यादावतिप्रसंगवारणाय पितः सार्वधातुकस्य ॥८॥
ईडागम इति व्याख्यातव्यमेव। तथा ब्रवीतीत्यत्र ईडागमप्रवृत्त्याऽपि शित्त्वं चरितार्थमिति केचिद्यदुक्तं तदपि सम्यगेवेति। असिद्ध
५२ वदत्राभात्॥ चुत्करणं प्रातिपितिलाघवाय अन्यथासिद्धः। सिद्ध इति प्रयुज्यमानमनुपपन्नं तत्सामर्थ्यादसिद्धवदिति कल्पनीयं स्यात्।
यथा राजसिन्नेपुरोहितो राजायमिति प्रयोगो राजवदिति कथंचित्कल्प्यते। राजवदयं पुरोहित इत्युक्ते तु लघुप्रतिपत्तिः सर्वेषां तथा

चागत्याषत्वतुकोरसिद्ध इत्यत्रासिद्धवदिति कल्प्यते। आसंयोगाल्लिट् कित् इत्यत्रापि सिद्धवदित्यपगत्यैव कल्प्यत इति ज्ञेयं। आ भादित्यभिविधावाङ्। भाधिकारमभिव्याप्येत्यर्थः। अधिकारश्चायं। अग्रहणं समानाश्रयप्रतिपत्त्यर्थं। आ भाद्ग्रहणं विषयनिर्देशार्थं तत्राधिकारस्यावधिलाभस्तु अंगस्य प्रत्ययः परश्चेत्यादाविव व्याख्यानेनैव सिध्यति। एवं चानुदात्तोपदेशेत्यत्राभस्योपस्थाने सत्ययमर्थो भवति। एषामनुनासिकस्य लोपः स्याज्झलादौ क्ङिति परे स चासिद्धो भवति अत्र झलादि क्ङितीयदाभीयं प्राप्तौ तस्मिन्कर्त्तव्य इति। जंगहि। जंघहि। अतो हेरिति लुङ्न भवति। अनुनासिकलोपस्य हि शब्दाश्रितत्वेनासिद्धत्वात्। नन्वस्याधिकारत्वे यत्रयत्रोपस्थानं तत एवारभ्यापदाभीयं तस्मिन्नेव कर्त्तव्ये सिद्धत्वं स्यात् न तु ततः पूर्वस्मिन्नपि ततश्च घ्वसोरित्येत्त्वं पूर्वस्मिन् धित्वे कर्त्तव्ये नासिद्धं स्यादिति चेत्। न वेदयं दोषः शब्दाधिकारे अर्थाधिकारस्त्वयं ततश्चेह श्नान्नलोपस्य। धिर्निणरतः। स एव प्रतिपद्यमुपतिष्ठते तदैतत्सकलमभिप्रेत्याह इत ऊर्ध्वमिति। अत्रापि शास्त्रासिद्धत्वमेव आकरे स्थितं। तेन एधि शाधीत्यत्र स्थानिनोऽसत्त्वे तत्त्वबुद्धेरनिवर्त्तितत्वात्तन्निबंधनं हुझल्भ्यो हेर्द्धिरिति धित्वं सिध्यति। शास्त्रोक्तकार्यासिद्धत्वपक्षे तु न सिध्यति। देवदत्तस्य हन्तरि हते देवदत्तस्य जीवनं नेति न्यायेन एत्वविधिना सत्त्वबुद्धौ निवर्त्तितायां पश्चादेत्वं तु निवर्तनेऽपि धित्वकार्यस्याप्रवृत्तेरित्याहुः। समानाश्रये इति किं पपुषः। विव्युषः। लुलुवुषः। इह पाधातोः क्विन्नोल्लू अभ्यपरस्य वसोः पौ संप्रसारणं तदातो लोप इटि चेत्याल्लोपे एरनेकाच इति यणुवङौ च कर्त्तव्ये नासिद्धं। आल्लोपादीनि हि क्वसोः संप्रसारणं तु विभक्ताविति व्याश्रयत्वात्। न च बहिरंगत्वेन सिद्धत्वमस्त्विति शंक्यं। नात्रानन्तर्य इति निषेधात्। वाहऊठ्सूत्रस्य बहिरंगपरिभाषाया आभीयत्वेन आल्लोपादिषु कर्त्तव्येष्वसिद्धत्वान्न चोक्तपरिभाषाया आल्लोपादीनां च समानाश्रयत्वेनेति शंक्यं। वसोः संप्रसारणे कृते ह्यजाद्याश्रयेणाल्लोपादीनि प्रवर्त्तन्ते तेषु कर्त्तव्येषु संप्रसारणस्यासिद्धचायत्। द्विषये बहिरंगपरिभाषापि प्रवर्त्तत इति तेषां तदसत्त्वादिति दिक्। विषयलाभार्थमा भाद्ग्रहणं किं। आसायंप्रस्येवाभी

यमसिद्धं नान्यं प्रतीति यथा स्यादित्येवमर्थौ । तेन अश्नातिराग इत्यत्र रंजेश्च विणि रंजेश्च घञि च भावकरणयोरिति नलोपे कृते तस्यासि
द्धत्वाभावादत उपधाया इति वृद्धिः स्यादेव तत् । देभतुः देभुरित्यत्र श्रंथिग्रंथिदंभीति वक्ष्यमाणवचनेन लिटः कित्वान्नलो
पेप्येत्वाभ्यासलोपौ न स्यातां नलोपस्यासिद्धत्वात् । अत्राहुः । श्नसोरल्लोप इति तपरकरणाल्लिंगादाभीयासिद्धत्वमनित्यमिति ना
स्य च दोषः । तपरकरणं हि आस्तामित्यत्र आडागमस्य लोपो मा भूदित्येतदर्थं । यद्यडागमः श्नसोरल्लोपं प्रत्यासिद्धः स्यात्त्वेना सिद्धः स्या
त्तर्हि किं तेन तपरकरणेन । एवं च दंभेश्चेति वक्ष्यमाणं नापूर्ववार्तिकं किं त्वनित्यत्वबललभ्यमेवेति । चुकोचु कुशास्त्रस्य । एवमग्रेपि ।
पुस्तुदाहरणं तु दिदीये । बभूव । अत्र भाचार इंधिभवतिभ्यां चेति सूत्रं पितो लिटः कित्वार्थमिति व्याख्याय आचो ञ्णितीति वृद्धौ
क्ङिति चेति निषेध इत्युक्तं तदुपेक्षितं इग्लक्षणयोरेव गुणवृद्ध्योर्निषेध इति सिद्धांतात् । अन्यथा इहस्यानिकयोर्निषेधे लैंग
वायन इत्यत्रापि वृद्धिर्न स्यात् । न चात्र कित्वसामर्थ्यादनिग्लक्षणायामपि वृद्धेर्निषेध इति वाच्यं । यदि उत्तमेण लिच्च गुणनिषे
धेन कित्वस्य चरितार्थत्वात् । सूत्रं तु प्रत्याख्यातमेवाकरे । तथा च वार्तिकं इंधेश्छंदोविषयत्वात् भुवो वुको नित्यत्वात्ताभ्यां लि
टः कित्ववचनानर्थक्यमिति । यद्यपीह शब्दांतरप्राप्त्या वुको नित्यत्वं नास्ति तथापि कृताकृतप्रसंगित्वमात्रेणापि क्वचिन्नित्यता
स्वीक्रियत इति पक्षोप्यस्मादेव वार्तिकादवगम्यते । तेन रधेर्णिचि परामप्युपधावृद्धिं बाधित्वा नित्यत्वात् । रधिजभोरिति
नुमि कृते रंधयतीति सिद्धं । नन्वेवमपि संयोगात्परस्य लिटः कित्वार्थमिंधेश्चेत्यंशोपेक्षित एव अन्यथा समीधे दस्युहंतम
मित्यत्र इंधेर्नलोपो न स्यात् । मैवं । छंदस्युभयथेति सूत्रेण हि सार्वधातुकसंज्ञा आर्द्धधातुकसंज्ञा च विधीयते तेन सार्व ॥८॥
धातुकमपिदिति लिटो ङित्वे स्यादेव नलोप इति वार्तिकाशयात् । अत्र नव्याः । बभूवेत्यत्र द्विर्वचनेचीत्यजादेशस्य नि
षेधाद्गुणवृद्ध्योः प्रागेव वुकः प्रवृत्त्या भुवो वुको नित्यत्वादिति हेतूपन्यासो निष्प्रयोजनः शब्दांतरप्राप्त्या वुको नि

सत्वं नास्तीत्याशंक्यं कृताकृतप्रसंगित्वमात्रेण पिंकू चिन्हि स्तं स्वीक्रियत इत्याह समाधानमपि व्यर्थमेवेत्याक्षिप्य स्वयमेव समादधुः षाष्ठ
द्वित्वप्रकरणेनेतदिवाचिंकृ कृतापूर्वविप्रतिषेधः पश्चाद्द्विर्वचनं यणवायावादेशाल्लोपोपधाल्लोपणिलोपकिकिनोरुत्वमभ्यासतान यान्व द्विर्वचनेचीति
सूत्रं नारंभणीयमित्याशयेन नित्यत्वादिति हेतुरुपन्यस्त इति। द्विर्वचनेचीति सूत्रेण अजादेशस्य स्थानिवद्भावो विधीयत इति पक्षे तु द्वित्वात्प्रागे
व वृद्ध्याद्यादेशस्य स्वीकृतत्वात् आदेशानंतरमपि कृकः अवत्तिरस्तीति भुवोवुकौ नित्यत्वादित्यादिग्रंथः सम्यगेव। न चैवमपि नाम धातुष्वाप्यतीति धा
पयतीत्यत्र मपर्यंतस्य पत्वमोपररूपा सर्वनित्यत्वाट्टिलोप इति ग्रंथः कथं संगच्छते इति वाच्यं। गकत्से कार्जितिसूत्रे भाष्ये प्रत्याख्यात मित्याशयेन तद्
वत्तेः। अत एव लादय इति भाष्यत्वात्सेवन्याय्यमिति तत्रोक्तमित्यादिकं। आर्द्धधातुकस्येड्वलादेः। नेड्वशि कृतीत्यतः इडित्यनुवर्त्तमाने पुनरिड्ग्रहणं नि
षेधसंबद्धस्येटो निवृत्त्यर्थं वस्तुतस्तु समर्थानां प्रथमाद्वेत्यनुवृत्तस्य प्रत्ययस्य प्रध्यो भ्रमादिशब्दस्यानंतरं समर्थानां प्रथमे इति निवृत्तं वेतित्यनुवर्त्तत इ
ति व्याख्यानमिव नेति निवृत्तमिड़ित्यनुवर्त्तत इति व्याख्यातुं शक्यत्वादिड्ग्रहणं त्यक्तुं शक्यं तथापि स्पष्टप्रतिपत्त्यर्थं तत्स्वीकृतमिति बोध्यं। आर्ध
धातुकस्येति किं। आस्ते। शेते। वलादेः किं। एधनीयं। न तु रुदादिभ्यः सार्वधातुके इत्यनेन सार्वधातुकस्य यदीड् भवति तर्हि रुदादिभ्य एवेति निय
मादास्ते शेते इत्यत्र न भवेदित्यार्द्धधातुकस्येति व्यर्थं। न च रुदादिभ्यः सार्वधातुक एवेति विपरीतनियमाद्रोदितेत्यत्र न स्यादास्ते शेते इत्यत्र तु
स्यादिति शंक्यं। रुदविदमुषग्रहिस्वपिप्रच्छः संश्चेत्कौ ति सनोः कित्वस्य वैयर्थ्यप्रसंगात्। स उक्तं त्वारुदेः कासनोरिडागमाभावेन न कासेडिति
निषेधाप्रवृत्त्या कागस्य चौपदेशिक कित्वस्य सुस्थत्वात्। हलंताच्चेति सत्वादि सनः कित्वाच्च। तस्माद्विपरीतनियमासंभवेन आर्द्धधातुकग्र
हणं व्यर्थमेव। न तु तद्ग्रहणाभावे वलादेरिडस्यांगस्येति यदधिकृतं तद्विशेष्यं स्यात् ततश्च अडाटाविव इडागमोपि अंगस्य स्यात्। मैवं। कृतेप्यार्द्ध
धातुकग्रहणे वलाद्यार्द्धधातुकस्य यदंगं तस्येडागम इति व्याख्यानापत्त्या उक्तदोषतादवस्थ्यात्। आकृतेपि तद्ग्रहणे अंगस्य यो वलादिरंगनिमि
त्तं तस्येडिति व्याख्यानादिष्टसिद्धेश्च। तस्मादुभयथापि व्याख्याने शरणीकर्त्तव्ये आर्द्धधातुकस्येत्यस्य प्रयोग एव श्रेयान्। नन्वेवं केशवः
अंगनावत्सल मित्यत्रेट् स्यात्। स्तुतारशौ तोरित्यतो धातोरित्यनुवर्त्तनाद्धातोः परस्य न भवतीति परिहारासंभवे पिलूभ्यांप भ्यामित्यत्रेड

॥९॥ वरि एवेडागमः। विहितविशेषणेनाप्ययं वारयितुमशक्यः। स्विबेता धातुत्वं न जहतीति लूभ्यां लूभिरित्यत्र स्यामादेरिड्। तो विहितत्वानपायात्। किं
च जुगुप्सतरस्यादौ गुप्तिज्किद्भ्य इति धातोर्विहितस्य सन इड् दुर्वारः स्यात्। नन्विह धातोः परत्र विहितस्य वलादेरिति व्याख्याने लाभाय धातोरि
ति पञ्चम्यन्तमपेक्षितं तच्चातुर्लभ्यं। इड्धातोरित्यत्र धातोरिति षष्ठ्यन्तत्वाच्च याचवक्तलभिसादावपि इडागमप्रसंग इति वाच्यं। शब्दाधिकारपक्षे
स्वरितेन तत्सदृशशब्दोनुमीयत इति पञ्चम्यन्तत्वलाभात्। अस्तु वा षष्ठ्यन्तं तत्र विहितत्वं षष्ठ्यर्थ इति व्याख्यायामिष्टसिद्धेः। तस्माज्जुगुप्सितरस्य
दाविति प्रसंगवारणार्थमार्द्धधातुकस्येति ग्रहणं। केचित्तु। धातोरित्यावर्त्य धातोरित्युच्चार्य विहितो यः प्रत्ययस्तस्येडिति यद्व्याख्यायेत तदा
लूभ्यां जुगुप्सितरस्य ज्ञाति प्रसंगाभावादार्द्धधातुकस्येति व्यर्थमित्याहुः। बभूविवेति। न चात्र भ्युकः कितीति निषेधे वुगागमोपि न स्यादिति
शंक्यं। क्रादिनियमादिट्प्रसक्तेः। अनद्यतने। अतीताया रात्रेः पश्चार्धेन आगामिन्याः पूर्वार्धेन सहितो दिवसोऽद्यतन इति कालोपसर्जने च तुल्य
मित्यत्र स्थितं। आर्द्धधा। धातोरिति। धातोरेकाच इत्यतो धातोरित्यनुवर्त्तमाने पुनर्धातोरित्यधिकारसूत्रालंभादिदं लभ्यते। एतच्च तत्रैव म
नोरमायां स्पष्टं। धातोरिति विहितेति किं। लूभ्यां। जुगुप्सते। अनेकव्यवहितस्येति। सार्वधातुकादिकर्मिको विशेषणं न लंगस्येति भावः। तासस्त्योः।
सस्यार्द्धधातुकत्वात् सीत्यनुवर्त्तते। श्रेणाक्षिप्तप्रत्ययस्य सीत्यनेन विशेषणाद्यस्मिन्विधिरिति तदादिविधिस्तदिदमाह। सादाविति। एवं
रादाविति तत्राप्युक्तं। गमिष्यदिति। तासेर्लोपरत्यर्थः। अस्तिस्तु नेह संबध्यते। तसोरादिगत्ययस्यासंभवात्। लृ शेषे च। तुमुन्ण्वुलौ क्रियायां क्रि
यार्थायामिति प्रागुक्तं ततोन्यः शेष इत्याह। आसत्तिमिति चार्थमाह। स्वसामिति। हरदत्तस्त्वाह। भावस्य रिवतत्वादेव क्रियार्थायामिति। नानुवर्त्तते
एवं च शेषे चेति सूत्रं स्यजन्मिति। तस्मिंश्च। शायेष्यतर इति स्याय तर स्यादौ तुमुनालृटो बाधापत्तेः। क्त्वल्युडादि तुमुन्खल्थेषु वासरूपविधेरभावात्। आ
यकत्तापकंडोषातिसर्गप्राप्तकालेषु हत्याश्च सत्रलोटा बाधा। जस्मादिति पुनः कृत्यविधि। यिरिसादि कृदंतेषु स्यादि। इदमपि ज्ञापकमित्यन्य
दे तत्। यत्तु प्राञ्चो भविष्यतीति गम्यन्ती कुलदाहं तदापाततः। तुमुन्विषये पि लृट् सवति तुमुनाल्टण्न बाध्यत इति त्वेनतत्प्रतिपादनाय तन् ॥९॥
स्यानुपयोगात्। नहि भविष्यतीत्यत्र कर्त्तरि तुमुनः प्राप्तिरस्ति सा विहितः समानकर्त्तृकेष्विच्छ्वेति च वक्ष्यते। लृट् शेषे नावत्सूत्रकरणेपि

त विष्यतीति जनतीत्स्यांसिद्धत्वे स्यात्तांनावत् । लोट्च । विधिनिमंत्रणेत्याद्यनुवर्त्तनेत्याह । विध्यादिष्विति ॥ आशिषि लिङ्लोटौ ॥ न
नु विध्यादिसूत्रार्थमाशिषीति तावदावश्यकं लिङ्लोटावपिहैव विधेयौ । विध्यादिसूत्रे आशीर्ग्रहणे हि सति लोडित्यादिनास्य विषये पर
त्वाद्बाधः स्यात् । सिद्धांते तु परत्वादेष विधिः अस्मै लोडित्यादेर्बाधक इति महान्विशेष इति ॥ तुह्योस्तातङ् ॥ यद्यपीति ह्योस्तातङितावदुक्ते
शक्यं तथापि लाघवाभावादतिप्रसंगवारणाय हि शब्दसाहचर्याश्रयणे लोट इत्यनुवर्त्तनेवा गौरवात्तुह्योरित्युक्तं । लोटो लङ्वत् ॥ लो
ट इत्युपमेये षष्ठीदर्शनात् षष्ठ्यंतादेव वतिरित्यादाह । तेनेति । आडुटौ तु नातिदिश्येते । न हि तौ लङः क्रियेते किंतु लङि अंगस्येति भावः । नन्वे
वमपि यां तुर्वां तुरित्यस्य लङः शाकटायनस्यैवेति जुस् स्यात् ॥ जुकृतु विदन्तुरित्यस्य च तु सिजभ्यस्तेति जुस् स्यात् । अत्राहुः । विदो लटो वेति वाग्र
हणमिहानुवर्त्यव्यवस्थितविभाषाश्रयणान्न जुस् । यद्वा । लङः शाकटायनस्यैवेति सूत्रे नित्यं ङितः इत्यस्य तो ङित इत्यनुवृत्त्यैव सिद्धे लङ्
ग्रहणमिति स्वीक्रियते लुङः सिचा लृङः स्यप्रत्ययेन व्यवधानात् । लिङः तु झेर्जुसिति जुसो विहितत्वाच्च ङितस्तस्य लङ्येव पर्यवसानात् त
ततो लङ्ग्रहणं विसृज्यते नियमार्थायै लङ्. वयोलङ् तस्यैव झेर्जुसिति जुसो विहितत्वाच्च ङितस्तस्य लङ्येव पर्यवसानात् ततो ङ
रित्यत्र सिजभ्यस्तेति नित्यं जुसं बाधित्वा परत्वाच्छाकटायनस्येति विकल्पप्रसंगात्तस्माल्लङ्ग्रहणं शाकटायनसूत्रे कर्तव्यमेव न तु न
दितीर्व्यते । न च आन इति सूत्रेण अदुरित्यत्र नित्यं जुस् स्यादिति वाच्यं । तस्य नियमार्थत्वेन विध्यर्थत्वायोगात् । अन्यथाभवन्नि
त्यत्र सिजभ्यस्तेति जुस् दुर्वार एव स्यादिति नव्याः । यदि त्विह आन इति सूत्रस्य च भावस्य विध्यर्थता नियमार्थता च व्याख्यायेत तदा तूउ
क्तदोषाभावात् यद्वेति समाधानमपि सम्यगेव । शाकटायनस्येति जुसो वैकल्पिकत्वात्तदभावे पक्षे पुनः प्रसंगाविज्ञानात् सिजभ्य
भ्यस्तेति जुसि स्वीकृते तु सुतरां सम्यगेव परं तु जुकृतु विंदांत्वित्यत्र जुस्वारणाय व्यवस्थितविभाषात्वाश्रयणीयैवेति दिक् । सकारां
तस्येति । ङिल्लकारोत्तमसकारस्येति प्राचो व्याख्यानं त्वयुक्तं । त्रपासमित्यादावतिप्रसंगः स्यादिति भावः । ङित उत्तमस्येति । ङिङ्
ल्लकारोत्तमस्येत्यर्थः । तेन अभवाव अभवाम इत्यादौ नातिप्रसंगः । सोपिच्चेति ॥ एवं चापित्त्वेनानुदात्तस्य सिपः स्थाने यो हि स आदेशः स तु स्या

त्त्वबोधिनी

॥१०॥

नेंतरतमः स्वसुदात्तो न भवति। जश्[illegible] हि शायूराभ्यां तु हि श्रुतं। भवतादिति। लुगपेक्षया परत्वादेः स्यात् तङः। अंतरंगानेव लुग्बाध्यते न तु परमिति भा-
वः। सपित्त्वेति। सहितित ङ्ब्देन यस्योऽभिमानः सपरामिश्यत इत्यादुः। इतश्चा इतश्च लोप इति सत्रा परस्मैपदेष्वित्यनुवर्त्ते मध्ये कवचनात्तया वि-
परिणमय्य इत्यनेन विशेष्यते तदाह। परस्मैपदमिकारांतं यत्तस्येति। आचात्तु परस्मैपदेष्विकारस्य लोप इत्युक्ते तदयुक्तं। भवेदित्यादावतिव्याप्तेः।
न च तोयेय इत्यत्र ईषदीर्घादिरस्तु एवं च वनोक्त्यातिव्याप्तिरितश्चेति तत्परकरणादत एव अबो सवातीत्यादिदावपि न दोष इति चेन्न। मैवं। रुदेस्व-
पि अरुदितामित्यादौ दोषध्रौव्यादिति मनोरमायां स्थितं। विधिनिमंत्रणा॥ द्योत्येषु वाच्येषु वेति। पक्षद्वयस्यापयाकरे स्थितत्वादिति भावः॥
तत्राद्ये त्विचासमुपपत्तिः। विध्यादीनां प्रत्ययार्थत्वमनुचितं। तथा हि स तिकर्त्रादीनामर्थानां लकारांतरेणैवोक्तार्थानां विध्यादयो यदि बाधकाः
स्युस्तया त्वलिङः कर्त्राद्यभिधायकत्वं न स्यात् ततश्च प्रथमादिवचनेन स्यातां शबादयश्च न स्युः पुरुषव्यवस्था च न स्यात्। आपिपिहित लडायुक्तस्ते तौ
यादिविरहश्च न सिध्येदिति। द्वितीये त्विष्टमुपपत्तिः। विध्यादिभिः कर्त्रादयो न बाध्यंते परस्परविरोधाभावात्। तथा च लः कर्मणि चेत्यत्र लः इति
बहुवचननिर्देशो न सर्वलकाराणां संग्रहात्। लिङादीनामपि कर्त्रादयो र्थास्तिष्ठेयुः। किंच। कर्त्रादयोपि निरवकाशाः। न च लडादयो ऽवकाशाः।
न्यायसाम्येन विध्यादिवद्वर्तमानत्वभूतत्वादेरपि तत्तल्लकारवाच्यत्वात्। न चैवं पचतीत्यादौ धात्वर्थं प्रति वर्तमानत्वादेः प्रत्ययार्थतया
विशेष्यत्वं स्यात्। तथा चैककर्तृका वर्तमाना पचिक्रियेत्यादिशाब्दबोधवर्णनमयुक्तं स्यादिति वाच्यं। प्रत्ययार्थतया विशेष्यत्वापादनस्य
कर्त्रादावपि तुल्यत्वात्। न तु प्रत्ययार्थः प्रधानं प्रकृत्यर्थो विशेषणमित्यौत्सर्गिकमाख्याते त्यज्यते। भावप्रधानमाख्यातमिति सिद्धांताद्वि-
रोधादिति चेन्न हि तत एव नोक्तदोष इति दिक्। प्रवर्त्तनायामिति। प्रवर्त्तनात्वस्य विध्यादिषु चतुर्ष्वनुस्यूतत्वादिति भावः। अत्र वदंति॥
प्रवृत्तिः प्रवर्त्तना वोभयमपि व्यापारः। स च धात्वर्थः फलव्यापारयोर्द्वयोर्वा धात्वर्थत्वस्वीकारात्तदाश्रयस्तु लकारार्थः। व्यापारत्वेन प्रवर्त्तनाया
धात्वर्थेपि प्रवर्त्तनात्वेन प्रवर्त्तनात्वलिङ्त्वादिरूपेण लकारवाच्या द्योत्या वेति पक्षद्वया प्रवृत्तिः पुरुषनिष्ठा आर्थी भावनेत्युच्यते।
प्रवर्त्तना तु विधिर्मुरियं तनीत्यनुभवाल्लिङादिनिष्ठा शाब्दी भावनेत्युच्यते। वदेद एव लिङादिनिष्ठा व्यापकुरुषाभावाद्बोके तु पुरुषादिनिष्ठेति
केचिदभ्युपगच्छंति। प्रवर्त्तनाया अस्याः पुरुषप्रवृत्तिरेव भाव्या पुरुषप्रवृत्तस्तु सजनदानादि साध्यं। एवं च धातूपात्तव्यापारस्य वि

॥१०॥

षयविषयिभावेन तद्बोधान्वये तात्पर्यग्राहकाः। लिङादय इति द्योतकतापक्ष एव ज्यायान्। लिङ्त्वादिरूपेण लकारस्य प्रवर्त्तमानायाश्च व्युत्पत्त्यन्तरकल्प
नेगौरवादेवं णिच्यपि द्रष्टव्यं। अयं तु विशेषः। णिप्रत्ययद्योत्या प्रेरणा सर्वस्मिन्नपि मते पुरुषादिनिष्ठैव। न तु णि[illegible]निष्ठा। लिङादिद्योत्या तु मतभेदेन लिङ्
निष्ठा पुरुषनिष्ठा वेति। स्यादेतत्। लिङादिद्योत्याया प्रवर्त्तनाया लोके पुरुषनिष्ठेति मते पाचयत्योदनं देवदत्तेन यज्ञदत्त इतिवत् पचेदोदनं देवदत्तो
न यज्ञदत्त इति प्रयोगः स्यात्। प्रवृत्त्याश्रयः प्रवर्त्तनाश्रयश्च लकारेणोक्त इति कर्त्तरि तृतीया न भवति। किंतु प्रथमैवेति चेन्न हि ओदनं देवदत्ताय य
ज्ञदत्तः पचेदिति प्रयोगः स्यात्। अत्राहुः। पुरुषनिष्ठेति मते प्रवर्त्तना लिङादिवाच्यैव न तु धातुवाच्या। तथा च लिङुपात्तव्यापाराश्रयस्य पुरुषस्य कर्त्तृत्वान्नानु
क्तदोषः। देवदत्तेन पाचयति यज्ञदत्त इत्यादौ तु णिजन्तस्य धातुत्वात्तदुपात्तव्यापाराश्रयत्वेन प्रयोज्यप्रयोजकयोरपि कर्त्तृत्वाल्लकारेणानुक्ते प्रयोज्ये
कर्त्तरि तृतीयेति वैषम्यमिति। कौस्तुभादौ तु हेतुमति चेति सूत्रे प्रयोजकव्यापारस्य णिज्वाच्यत्वपक्ष एव मुख्यत्वेन स्थापितः। व्यापारद्वयस्यापि णि
लभ्यस्यार्थत्वे तु असीत्यस्य णिजर्थविशेषकत्वे आसिसावयतीति प्रकृत्यर्थविशेषकत्वे तूपसर्गात्सुनोतीति षत्वमसिषावयतीति सिद्धान्तस्य स्यादस्य
संगापनेरिति। तथा च गतिबुद्धीति सूत्रे अणिकर्त्तेति विशेषणमव्यावर्त्तकं स्यात्। त्वन्मते प्रयोजकव्यापारस्यापि णिजर्थत्वेन प्रयोजकस्याप्यणौ
कर्त्तृत्वादिति दिक्। प्रार्थनं याच्ञा। कविदिति। ज्ञापनफलं तु वक्ष्यमाणेत्यादौ टिदुगित्तुलक्षणङीबभाव इति टिड्ढेति सूत्रोक्तं त्यादिस्यादौ तु उतो वृद्धिर्लुकि
हलीति न प्रवर्त्तते। साध्येऽपि पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानाद्विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधादित्यादौ वक्ष्यमाणतयो यासुटो ङित्त्वं न ज्ञा
पकमित्यपरितोषादाह। शानचः शित्त्वमिति। सुट् तिथोः। तकारादिकारस्तु उच्चारणार्थः। लिङः सलोपो। रुदादिभ्य इति सूत्रात् सार्वधातुक इत्यनुवर्त्तते।
सेति लुप्तषष्ठीकमनन्त्यस्येत्यनेन विशेष्यते तदाह। सार्वधातुकलिङोऽनन्त्यस्येति। सकारद्वयस्यापीति। अवयवावयवोऽपि समुदायं प्रत्यवयव इ
त्याश्रयणात् सुटोऽपि लिङः सकारत्वादिति भावः। आशीर्लिङीति। स्नुयास्तामित्यादौ। ननु सुटि कृते अनचि चेति द्वित्वस्यासिद्धत्वात्ततः प्रागेव स्कोरि
ति यासुट्सकारो लुप्यते। सलिपरयोः संयोगस्तदादित्वात्। तथा चैकसकारं रूपं तुल्यं। सुडन्ता वा यासुटः सकारस्य द्वित्वे कृते तु सुटि स्कोरिति स
लोपात् सुट एव सकारस्य द्वित्वे द्विसकारकमपि रूपं तुल्यमेवेति सुटो विधानं व्यर्थमिति परितोषादाह। स्फुटतरं चेति। एधिषीष्टेत्यादाविति
भावः। मध्येऽपवादन्यायेनेति। रुदादिभ्य इति सूत्रात् सार्वधातुक इत्यनुवृत्तावयं न्यायः प्रवर्त्तत इति भावः। अंतरंगत्वादिति। प्रत्ययमात्रा

पेक्षत्वात्। अतो यणः पूर्वांगत्वात् प्रकृतिप्रत्ययोस्तु यसापेक्षत्वेन बहिरंगतेति भावः। नन्वपदांताकारस्य उस आश्रयणात्पररूपस्यपुन्नयसापे
क्षत्वमस्त्येवेति चेन्नैवं। अनेकाश्रयणेपि प्रत्ययमात्राश्रयतया प्रकृतेरनाश्रयणात्। व्याख्येयमिति। एतच्च विप्रतिषेधसूत्रे भाष्ये स्पष्टं। आर्ध
धातुकसंज्ञेति। उऊः शाकटायनस्यैवेत्यत एवकारोनुवर्त्तनीयः। अन्यथा एकसंज्ञाधिकारबहिर्भूतेन सार्वधातुकसंज्ञापि स्यात्तत्रयपक्षे र
वादिः स्यात्। क्ङिति चेति। ङिच्चेनैव गुणवृद्धिप्रतिषेधे सिद्धे किद्ग्रहणं इज्यादिस्यादौ संप्रसारणार्थं जागर्यादिस्यत्र गुणार्थं च। जागर्तेर्गुणो हि ङि
तिपर्युदस्यतो ङित्वं चेह विशेषविहितत्वेन बाध्यते सलोप इति। झल्परसंयोगादित्वेन यासुटः सस्य लोपः सुटः स्कूपदांतसंयोगादित्वे नेति भाव इ
तिमनोरमायां स्थितं। तदसंबद्धमिति मचा अत्र निष्कर्षमाहुः। स्तूयास्तां। स्तूयास्तां। स्तूयास्तेत्यत्र झल्परसंयोगादित्वेन यासुटः सस्य लोपः स्तूया
दित्यत्र तु सुट इव यासुटोपि सस्य लोपः पदांतसंयोगादित्वे नैव। अन्यथा झल्परसंयोगादिलोपस्य संयोगांतलोपबाधकत्वादिति। क्ङिन्निमि
त्त इति। क्ङिति ङिति परे इको गुणवृद्धी न स्त इति न व्याख्यातं। छिन्नं भिन्नमित्यत्र लघूपधगुणस्यानिषेधप्रसंगात्। नबारंससामर्थ्यं ज्ञाबयं यितंस्त
तमिस्यादावव्यवहिते क्ङिति चरितार्थत्वादिति भावः। अन्ये तु क्ङितीति सप्तम्यग्रहणात्सत्यपेन संनिधापितस्यांगस्य क्ङिति पर इति व्याख्याने तु छि
न्नभिस्यादिनु च सिध्यत्येव। नचैवं भूवा। स्वामइत्यादौ वृद्धिप्रसंग इति वाच्यं। अंतरंगगुणेऽपि बहिरंगस्य निषेधस्याप्रवृत्तेरिस्याङ्ः।
क्ङिति चेति सूत्रे चर्त्वेन गकारोपि प्रश्लिष्यत इत्याशयेन। गिक्ङिन्ङिन्निमित्त इत्युक्तं। गितिकिं। ग्लाजिस्थश्च क्स्नुः। जिष्णुः। क्ङितीत्यस्मि
न्स्थास्नुरित्यत्र घुमास्थेतीत्वं प्रसज्येत। ८। नच क्स्नो गित्वेपि स्थास्नुरित्यत्र इत्वनिषेधो न स्यात् ग्लाजिस्थश्चेति चकाराद् भुवश्च क्स्नु
स्विती तस्यौकारादिति वाच्यं। भूकः क्ङितीत्यत्र चर्त्वेन गकारप्रश्लिष्य गिति क्ङितोरिण्न स्यादिति व्याख्यानात्। न चैवं चर्त्वस्यासिद्धत्वा
या भूकः क्ङितीत्यत्र विसर्जनीयो न लभ्यत इति हशि चेत्युत्वमेव स्यादिति वाच्यं। सौत्रत्वान्न मुनत्रयवचनेति योगविभागेन
सिद्धत्वाभावाद्वारुत्वसिद्धेः। वामनस्तु ग्लाजिस्थ इति सूत्रे स्थाः आ इति प्रश्लेषात्स्थास्नुरित्यत्र घुमास्थेतीत्वं नत्वविषया
नीति गकारप्रश्लेषाभावान्न भूकः क्ङितीत्यत्र चर्त्वस्यासिद्धत्वाभावसमर्थनक्लेश इत्याह। इग्लक्षणे इति। इकर

॥११॥

त्सेवं~~[illegible]~~नोविहिते इत्यर्थः । रग्लक्षणे इति किं । लैङ्गवायनः । लिगोर्नडादित्वात्फक् । इत्यादिह ड्वरो गुणस्य न वस्कृतत्या इक्कार रूस्थानिकत्वेपि न नि
षेधः । न च क इक्कऋपि किति चेत्यारं संसामर्थ्यान्नुञत्रनिषेधोन स्वेदिति शंक्यं । तांग्रायनादौ तस्य चरितार्थत्वात् । ऋयादिति । इह स्कारि तिलो
पस्यासिद्धत्वान्नेकारस्य संयोगांतलोपः । आह । पदांतस्य संयोगादिति लोपेनानवकाशेन बाध्यते । न चैवमपि संयोगादिलोपस्य पूर्वत्रासि
द्धमित्यसिद्धत्वाद्धल्ङ्यादिलोपः स्यात्पदांते संयोगादिलोपस्य पूर्वत्रासिद्धमित्यसिद्धत्वाद्धल्ङ्यादिलोपः स्यात्पदांते संयोगादिलोपस्येत्त दूरु
डिस्यादौ सावकाशत्वादिति चेदत्राहुः । सुट्यासुटोः समस्तास्यौ विशिष्टस्यैव प्रत्ययत्वेनापृक्तत्वाभावात् हल्ङ्यादयः प्रवृत्तेः परत्वाभावाओ
ऋदोषशंकैव नास्तीति । सर्वलकारापवाद इति । माङ्क्लिस्यादौ निषेधार्थकमात्राद्बीन्य एव नतु माङ्के ङित्याहुः । च्लि लुङि । इकार उच्चारणार्थ इति
मनोरमा न च मंत्रे घसेति सूत्रे लेरिति स्थाने ल इत्युच्यमाने । च्लेसिन्न स्यापि लकारस्य लुक् स्यादिति शंक्यं । गातिस्थेति सूत्रात् सिच इत्यनु
वर्त्यसिचः स्थानिनः स्थान्यर्हस्य लस्य लुगिति व्याख्यायामतिप्रसंगाभावाद्विभाषानुवृत्तेर्लुको वैकल्पिकतया छंदसि रूपांतरस्यानापाद
तायां च लिज्ञनुवृत्तिं विनापि नातिप्रसंग इत्याहुः । शाबाद्यपवाद इति । आदिशब्दात् चत्र ऋणायुक्तानां श्यन्नादीनां ग्रहणं । इत्थाविति । तत्र इदित्वप्र
योजनं अस्तोत्यत्र अनिदितामित्युपधालोपाभावः । गातिस्था । इह व्यवहितोपि लुगनुवर्तते न लुश्लुः व्याख्यानादित्याशयेनाह । लुगिति । गा
पाविति । गातातिभिः पाविकरणश्लून्यस्य निर्देशात् लुग्विकरण इणादेशो ग्रह्यन्तो विकरणालुग्विकरणयोः लुग्विकरणस्य ग्रहणमिति
परिभाषया पिबतिर्गृह्यते न तु पातिरित्यर्थः । भुसुवोस्तिङि । षूङ् प्राणिगर्भविमोचने । सवैसुवतिसूयत्योरूस्य न ग्रहणं । तिङो विकरणेन व्यव
धानात् । अस्तिसिचोपृक्ते । अत्र प्राञ्चः । अस्तिश्च सिच्चेति समाहारे द्वंद्वे अस्तिसिचत स्मादिति विग्रहं मत्वा अस्तिसिच्च परस्येति व्याख्येयस्त्ववि
त्वं । तत्र समासांतस्य अनित्यात अर्थेण द्वंद्वाच्चुदषहांतादिति प्राप्तस्य टचः परिहारेपि समुत्राङ्क्रोर्घ इति निर्देशाद्व्यावर्तमित्येतद नित्य
मित्याश्रित्य सिचद्वंद्वस्य परत्व समर्थनेपि अस्तेर्भूरिति स्तुतावस्य स्थानिवत्वेनास्तितया तत्राघृक्तस्य हल इडागमस्य दुर्वरित्वात् । तथा गाति

स्थाघुपाभ्यः सिचो लुक्यपि स्थानिवद्भावेन सिचः परत्वान्न पायादगोदस्थादन्तदित्यादौ अतिप्रसंगाद्यतदेतद्धुनयन्व्याचष्टे। सिचास्त्वेति। सौत्रं च
भवत्वमिति। तेनात्र कुत्वजश्त्वे न भवत इति भावः। विद्यमानादिति। सिचोस्तेश्च विद्यमानविशेषणेन लुप्ता। सिचः तन्त्रत्वाद स्तेश्च नेति भावः। भा
ष्यकारास्त्वाहुः। अस्तिसिचोऽपृक्त इति द्विसकारकोयं निर्देश इति। अत्र माधवः। अस् सस् इति समुदायस्य धातुतया इक्श्तिपौ धातुनिर्देश इति श्ति
प्प्रत्ययो न स्यादिति। अत्र वदन्ति। द्विसकारकनिर्देशे श्तिप् न स्यात् स्यादिति यदुक्तं तन्न सोक्तिमात्रं। इत्थं हि भाष्याशयः। सिच इत्यस्य स्थाने तरं सकार
प्रश्लिष्यते न तु श्तिपः प्राक्। अत एव अस्तिसिचोऽपृक्त इति द्विसकारकोयं निर्देश इत्युक्तं भाष्ये। अन्यथा अस्तीति निर्देशो द्विसकारक इत्येव ब्रूयात्। एवं
वसांतादस्तेः सांतात्सिचः इति वा द्यौनिर्बाध एव द्वितीयश्च सकारो लुप्यते संयोगांतस्य पदांतस्येति व्याख्यानात्। व्यपदेशिवद्भावेन पदांतत्वात्। द्विती
यसकारस्यानवसंयोगांतलोपस्यासिद्धत्वाद् ततो रोरि स्फुलंडुलंसमिति वाच्यं। संयोगांतलोपो रोरुत्वे इति वा त्रिकेनासिद्धत्वनिषेधात्। संयोगांतय
त्वदमिति व्याख्याने तु नेह संयोगांतलोपः। किंतु सकारद्वयस्यापि रुत्वे कृते अतो रोरित्यनेन एक एव उकारो न निष्पत्ति विधेयविशेषणस्यैकत्वस्यप
श्चैकवाद्विवक्षितत्वात्। न च स्थानिभेदेन उकारद्वये सत्यपि न क्षतिः सवर्णदीर्घानंतरमाद्गुणे कृसातसमीहि रूपसिद्धिरिति वाच्यं। एकपदाश्रयत्वेनां
तरंगत्वाद्गुणे पश्चाद्वारे त्राप्रहत्त्या सिचोऽपृक्त इति रूपासिद्धेः। तस्मादुक्तरीत्या एक एवोकार इति स्वीकर्तव्यम् अत एव विधेयकर्मगते कत्वस्यावि
वक्षितत्वात्। एकः पूर्वपरयोरित्यत्र एकग्रहणं भाष्याद्येप्रत्याख्यातं। नन्वतिपरयोरुः सवतः परो न भवति। अतः परस्य अतिपरत्वेन भवतीति र
द्वयस्थाने कथमुकारः स्यान्मैवं। रोरिति जातिपरनिर्देशेनातःपरत्वस्य पूर्वत्वस्य च संभवात्। न चैवमपि परत्वाद्दुशिश्वेति प्रथमस्यैव रोरुः स्यादिति वा
च्यं। रुत्वस्यासिद्धतया हशपरत्वाभावात्। न वा अत्र यासिद्धत्वमिति वाच्यं। स्थान्यंशे तथात्वेपि निमित्तस्य तहशांशे तदसंभवात्। यद्यपि सजातेरेक
त्वात् उसयोरपि एक एव रुर्भवतीति व्याख्यायां नायं क्लेशस्तथापि रुत्वविधौ पदस्येत्यनुवर्त्तनादेकपदांतेत्वं न संभवति द्वितीयसकारस्य पदस्य
देत्वादित्याहुः। अपृक्तस्य हल इति। अपृक्तसार्वधातुकस्येति प्राचोक्तं तु अयुक्तं। एधिषीत्यादावतिव्याप्तेः। सार्वधातुकग्रहणं व्यावर्त्यलाभाच्च। अ
तः। सिज्ग्रहणमनुवर्त्तते स्ते उसीति वा सिच आकारात्परस्य सेर्जुस्। तत्र प्रत्ययलक्षणेन सिचः परत्वमाकाज्जुस्त्या एवं। स्थिते पक्षे तमाह।
सिलुकीति। गातिस्थेति सूत्रेणेत्यर्थः। सिजस्तस्तेति पूर्वसूत्रे णो वा दंताद पिसेः सिद्धे नियमार्थमिदमित्याह। आदंतादेवेति। हेतुमद्भावादि

23

ती। अत्र केचित्। आङि शब्देनाशंसावचनं गृह्यत इति व्याख्याय आशंसावचने लिङ्। योग्यान्निमित्तं तु चापि प्रक्रियातिपत्तौ भविष्यति लङ्। गुरुश्चेदा
यास्यत् आशंसेऽहं चैत्रोऽध्यास्य साधु स्यादिति। अन्ये तु लृङ् विष्यति मर्यादेत्यादिना भविष्यति सुप्रत्ययो लिङ् विहितस्तन्निमित्त एव क्रियातिपत्तौ लृङ् भ
वति नान्यत्रेत्याहुः। लिङ् निमित्तमिति। हेतुहेतुमतोर्लिङ्। इच्छार्थेषु लिङ्लोटावित्यादिलकारार्थस्य क्रियायां स्फुटो भविष्यति। अनिष्पत्ताविति। सुवृष्टि
श्चेदभविष्यत् सुभिक्षमभविष्यदिति तत्रैवोदाहरिष्यति। भूतेवेति। न परतो नापि पूर्वं व्यवहिता इत्यर्थः। अतएव। छंदसि परेऽपि। व्यवहिताश्च
तिसृत्रिति। आ नि लोट्। निलोडित्येव वक्तव्ये आनिग्रहणं आगमशास्त्रस्यानित्यत्वज्ञापयितुं तेन स्नागरं तर्तुकामस्य ज्ञानात्तो भिस्यादि सिद्ध्य
ति। लोट् ग्रहणं स्पष्टप्रतिपत्त्यर्थं। न च प्रकृत्याव पायेषातेन प्रवपाणि मांसानीत्यत्रापि नित्यं णत्वं स्यादिति वाच्यं। उपसर्गग्रहणादर्थवद्ग्रहणाच्चा
स्याप्रवृत्तेः। ओ। तिपदिकांतेवेकृत्य पिकुणत्वं तुरुष्यत एव। उरःप्रवेति। उरः परस्य णत्वं नेति केचिदिति प्राचोक्तं तदयुक्तं। एवं हि सिद्धांतेन तस्यानन्तेषाक
र विरुद्धमिति भावः। अंतरिति। आनश्चोपसर्गवत्संज्ञा। टापू। अंतर्द्धिरिति। उपसर्गे घोः किः। गच्छद्वदस्याङ् विधौ उपसर्गत्वमुपसंख्याय तेना
प्रकृतानुपयोगादुपेक्षितं। सिद्धादिपाठेन प्रस्तास्प इति निपातने न वागतार्थत्वाच्च। शेषे विभाषा। नेर्गदनदेति सूत्रोक्तापेक्षया शेष इत्याहु
गदनदादेरन्यस्मिन्निति तु उपदेश इति प्रनिचकार। प्रनिचरकदेस्यचापि निषेधोऽयथास्यात्। आषांतेति किं। प्रनिपिनष्टि। उपदेशग्रहणात् प्र
ति। चक्षिङः ख्याञ् आ निचक्षते स्यानापि निषेधः। शेषग्रहणं स्पष्टार्थं। णत्वशास्त्रे संहितायामित्यधिकारात् संहितायामविवक्षितायां णत्वाभावः
संहितायां तु णत्वमिति विकल्पसिद्धेः किमनेन नाव भाषाग्रहणेनेत्याशंकानेकार्यत्याह। इहोपसर्गाणामित्यादिना। एकपदत्वेनैव सिद्धेर्नमा
सग्रहणं गोबलीवर्दन्यायेनेति बोध्यं। काव्ये चेति। सा संहिता विवक्षाधीना न त्वस्य च त्रैनियमोऽयमित्यर्थः। उपलक्षणमिति। एवं च सत्ताद्यर्थनिर्देशं कृत
तो भीमसेनस्यापि संमतं। भिद्यत्र कुर्द खुर्द गुर्द गुद क्रीडायामेवेत्येवकारात् ज्ञापकः। सेधते गताविति सूत्रे गताविस्येन तदापि सिध गत्यामित्यस्यार्थनि
र्देशस्योपलक्षणत्व एव घटते नान्यथेति दिक्। उत्स घतरित्याद्यर्थादिति। एवं च उपसर्गं विनाप्युत्सत्यर्थप्रतीतेरुद्घतीत्यादौ प्रयुज्यमानोऽप्यु
पसर्गः द्योतक एव न तु वाचक इति भावः। उपसर्गेण धात्वर्थ इति। अत एवामरेणाप्युक्तं। स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः। अ
नुलापो मुहुर्भाषा विलापः परिदेवनं। विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः। सुप्रलापः सुवचनमपलापस्तु निह्नव इति॥ टित आत्म
नेपदानां टेरे। न तु शानचोऽपि लस्यानिकासनेपदत्वात् सायमानो यजमान इत्यत्र टेरेत्वेन भवितव्यमिति चेदत्राहुः। प्रकृतैस्तिबादिभिरात्म

तत्त्वबोधिनी
॥१२॥

नेपदानांविशेषणान्नदोषः। एवंतुटितस्ताउः। टेरेदुत्सेबवकुमुचितमिति। थासःसे॥ एकारोच्चारणंतापनार्थमितिलिप्स्तास्तयोरित्यत्रस्फुटीभविष्यति॥
आतोगुणइति। इटएलेकृते आद्गुणंबाधित्वावृद्धौप्राप्तायां अनेनपररूपमित्यर्थः। इजादेश्च॥ धातोरेकाचस्त्यमतो धातुग्रहणंकास्प्रत्ययादित्यत आम्
लिटीतिचानुवर्त्ततइत्याह॥ इजादिर्योधातुरित्यादि। गुरुमान्किं। इयेष। ऋस्थानच्छ्र आमः। लक्षणप्रतिपदोक्तपरिभाषयाप्रत्ययग्रहणपरिभाषया।
चनेह। आस। आसतुः। परस्यलुगिति। मंत्रेघसेतिसूत्राल्लेरित्यनुवर्त्य तत्रलुगितिकाशिकादौव्याख्यातंतदत्रोपेक्षितं। व्यावर्त्यालाभात्। तिङश्चप
वादत्वात्लावस्थायामेवायंलुक्। तेन आमंतस्यातिङंतत्वादेवनादिपदात्परत्वेपि तिङ्ङतिङइतिननिघातः। आमंतात्परस्यनिघातश्च। नचआतिङंतत्वे
पदत्वाभावादामंतात्परस्यनिघातोनसिध्यतीतिशंक्यं। लिटः कृत्वाल्लोपस्य प्रत्ययलक्षणेन कृदंततयाप्रातिपदिकत्वेसोरुत्पत्तौवामंतस्याप्यव्ययात्सुपो
लुक्यपिप्रत्ययलक्षणेनसुबंततयापदत्वात्। कृञ्चानुप्रयुज्यतेलिटि। कथंतर्हि तंपातयांप्रथममासपपातपश्चात्। प्रभ्रंसयांयोनहुषंचकारेति
प्रमादएवायंनचविपरीतप्रयोगनिवृत्तिमात्रेसूत्रस्यतात्पर्यात्प्रत्यासत्त्यायोगोव्यवहितोपिनदुष्यतीतिवाच्यं। विपर्यासनिवृत्त्यर्थंव्यवहितनि
वृत्त्यर्थंचेतिवा किंचिद्विरोधात्। अन्यस्यापीति। यदिकृञ्शब्देनएकएवधातुर्गृह्येततदाधात्वंतरस्यप्राप्त्यभावादस्त्यपवदितिसूत्रेअत्रा
नुप्रयुज्यमानस्यकृञइतिविशेषणंव्यर्थंस्यादितिभावः। नचाकृञस्तेश्चेतिचकारेणैवानुप्रयोगोन्यस्यापीतिज्ञायतइतिशक्यं। धातोरामस्यात्।
अनुप्रयुज्यतेचलिट्परः कृञ्नस्त्यर्थसमर्पकतयातस्योपक्षीणत्वात्। अभेदान्वयइतिसामान्यविशेषयोरभेदान्वयोलोकसिद्धइतिभावः।
एवंचेधांचक्रे एधांबभूवेत्यादौएककर्तृकाश्चतानघटनपरोक्षाकृष्टिभिन्नाक्रियेतितुल्योबोधः। ननुकरोतिः सकर्मकः भवतिस्त्वकर्मक
इतिकथमिहतुल्यतेतिचेदत्राहुः। यदाहिकरोतिरुत्पादनार्थकःस्यात्तंचेणाप्रयुज्यतेघटंचक्रेऽरण्यंचकारेतितदानियमेनसकर्मकत्वं। यदात
क्रियांतरसमानाधिकरणःकरोतिःप्रयुज्यतेऽनुहवांचकारेत्यादौतदायत्समानाधिकरणःकरोतिस्तस्यसकर्मकाकर्मकत्वाभ्यांस्वयमपित
थाभावंभजते। एवंचास्मार्य्यामप्यत्र सामानाधिकरण्येनक्वचित्सकर्मकत्वंबोध्यमतएवानुप्रयुज्यमानाद्भवतेः सकर्मकत्वात्कर्मणिलिट्। ॥१२॥
तथाचमाघः। तस्यातपत्रंबिभरांबभूवे। श्रीहर्षश्च। तपस्तुपत्रावलिभेदसौष्ठवराविनापराणिबिभरांबभूवविरेजुरिति। अत्रेदमवधेयम्। अनुहवां
चकारनुहवांबभूवेत्यादौकेवलोहोमोगम्यते। इतरत्रतुहोमःक्रियेतिबोधः फलेतुनकश्चिद्विशेषः। घटमाश्रयकृत्यंघटमानयेत्यत्रयथा। एवं
चाम्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्यफलमिति अनन्वितेति। संपद्यर्थस्याम्रकृत्सर्वस्यचाभेदान्वयेनसंभवति।

25

उभयोरपि विशेषरूपत्वादिति भावः। आम्प्रत्ययवत्। आम्प्रत्ययां तस्यात्मनेपदाभावादाह। अतद्गुण इति। आम्प्रकृत्या तुल्यमनुप्रयुज्यमा
नादिति तृतीयान्तादिति। अनुप्रयोगस्येत्यत्र कर्मणि घञिति भावः। अनुदात्तङित इत्यस्यतोनुवर्त्तनादाह। आत्मनेपदस्यादिति। एवमप्रधानस्य वि
धानेपि प्रधानस्य निवारणमनेनैव सूत्रेण न संभवतीत्यत आह। वाक्यभेदेनेति। आम्प्रत्ययवदिति वचनमेव। अन्यथा पूर्वव
दित्यनुपचस्यैवानुप्रयोगस्य लभेः आमः पूर्वेणातुल्यमित्यर्थे स्यादिष्टसिद्धेः किं तेन आम्प्रत्ययवदित्यनेन। क्लिष्टतास्यसयोः। एशि। तिशाक
रकरणमकारविशिष्टस्य तकारस्यादेशत्वात्॥ असंयो। असंयोगादिति किं। ममन्थे। अचनल्लोपोन। द्विर्वचनेचि॥ अचासामानाधिकर
ण्यलाभाय द्विर्वचनशब्दस्य तन्निमित्ते लक्षणा स्वीक्रियते। यद्वा उच्यत इति वचनं द्विर्वचनं यस्मिन्निति द्विर्वचनं। अपि वा द्विर्वचनमस्मिन्ना
स्तीति अर्शआद्यच्। तदेतदाह। द्वित्वनिमित्तेऽचीति। इहाचः परस्मिन्नित्यतोऽच इति स्थानिवदादेश इत्यस्मादादेश इति न पदान्तेत्यतो
नेति चानुवर्त्ततेत्याह। अच आदेशो न स्यादिति। स्थानिवद्भावोपादावआदेशः स्थानिवत्स्यादिति रूपातिदेशपक्षः स्वीकृतः फलं चोभ
यत्र तुल्यं तथाप्यादेशनिषेधपक्षोपि साध्यासिद्ध इति स एवात्र स्वीकृतः। किंच। आदेशामंगीकृत्य पुनः स्थानिरूपाश्रयणापेक्षया नि
षेधपरतया व्याख्यानमेव लघु। प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायात्। न पदान्तेति निषेधानंतरं पाठोप्येवं सत्यनुगुणः।
तर इति श्रेयानयं पक्षः। इष्टानुरोधेन द्विर्वचन इत्यावर्त्यकालावधारणपरतयापि व्याचष्टे। द्वित्वे कर्त्तव्ये इति। कृते तु द्वित्वे यथाप्राप्तमादे
शः स्यादिति भावः। द्वित्वनिमित्ते किं। दुद्यूषतीत्यत्र द्वित्वात्परत्वादूठि कृते योयं यणः पूर्वमिव द्वित्वं स्यात्तदा दुद्यूषतीत्यनिष्टं रूपं स्यात्तन्मा
भूदिति। द्वित्वनिमित्त इत्युक्ते। न ह्यूठ् द्वित्वनिमित्तं। अचीति किं। जेघ्रीयते। देध्मीयते। शाशाय्यते। इह ई घ्राध्मोरितीकारः आयङ्मीधि
क्विती त्ययमादेशश्च निषिध्येत स माभूदिति भावः। अन्ये त्वाहुः। अचीति व्यर्थं। घ्रीप् ध्मीप् शाप् इति द्वितीयाजवधिकस्यैकाचः काय
त्वाद्यङः। द्वित्वनिमित्तत्वाभावादिति। अचः किं। असुषुपत्। इह स्वापेश्चङीति यः संप्रसारणं तस्मिन्निषिद्धेऽभ्यासे उवर्णो न श्रूयेत नच
द्वित्वे कृते पुनः संप्रसारणे न स्यापेरवयवत्वाविशेषादभ्यासे तदा उत्तरखंडे च उकारश्रवणं भवेदेवेति वाच्यं। परस्य संप्रसारणे कृते पूर्व

स्यत्रैव न संप्रसारणमिति पूर्वस्य यणः संप्रसारणनिषेधात्। स्यादेतत्। चक्रतुरित्यत्र अव आदेशस्य निषेधाद्य त्रायण स्यादेव। अत्र
सोर्हि द्वित्वनिमित्तत्वेपि अकारस्यात्र थालात्। न च द्विर्वचनेऽचीत्यस्य वैयर्थ्यं। चक्रेरित्यादौ सावकाशत्वात्। तथा चैकाचा साचात् लिटि धा
तोरित्याद्द्वित्वं न स्यादिति चेन्मैवं। इह द्वित्वनिमित्तशब्देन साक्षाद्वा समुदायघटकतया वा यत् द्वित्वप्रयोजकं तस्यानुरोधेन तस्य सव
स्य ग्रहणात्। एतच्च ठस्य कर्तिसूत्रे कैयटे स्पष्टं। तथा च ऊर्णोतिः सनि सनीवन्ते तीट् पक्षे विभाषोर्णोरिति ङित्त्वविरहे ऊर्णुनविषति। ति
सिद्धः। सनंतस्य द्वित्वविधानेपि सनो द्वित्वप्रयोजकत्वेन तस्मिन्परे आद्ययोर्गुणावादेशयोर्द्वित्वे कर्तव्ये निषेधात्। अत एवाकूर्णुनाव
भावितामात्रेणोह निमित्तत्वमिति। एवं च द्वित्वनिमित्तघटकतया सनरइआगमोऽनुस आकारश्च द्वित्वनिमित्तमिति स्थितं। नन्वेवं स्वपा
तोः सनि स्मिपूङ्रञ्ज्वशां सनीति इट् कृते रुस् शब्दनिमित्तकस्य गुणस्य द्विर्वचनेऽचीति निषेधेऽजादेर्द्वितीयस्येति द्वित्वप्रसंगादरिरिष
तीति न सिध्येत्। रिस्शब्दस्य द्वित्वे यद्यपि सिद्धं तथापि गुणनिषेधे रिस्शब्द एव दुर्लभः स्यादिति चेदत्राहुः। गुणे रपरे कृते रिस्श
ब्दस्यैव द्वित्वं द्वित्वनिमित्तेऽचि गुणस्य निषेधः रिस्शब्दस्तु नेह निमित्तं कार्यित्वात्। नहि कार्यी निमित्ततया आश्रीयतेस्थं इङ्लाघ्यतेरि
अतइति ज्ञापकात्। अन्यथा शीङो ङित्त्वेनाक्ङिति चेति गुणनिषेधाच्छयितेति रूपस्यासिद्ध्यापत्तेः। न च क्ङितीङितिपरे गुणवद्धा
नेति व्याख्यायामुक्तार्थे शयितेति न ज्ञापकमिति वाच्यं। तद्व्याख्यायां छिन्नं भिन्नमित्यत्र गुणनिषेधो न स्यादित्यादिदोषस्य
क्ङिति चेति सूत्रे एवोपपादितत्वात्। न चैवं कार्यिणो निमित्तत्वानाश्रयणे सनंतस्य कार्यित्वान्न निपरतः आद्ययोर्गुणावादेशयोरनि
षेधात् ऊर्णुनविषतीत्यपि न स्यादिति वाच्यं। मत्वर्थे येन नाकार्यमनुभवत एव कार्यित्वलाभात्। ऊर्णोतिहि नुशब्द एव द्वित्वरूपं का
र्यमनुभवति न तु सन्। आरिरिषतीत्यत्र तु रिस्शब्दः कार्यभागिति वैषम्यादिति। उभयान्वयीति। मध्ये पाठाद्देहलीदीपन्याये
न पूर्वोत्तराभ्यां संबध्यत इत्यर्थः। तत्रोत्तरान्वयस्य तु कर्तुगितुमिसादाविणनिषेधः फलं निहरणसंगत्युदाचत्यंचोत्। पियक्षतिवि
सहतीत्यादावपि निषेधस्तु पूर्वान्वयस्य फलं द्वित्वे कृतेऽनेकाच्त्वात्। ननु एकाच इत्युक्तेर्धातूपदेशेऽन्वयः स्वीकर्तव्यस्तदेवमास्तु। उपदेशोऽनु

द्रात्वादित्यनेनैव इष्टसिद्धेरिति शंकते। एकाचः किमिति। पिपक्षतीत्यादाविव यङ्लुक्यपि इण्निषेधः स्यादेवेत्याशंकायामाह। हा स्मरंतिहीति। भिपेत्यादि। भिपायथाः स्यति हंति पाति वाति द्राती त्यादि। तेन अन्यजंघनीत्यादौ णेर्गदतिम्बोल्लं नात्रापायथाः स्तरेति। तेन बिभर्त्तेः सनि बभरिषतीत्यत्र सनीवंतर्ध तीट् विकल्पो न किंतु नित्यमेवेट् एकाच इति निषेधाप्रवृत्तेः। अनुबंधेन निर्देशो द्विधा। स्वरूपेणेत्संज्ञकेन वा। स्वरूपेण। यथा शीङः सार्वधातुके गुणः। दीङो युडचीति। शीङो शीतेः। देधितेः। तसिक्प्रत्यये चेमे क्रमेणोदाहरणे। इत्संज्ञकेन यथा। अनुदात्तङितः। तेन स्पर्द्धशीङादिभ्यः अनुदात्त इत्यात्मनेपदं न। पास्पर्द्धीति। शोशयीति। गणेन यथा। बेभिदीति। रुधादिभ्य इति चेन्न एकाच्ग्रहणं प्रकृतसूत्रे तेन वेविदिता। चेच्छिदितेत्यादावि ण्निषेधो न। एतच्चेति। न च भिपात्रा बाधः शोकथमिदं ज्ञापकमिति शंक्यं। एकदेशानुमतिद्वारा सर्वज्ञापनस्योपपदमतिङ् इत्यादौ दृष्टत्वात्। अत एव तत्र गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति सिद्धमित्युक्तं। अनन्यार्थैः स्यति हंति स्तरेत्यादिभिः स्थिवादिभिरेव ज्ञापनसंभवाच्च। अपरस्वरा इति सूत्रे सात तत्यानहरणेन एकदेशानुमत्या लुपेदवच्यमः लस्ये इत्यादि पूर्वाचार्यश्लोको ज्ञापित इति तु तत्त्वबोधमनोरमायां तु एकदेशानुमतिद्वारा पूर्वाचार्यपठितपरिभाषाया ज्ञापकस्य गतिकारकोपपदानामित्यादौ दृष्टत्वादित्युक्तं। तदयुक्तमिति नव्याः। गतिकारकोपपदानामित्यादौ बहिः पूर्वाचार्याणां परिभाषा न च तत्ज्ञापनं तत्रैव दृष्टमिति युज्यते वक्तुमिति। तद्धेतुः इति। न च मलर्थलक्षणायां मानाभावः। यसत्यादीनामनुदात्तपाठस्यैव तत्र मानत्वात्। न चेदानीमनुदात्तपाठः परिभ्रष्टः आधुनिकानां वसतिशास्त्यादिपाठस्य नार्षत्वान्न मानमिति शंक्यम्। पाणिनिपठितानामेवानुदात्तत्वे धातूनामाधुनिकैः व्याख्यातृपरंपरया संगृहीतत्वात्। अन्यथा एकः अच् यस्येति बहुव्रीहिलाभार्थमेकग्रहणे कृतेपि अनुदात्तपाठस्य परिभ्रष्टत्वात् वसतिशास्त्यादयोनुदात्ताः न तु ऋच्छेधादय इति निर्धारणं न स्यात्। एकग्रहणेति। न च एकाच्ग्रहणं यङ्लुग्व्यावृत्त्यर्थमित्युक्तं पुनरेकग्रहणसामर्थ्यादित्युक्तोपरस्परव्याघातः स्यादिति चेदत्राहुः। एकाच्शब्दे न एकाच्ग्रहणं यङ्लुग्व्यावृत्त्यर्थमिति नार्थः किंतु वक्ष्यमाणसैवैकाच्ग्रहणत्वेनैकग्रहणं विनैव लभ्यत इत्यदोष इति। वधेरिति। यस्तु तथाहुः तत्रैव अनिट्कारिकासु अदंतपर्युदासस्तूक्तो व्याप्रकृतिनाम एव प्रमाणानुसृतः। ऊदृदंतरुक्ष्णुस्नुशीयुनु[illegible]क्षुश्विडीश्रिति। वृङ्वृञ्भ्यांवविनैकाचः स्वरांता धातवो निट् इति। स वा अदंतपर्युदास इहापेक्षितः। स्वा ननुगुणत्वात्। तथाहि। सर्वे सर्वपदादेशा इति न्यायेन कृ इत्यादेः करित्यादेशास्तस्य यथा स्थान्युपदेशां ग्रहीत्वा कर्तेति हतेत्यादौ निषेधः। एव

त्त्वबोधिनी

॥१५॥

न्तितेतथैवववधादेशोऽपि प्रवर्त्तमानः केन वार्यतां। आदंतपर्युदाससामर्थ्यादिति चेन्न। आसञ्चकारेणा पर्युदस्तत्वादिति भावः। इणषीध्वं। इण्कोरित्य
धिकारेऽपि पुनरिण्ग्रहणं कवर्गात्परस्य मा भूदित्येतदर्थं। तेनेह। पक्षीध्वं। आंगात्परेषामिति। विहितानामित्युक्तौ तु ढुदात्तो लुङि। अदिढ्वमित्यत्राव्या
प्तिः स्यात्। लिङ् नडुहनहां [illegible] ढलघलघ्येषु लिङ्क्षा। ध्वं धुक्षध्वं नक्षा ध्वमित्यत्रातिव्याप्तिश्च स्यादिति बोध्यं। आंगात्किं। ववृषीध्वं। य
द्यप्यर्थवतः षीध्वमित्यस्य ग्रहणात् लुषीढ्वमित्यादौ विव सवर्न्न लचतथाप्यर्थवद्ग्रहणपरिभाषाक्वचिन्न प्रवर्त्तत इति ज्ञापनार्थमिदमुक्तं।
तेन आमिनस्मिन्ग्रहणानीति सिद्धं। एधांबभूवेत्यादि। आम्प्रत्ययवदिति सूत्रे कृञ्ग्रहणादनुप्रयोगान्तरे तङ् नेति शेषात्कर्त्तरि
परस्मैपदमेव। भावकर्मणोस्तु स्यादेव। एधांबभूवे ईक्षांबभूवे इति। अस्तेस्तु भावकर्मणोस्तङि कृते एधिरे इति च रूपे विप्रतिपद्यंते।
तथाहि। उभयत्राप्येतान् आदेशे कृते एधामाहे ईक्षामाहे इति केचित्। तासिसाहचर्यादिद्येव हलं न ते शीस न्ये। तन्नाह चयादिवस
र्वधातुक एव एतिहत्वं तथा च कर्मव्यतिहारे तङि व्यतिहे इत्यत्रैव भवति नतु कृद्येऽपि। एतेन एधामासे ईक्षामासे इत्येवरूपमित्य
परे। ह. भ्विताति। यद्यपि कुञ इत्युक्तौ लाघवमस्ति तथापि धातुद्वयस्यैव लाभार्थं प्रत्याहाराश्रयणे क्लेश इति भावः। पररूपापवा
द इति। अपवाद इत्ययं ग्रंथो नाम धातुग्रक्रियास्थस्य ग्रंथेन सह विरुध्यते। तत्र हि अइवाचरति आति। अत्ययग्रहणमपनीयकास्था
नेकाचइत्युक्ते न मि। ओ। अतुः। द्वित्वमतो गुणे। अत आदेरिति दीर्घः। णलं औ। वृद्धिरित्युक्तत्वात्। हल्मादिशेषो हागेव परत्वाद
त आदेरिति दीर्घे कृते तु पररूपशंकाप्यत्र नास्तीति चिंत्योऽयं ग्रंथ इति नव्याः। आउजादीनां। एतच्च जागादीनामपि सिद्धमिति वार्ति
ककृता ग्रस्ताख्यातं। ननु आटिसति वृद्धिरेचीत्यनेन ऐधतेत्यादिसिद्धावपि ऐंददित्यादि न सिद्ध्येत्। किंचातो गुणे इति पररूपप्रसंगः
ऐधतेत्याद्यपि न सिद्ध्येत्। यदि चारश्चेति सत्त्वमरश्चेति। क्रियेत तर्हि अस्वपो हस इत्यत्र वृद्धिः स्यात्। रुदश्च पंचभ्यः अड् ॥१५॥
गार्ग्यगालवयोरित्यडागमस्य सत्त्वादतो रोरप्लुतादिति रोरुत्वे सति अप्रत्वाद्धेति चेन्न। उपसर्गादिति धाताविति अर्थे कृत्वा
आदौ धाताविति व्याख्यानात्। न चास्वपोस्तीत्यादावोकारस्यातवद्भावेनादृत्वालंकराजादिधातुसत्त्वाच्चोक्तदोषस्तदवस्थः

29

तिवाच्यं। आदित्यनुवर्त्य आकाररूपादटो विपरे वृद्धिरिति व्याख्यानात्। एतेन आटश्चे सूत्रे अटगतावित्यस्माल्लुङि आटन्निमि सूत्रातिप्रसंगस्या-
दित्येतदपि निरस्तं। नचैवमप्यात् तु आतीदित्यादि न सिध्यति। आटश्चेत्यस्य ऐदिदित्यादौ सावकाशतया परत्वादिह अतो गुणस्यैव प्रवृत्तेरिति वाच्यं।
चकारोऽत्र पुनर्वृत्तिविधानार्थः। उत्सस्युपगमादंतरंगाच्चा आटश्चेत्यस्यैव प्रवृत्तेः। स्यादेतत्। आडजादीनामिति सूत्राभावे आस्तामासन्निति क-
थमटा सिध्यति। श्नसोरित्यल्लोपेन आटश्चेति तत्र वृद्ध्यप्रवृत्तेः। मैवं। अंतरंगत्वात्प्रागेवाडागमे कृते वृद्धौ च कृतायां पश्चात् श्नसोरल्लोपस्याप्रस-
क्तेः। नच वार्णादांगं बलीय इति वृद्धेः प्रागल्लोप एव स्यादिति वाच्यं। व्याश्रयत्वात्। वार्णादांगमिति परिभाषाया अनित्यत्वाच्च। तत्र हि श्नसोरल्लोप इति त-
परकरणमेव लिंगं। यदि वृद्धेः प्रागेवल्लोपः स्यात्तर्हि किं तेन तपरकरणेनेति। यद्यपि वैदिकप्रक्रियायामानट् आवः इत्यादौ छंदस्यपि दृश्यत इत्यंतर-
यडागमस्य वक्ष्यमाणत्वान्न दर्थमाट्सूत्रं कर्तव्यं तथाप्याटं विनैव अज्यस्य येन आङ्पूर्वकत्वेन वा तत्र कथं विद्याख्येयमिति। स्थितस्य गतिमा-
रूः। सल्लोप इति। लिङः सलोपोऽनंत्यस्येत्यनेन। एधेयातामिति। सीयुटः सलोपे आद्गुणः। ऐधिषीढ्वमिति। इणः परत्वेऽपि इणंतादंगात्परत्वा-
भावादिणः षीध्वमिति ढत्वं न भवति। आत्मने। श्नांतस्य तोऽत्र इति अदस्य स्थानमित्यस्माददिति वानुवर्तते तदाह। ञस्यादिति। आत्मनेपदेष्वि-
अदंति। सुन्वंति। अनतः किं। एधंते। लवंते। इङिन्न एवेति। विभाषेट इति इटो विशेष्यग्रहणात् ज्ञोबलीवर्दन्यायेन केवलादिङिन्न एव। णिहग्रहा-
त इति भावः। ऊहुदंतैरिति। ऊहदंतैर्विना यौतीदित्तिर्विना हृङ्दंभस्यापां च विना अन्ये ये एकाचोदंतास्ते निहताः अनुदात्ता इत्यर्थः। तथा च दांता-
धातावेतास्तोतेस्यादिविण् न भवति। कृऊदंताः कृलूप्रभृतयः। ऋदंताः कृतृप्रभृतयः। युमिश्रणादौ। क्षुराद्वे। रुङ् गतिरेषणयोरित्यस्य-
योग्रहणं। निरनुबंधकग्रहणपरिभाषया लुग्विकरणालुग्विकरणयोरिति परिभाषया वा वसाहवयहि ग्विकरणस्थस्यैव ग्रहणमिति त्रिं-
क्यं। तस्यानित्यत्वात्। सणु तेजने। त्रीङ् स्वप्ने। स्नुप्रस्रवणे। णु स्तुतौ। टुक्षु शब्दे। टुओश्वि गतिवृद्ध्योः। डीङ् विहायसा गतौ। श्रिञ् सेवायां।
वृङ् संभक्तौ। वृञ् वरणे। ननु चेतत्स्नुनामनेकाचामेवानुदात्तत्वेऽपि ऊर्णुतेः ऊर्णुविता इत्यादि न सिध्येन्नैवं। ऊर्णोतेर्णुवद्भावो वाच्य इति वक्ष्य-
माणवार्त्तिकेनेष्टसिद्धेः। अत एव ऊर्णोर्नूयते इत्यत्र धातोरेकाच इति यङ्। ऊर्णुनविषत्यत्रानेकाच्त्वेन प्रवृत्तस्यामोऽभावश्च सिध्यति।

30

उक्तं च भाष्ये। वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनं। आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहादिति। विभाषा गुणे स्त्रियामिति हेतावियं पंचमी। हेतुरिह फलं। एतच्च कैयटे स्पष्टं। उपग्रहः प्रतिषेधः। इट्प्रतिषेधार्थमित्यर्थः। एवं च नुवद्भावे नैकाच्त्वात् श्युकः किती ति निषेधप्रवृत्तेः ऊर्णुत इत्यादि सिद्ध्यति। एकाच उपदेशे इति निषेधस्तु न प्रवर्त्तते नुवद्भावे नैकाच्त्वेप्यनुदात्तत्वाभावात्। ऊर्णुधातोर्नुधातोश्च उदात्तत्वात्। तथा चोर्णविता। और्णनीदित्याद्यपि सिद्धं। वसतिक्षुधोरिट् घसस्तान्त्यमिति प्राचां ग्रंथस्थं पाठमुपेक्ष्य हलंतेषु कोदिक्रमेणाह। त्वाक्लिति। कांत एकः। चांतेषु पञ्च। मुच् रिच् वच् विच् सिचः षट्। टुपचष् पाके। पचु व्यक्तीकरणे। द्वावपि पचित्यनेन गृह्येते। मुच्लृ मोक्षणे। रिचित्यनेन रिचिर् विरेचने रिच वियोजने संपर्चने यो रौ ते यौजादिकश्च गृह्येते। वचित्यनेन तु वच परिभाषणे। ब्रुवो वचिरपि। विचिर् वियोजादिकोपि गृह्यते। विचिर् पृथग्भावे। षिच क्षरणे। छांतेषु प्रछ् एकः। जांतेषु पञ्[illegible] निजिर् त्यज् संज् सृज् स्वञ्ज् मस्ज् यज् युज् रुज् रंज् विजिर् स्वंज् संज् सृजः पञ्चदश। भुजित्यनेन भुज पालनाभ्यवहारयोः। भुजो कौटिल्ये इति च गृह्यते। युजित्यनेन युजिर् योगे युज समाधाविति गृह्यते। केचित्तु व्याघ्रभूतिश्लोके भाष्ये च युजित्येतत् योजिर् योग इत्येकदेशोच्चारणमाश्रित्य तन्मते युज समाधौ सेट्। सृजित्यनेन तु सृज विसर्गे दिवादिस्तुदादिश्च गृह्यते। दांतेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद्य भिद् विद्य विद् शद् सद् स्विद्य स्कंद् हदः पंचदश। खिदित्यनेन खिद दैन्ये खिद्यतिः खिदतिः खिन्तेश्च गृह्यते। विद्यतीति विद सत्तायां विन्दतीति विद विचारणे। धांतेषु क्रुध् क्षुध् बुध्य बंध् युध् रुध् राध् व्यध् शुध् साध् सिध्या एकादश। रुधिति रुधिर् आवरणे। अनो रुध कामे इति दिवादिश्च गृह्यते। नांतेषु मन्य हनौ द्वौ। मन ज्ञाने दिवादिः। पांतेषु आप् क्षिप् छुप् तप् तिप् तृप्य दृप्य लिप् लुप् वप् शप् स्वप् सृपस्त्रयोदश। क्षिपित्यनेन क्षिप प्रेरणे क्षिप्यतिः क्षिपतिश्च गृह्येते। छुप स्पर्शे। तपित्यनेन तप संतापे। तप ऐश्वर्ये दिवादिवादिः। तप दाह इत्यपि णिजंतावपक्षे गृह्यते। तिप् क्षरणे। तृप्यति दृप्यत्योर्वैदिकत्वेपि अनुदात्तस्य चर्दुपधस्येत्यस्य समर्थो पाठः। भांतेषु यभ् रभ् लभस्त्रयः। मांतेषु गम् नम् यम् रमश्चत्वारः। शांतेषु क्रुश् दंश् दिश् दृश् मृश् लिश् रिश् रुश् ~~[illegible]~~ विश् स्पृशो दश। रिश रुश हिंसायां। लिशित्यनेन लिश अल्पीभावे दिवादिः ~~[illegible]~~ लिश गतौ तुदादिश्च गृह्यते। षांतेषु कृष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्या एकादश। कृषिति भ्वादिकतौदादिकौ गृह्येते। विषित्यनेन विष्लृ व्याप्तौ। शिषु विषु मिषु इति दंडकस्थोपि गृह्यते। शिषित्यनेन तु शिष्लृ विशेषणे। कष खष शिष इति दंडकस्थश्च गृह्यते। विषिति विष्लृ व्याप्ताविति जौहोत्यादि

31

कृएवगृह्यतेनतुदंउकस्थः।शि।षित्यनेनापिपिशिछ्रू।विशेषणेइतिरोधादिकएवननुनतुदंकस्थइतिबोपदेवादयः।सांतौघसवसतीद्वौ।घस्लृ
अदने।लुङ्सनोर्घस्लित्युक्तेरादेशस्यतुस्थान्यनुदात्तत्वेनापिसिद्धं।हांतेषुदहदिहदुहनहमिहरुहलिहवहाष्टौ।दुहित्यनेनदुहीरितिभौवादि
कोनगृह्यतेकिंतुदुहप्रपूरणइतिअदादिकएवेतिशांचः।इहमनोरमायांसंग्रहश्लोकउक्तः।कचछजादघनपाःषभशाःषसहाःक्रमात्।
कचकाणणटाःखडोगघञाष्टखजाःक्रमात्॥इतितत्रपद्येपादत्रयेचतुर्दशवर्णास्तदंताधातवःकादिक्रमेणयेवर्णास्तत्संख्याकाबो
ध्याइत्यर्थः।अतएवकांताःएकः।चांताःषट्।छांतएकः।जांताःपंचदशेतिव्याख्यातं।कष्टसेकस्य।चषिइतिषण्णां।पाइतिपंचदशानां।
दा६ संज्ञेसाधभ्युपगमात्।पांतेषुद्वयोःश्यना।निर्देशस्यफलमाह।तुदादौ[illegible]ति।तृपदृपमत्तसेदनदादौस्थितौचुरादौतुतृपिःसर्वमतेस्थि
तः।इतिपिकायमतेनेतिविवेकः।अतएववक्ष्यति।तृपतृप्तौ।दावपिद्वितीयांताविस्तन्या।दृपदंफउत्क्लेशे।प्रथमःप्रथमांतः।द्वितीयांत
इत्सेके।इतिचतुदादौ।चुरादौतुतृपतृप्तौ।तपदृपसंदीपनइत्येकइतिच।अन्यनिवर्त्तयेदिति।निवर्त्तनीयास्तु।जिदास्नेहनमोचनयोः।पदस्थे
र्ये।षिधगत्याम्।षिधशास्त्रेमांगल्येच।बुधिरबोधनइतिभौवादिकः।~~वसआच्छादनेअदादिकः।एतेअनुदात्तत्वसहितास्तेऽमन~~
अवबोधनेतनादिकः।पुषपुष्टौभौवादिकः।क्र्यादिकश्च॥श्लिषदाहेभौवादिकः।वसआच्छादनेअदादिकः।एतेअनुदात्तत्वरा।हिंसासे
टः।युज्नबंधनेक्र्यादिकोयमनुदात्तइत्यनिट्।श्यपनानिर्देशेनसंग्राह्यास्तुजिछिदागाचग्रक्षरणे।पदगतौ।षिधूसंराद्धौ।बुधअवगमने।
पुषपुष्टौ।श्लिषआलिंगने।वसनिवासे।एतेअनिटः।युमिश्रणामिश्रणयोः।अयंसेट्।अमीतयेति।णिजिशुद्धौ।ओविजीभयचल
नयोः।शाकमर्षणइत्येतेषांक्रमेणादादिकतौदादिकदैवादिकानांव्यावर्त्तयेसानुबंधानिर्दिष्टाइत्यर्थः।भिंदतिरिति।विदिरलाभेइष्
इति।अनिट्केतिशेषः।ताश्याःनुक्ताइति।भाष्यकृन्नुक्तानतुग्रस्याख्यातास्तिनास्त्याहतद्विरोधः।ततश्चव्याघ्रभसादियंधातुरोधात्
श्रुषघर्षौ।कैनतव्ज्ञविशिष्टेनानज्रूइत्यादिसोच्चयोगादत्तंतिपत्रंमित्र्यासार्वलौकिकव्यावहाराच्च।उपलक्षणतयेवव्याख्येनेयमिति
भावः।अकर्मकइति।अत्रकेचित्।अभिप्रवेच्छाधात्वर्थस्तत्रापरस्पर्धार्थकस्यसकर्मकतादृश्यते।आक्रान्तामेरावमरावतीयेति।उदाहर

तत्त्वबोधिनी
॥१८॥

ष्यते च स्पर्द्धायामाङः इत्यत्र स्वयमेव वक्ष्यमाणत्वादिहोपेक्ष्यत इति। श्रीहर्षोपि प्रायुंक्त। तन्नालसत्ययुगं तां वा चेन्नास्य स्पर्द्धितुमर्हतीति। आङ्। तोऽस्य स
कर्मकत्वे न्याय्यमिसाङः। शपूर्वाः। आत् गुणसंविज्ञानो बहुव्रीहिः। तेन शरो न शेषः किंतु स्वयामेवाङ्हूस्पर्द्धस्यत्र रेफस्यापि द्वित्वं स्ववति द्विता
पस्यैकाचः संबंधिरेफस्यैव नन्द्राः इति निषेधादिति बोध्यं। गाधृ। ऋकारो नाग्लोपिशास्वृदितामिति निषेधार्थः। अजगाधत्। आस्पद्दस्या
पना आवस्थानं चात्र गतिस्त्वात्र एकत्वस्थापनसंदर्भो वा ग्रंथ॥ नाथृ नाधृ। उपतापो रोगः। अनुदात्तेत्वादेव सिद्धे नियमार्थं वार्त्तिकमित्याह। आशि
ष्येवेति। अन एकहलमध्ये। एकशब्दोऽत्रासहायवचनः। एकयोर्हलोर्मध्ये इत्यर्थस्तत्राचष्टे। असंयुक्तेति। इष्टानुरोधेन लिटीत्यावर्त्त्य आदे
शविशेषणमेतस्य निमित्तं च क्रियत इत्याह। लिण्निमित्तो। ता किं। ति लिटीति च॥ यद्यपि गमहनेति सूत्रे क्ङितीति वर्त्तिततयापि प्रयोजना
भावात् इतीसैतन्त्रानुवर्त्तितेरिति भावः। किति किं। ननंद। लिटि किं। पापच्यत। चकणतुरिति। न चैवमपि बभणतुरित्यत्र अस्याचर्त्वेलस्या
सिद्धत्वादेत्वाभ्यासलोपौ स्त एवेति वाच्यम्। फलभजत्रपग्रहणं एत्वविधिं ज्ञापयति तेन चर्त्वस्य सिद्धत्वज्ञापनात्। एवं चादेशश्चेह वैरूप्यसंपा
दक एव गृह्यत इति व्याख्यानमवश्यं कर्त्तव्यमेवेति दिक्। मदि स्तुति। मोदः संतोषः। मदो गर्वः। स्वप्न आलस्यम्। नशसदद। शसु हिंसायां।
दंत्यांतः। सत्रेऽवयवावयविभावः षष्ठ्यर्थः। तथा च शसददवादीनां योऽकार इत्यन्वयसंभवेपि अकारगुणरूपत्वाद्भेदनिबंधना षष्ठी।
न संभवतीत्याशंक्य तन्निर्वाहार्थं व्याचष्टे। गुणशब्देन भावितस्येति। भावितत्वं च साक्षात्परंपरासाधारणं। तथा च विशशसतुः पपरतुरि
त्यो गुणशब्देन क्रियमाणो योऽतद्वयवोऽकारः। त्वल विपेसादौ तु गुणशब्देन क्रियमाणो य ओकारस्तत्स्थानिकस्यावादेरस्यावयवोऽ
कार इत्यर्थान्नास्त्यत्रानुपपत्तिः। ददे इति। रारासतुः। शशासुः। ववमतुः। ववमुः। इत्यादावपि निषेधो बोध्यः। स्वद स्वर्द। आयामिति। गत्ये
काभिप्रायेणोक्तमित्याहुः। सकर्मक इति। स्वदस्य हव्या। हव्यान्यनुस्वदे सैंधवः। अकर्मक इति। अपां हि तृप्ताय न वारिधाराः स्वादुः सुगं ॥१८॥
धिः स्वदते तुषारैरिति श्रीहर्षः। न स्वदते न रोचत इत्यर्थः। धात्वादेः। धातुग्रहणं किं। षट्। षड्। आदेः किं। लषति। उपधायां च। सिपि धातो
रिसंतः धातोरित्यनुवर्त्तते वोरुपधाया इत्यतः वोरिक इत्यत्र कोदी चोर्मा भूत्। न चात्र शास्ति पदिकोपधात्वेपि पदोपधात्वाभावा

वे

रेवदीर्घोनत्त्वेदितिधातोरित्यनुवर्त्तनमिहानावश्यकमितिवाच्यं। पदस्येत्यनुवृत्तौतु कूर्दतंगूर्दतेरित्याद्यसिद्धप्रसंगात्। नस्कतुस्कपूर्वत्रासिद्धेनस्थानिवदितिस्वीकारादचःपरस्मिन्नितिस्थानिवत्त्वस्यनिषेधात्सुपगमेपिकार्यकालपक्षेऽसिद्धंबहिरंगमितिपरिभाषायाःप्रवृत्तेर्बहिरंगस्ययणोऽसिद्धत्वात्कुर्वै। कुर्वइत्यत्रोपधायांचेतिदीर्घात्त्वेदितिधातुग्रहणानुवर्त्तनस्यनावश्यकता। पदस्येत्यनुवृत्त्याकूर्दतेइत्यादौतुदीर्घःसिद्धसेवेसाऊः। रेफवकारयोःकिं। पुष्पविकसने। पुष्प्यति। हल्परयोःकिं। चिरिणोति। जिरिणोति। इकःकिं। अर्च्यते। नेर्दति। ननुहलिचेत्यत्ररेफवकारयोर्हल्परयोरिकोदीर्घःस्यादितिव्याख्यायांकूर्दतंगूर्दतेत्यादिसिद्धसेवेतिसूत्रमिदंव्यर्थमितिचेत्। अत्राहुः। हलिचेत्यत्रधातुग्रहणमनुवर्त्तनीयमेव। अन्यथादिवमिव्रतीत्यादावतिप्रसंगःस्यात्। तथाचोपधायांचेतिसूत्राच्चावेदुपधाभूतयोर्वोःपरतोदीर्घोनस्यात्। किंतुरेफवान्तयोर्धात्वोर्हलिचेतिसूत्रेणैवस्यादित्येतत्सूत्रमावश्यकमेवेति। सूदतइति। स्रवतीत्यर्थः। ननुस्वर्दतिवत्स्वदसुदेतिदंत्यादयएवधातवःपठ्यतांषोपदेशान्यपठित्वासत्वविधौगौरवात्। मैवं। तथाहिसतिण्यंताच्चङिअसिष्वदत्। असुष्वददित्यादौकिं। दिसुष्वदेसिषेधइत्यादौचआदेशप्रत्यययोरितिषत्वंनस्यादिणःपरस्यसकारमात्रस्यषत्वविधौतुसुपिसोसुपिसइत्यादावपिस्यादिति। धातुपाठेपाणिनिनातालव्यदंत्यादिपाठवत्षोपदेशाअपिव्यवस्थयैवपठितास्सत्वपाठइदानींपरिस्पष्टस्साधादिषुसादिपाठस्यैवदृश्यमानत्वादतोलक्षणमुखेनतान्व्यवस्थापयति। सगित्यादि। दंत्यअचदंत्यावौतोइतोअव्यवहितपरोयस्यसदंत्याज्। तस्मात्सोसस्थदंत्याजंतस्सःसआदिर्येषांधातूनांतेदंत्यात्सादयः। अंतसादयस्त्वेकाचःषोपदेशाबोध्याः। तथाचसाधादेःसाअंतपयमनःसकारउपदेशेन। स्थितइत्यनुमेयमितिभावः। दंत्येत्यादिकिं। युस्कुंदे। एकाचःकिं। सोसूयते। सोसूर्यते। सृविसृत्रीचुरादावदंतौ। उक्तलक्षणस्यातिव्याप्तिंवारयितुमाह। सेगिति। सङ्गतौ। सल्लगतौ। स्तनआवादने। सजविसर्गे। स्त्यैशब्दसंघातयोः। येस्योन्ये। पूर्वेणकेषांचिदसंग्रहादाह। ष्वष्कति। ष्वक्कगतौ। त्रिष्विदागात्रप्रक्षरणे। स्वदआस्वादने। ष्वंजपरिष्वंगे। त्रिष्वप्शये। ष्मिङ्ईषद्धसने। एतोपदेशाइत्यन्वयः। स्वादआस्वादनेइत्यादवतिव्याप्तिमात्रांवयाह। दंत्यःकेवलदंत्यइति। तथाचअसिस्वददित्यादौषत्वंनेतिभावः। ह्लादीसुखेच। वादव्यक्तेशब्दे। ईकारश्वीदितोनिष्ठायामिति। इण्निषेधार्थः। प्रह्लन्नः। प्रह्लन्नवान्। इहह्लादोनिष्ठायामित्युपधाह्रस्वः। अताद्धायायामिति। अविद्यमानगुणसंबंधज्ञापनंह्लादघो। आतश्चारिति। हल्मेध्मस्वलात्स्वावादेहं। न। इटईटि। संयोगांतस्यलोपइत्यतोलोपइति। राल्लसस्येत्यतःसस्येतिचानुवर्त्तते। तदाह। लोपःस्यादिति। इटःकिं। अलावीत्।

ह

तत्वबोधिनी
॥१८॥

ईटीकिं । आतिषं । आतिषुः । सिज्लोप इति । अत्र वदंति । सलोप इति वक्तव्ये सिज्ग्रहणं स्फुलो स्सलीत्यादिसत्र्यं सिज्विषयकमिति व्याख्या
नार्थम् । तेनेह न । सोमसुत्स्नोता । द्विष्टराम् । द्विष्टमाम् ॥ धिन्वीतस्त्रत्रे तु वामनमते सिचो लोपः । भाष्यमते तु सस्येति सेदोबोध्य इति । वदव्रज । अ
वादीत् । अव्राजीत् । अतो हलादेरिति विकल्पं बाधित्वा अनेन नित्यं वृद्धिः । हलंतस्योदाहरणमपाक्षीत् । अधाक्षीत् । हलंतविधिनैव सिद्धे अंग
ग्रहणं स्पष्टप्रतिपत्त्यर्थम् । लहलोः चरस्युक्ते लजंतांगस्य हलः स्थाने वृद्धिरिति कदाचिदाशंक्येत । अच इति तु कूपरिभाषया अनुपस्था
नार्थम् । अन्यथा अपेक्षा त्वृत्यवस्यान्नत्वैपाक्षीदित्यादौ न स्यादित्यागुक्तं नेति । हलंतत्वादेव सिद्धे वदव्रज्यो विशेषविधानान्न निषेधः । किंतु हलं
तलक्षणाया एव वृद्धेर्निषेधस्तस्य अनिडादौ सिचि चरितार्थत्वात् अमुमेवार्थं मनसि निधाय क्वचित्पुस्तकेषु हलंतलक्षणाच्च वृद्धिरित्येव पठ्य
ते ह्रस्वसंज्ञेति । इकारस्य उपदेशे जानुनासिकइति रेफस्य तु हलंत्यमितीत्संज्ञायामिदितइति नुम्स्यादिति भावः ॥ एतस्य वेयर्थ्यं च
क्षाऊ च क्षायं गावीत्स्वस्फुटत्वमिष्यति । चुश्च्योतेति । शर्पूर्वाः खयः । यकाररहितान्यपि मितीत । तथा च प्रयुज्यते मधुश्च्युतं घृतमिव
सुपूतमिति मिमर्यावलोडने ॥ अयं क्र्यादावपि । षिध गत्याम् । अयमुदिदिति केचित् । तत्तु सिध्यतिबुध्यत्योः श्यना निर्देशात् सेधितं बु
धितमिति च निर्ग्रंथविरुद्धं उदित्वे त्वस्तु दितो वेति क्त्वायामिड्विकल्पना निष्ठायामिट् न स्यात् । यस्य विभाषेति निषेधात् । सिषेधे
ति । आदेशप्रत्यययोरिति षत्वं । उपसर्गात्सुनोतीति सुवतीत्यादि । क्रिया निर्देशोयम् । लुङ् । निवत्स्यपर्यस्तेन असिसोषवीति । असिसोषीत्
त्यादौ षत्वं नेति प्राचः । स्थादिष्वेव अभ्यासस्य षत्वं न स्तुनोत्यादिष्विति नियमान्नेह षत्वप्राप्तिरिति व्यर्थः । ग इति षइति मनोरमादौ । स्थ
तं । सेनयेति । णिजंतो नाम धातुः । सेनयाभियातीत्यभिषेणयति । सेधेतिशापादे निर्देशाद्दैवादिकस्य ग्रहणम् । न तु सिध्यतेः । प ॥१८॥
घ२ रि सिध्यातो गृहाद्दाराद् इत्यत्रेवतास्थ्यानाध्धस्ये मित्याह । उपसर्गस्थादिति । निमित्तादिति । रणरूपात् । कवर्गस्तु नेह संबध्यते अ
संभवात् । नच निः षुणोतीति निः षेधति निः षिंचतीत्यादावव्यवधानेन रणः परत्वाभावात् षत्वं न स्यादिति वाच्यं । षत्वविधौ
नुम्विसर्जनीयशर्व्यवायेपीत्यधिकारात् । रणंता उपसर्गादिति व्याख्यानेनैस्यादेवात्र व्याप्तिः । दुरः षत्वणत्वयोरित्युपसर्गत्व

प्रतिषेधात्।ऊः स्तुनो।तिङः से घतीत्यादौ उषत्वेन नत्वं चिंत्यमिति दिक्।मूर्द्धन्यादेशे फलितमाह।ससुषः स्यादिति।स्थादिषु आकुसितादिस्
चक्रमतान्स्यापेक्षितत्वात्।तेनैव क्रमे षत्वस्य चाणिच्यावृष्टे।सादिरप्रतेः।अप्रतेः किं।प्रतिसीदति।षष्ठ्यर्थे प्रथमा।सोढः।सदेरीति।स्तन्भेः।
सोपस्येति।स्तन्भुस्तुन्भुरिति सत्रे निर्दिष्टस्य रोधनार्थस्य न तु स्तंभेर्गतिबंधस्येति भावः।एवं च स्तन्भस्ताङ् विधायकसूत्रेपि सौत्र
स्यैव ग्रहणमिति बोध्यम्।एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते।सौत्रो हि धातुर्नकारोपध इति प्रतिपदोक्तः।इदित्वान्नुमि
च्छिनेर्लाक्षणिकत्वेन विस्तंस्तन इत्यादौ षत्वं न।उदस्थास्तंभोरिति सत्रे तु मकारोपधग्रहणेन उभयोरपि ग्रहणमुक्तं भवति।इति द्वयो
रपि रूपं तुल्यं मकारस्योभयत्र।जिलाक्षणिकत्वात्।उत्तरार्थमिति।उत्तरसूत्रे स्तन्भेरेवानुवृत्त्यर्थमिति भावः।ननु सादिस्तन्भ्योरि
तिसंचितेपि एकदेशस्वरितत्वप्रतिज्ञानात्कथं चेदनुवृत्तिर्भविष्यतीत्यत आह।किंचेति।नानुवर्त्तेतेति।तथा च स्तन्भेरित्यस्य
ननुवर्त्तये योगविभाग आवश्यक इति भावः।अवाच्च।चकारश्चिह्नस्योनुनरस्त्योऽङः।आलंबनमाश्रयणं।यथा यष्टिमवष्टभ्य
आस्ते।तामाश्रित्य तिष्ठतीत्यर्थः।आविदूर्यं सामीप्यं तच्च प्रयोगोपाधिः।अवष्टब्धा गौः।निरुद्धा सती समीपे आस्ते इत्य
र्थः।एतयोः किं।अवष्टब्धो वषलः शीतेन।केचित्तु अविदूरशब्दात्स्वार्थे ष्यञ्।आविदूर्यमनतिदूरमाबहुदूरमित्यर्थः।तथा च अ
विदूरशब्दात् न नञ्पूर्वात्तत्पुरुषादिति निषेधप्राप्ते अत एव निपातनाद्भावप्रत्यय इति मनोरमायां योक्तिर्नातीवोपयुज्यत इत्याहुः।
वेश्च।विष्वणति।सशब्दं भुंक्त इत्यर्थः।अट्कुप्वाङिति णत्वं।एवमवष्वणति।व्यष्वणत्।विषष्वाण।स्थादिष्वभ्यासेनेति षत्वं।भोज
ने किं।विस्वनति वीणा।परिनिभ्यः सेवेसय आकार उच्चारणार्थः।न च यङ्निवृत्तये शपा निर्देश एवास्थिति शंक्यं।वकारांतानाम्
ऊठा विनां यङ्लुकु नास्तीति वक्ष्यमाणत्वात्।षेवृ सेवायां।परिषेवते।षिञ् बंधने।क्तांतः सितशब्दः।एरजंतः पचाद्यजंतो वा स
यशब्दः।विषितः।विषयः।प्रत्ययविशिष्टग्रहणं किं।विसिनोति।षिवु तंतुसंताने।परिषीव्यति।षह मर्षणे।परिषहते।सुट् आगमः।

भवतीति। सेधतेर्गतौ। श्तिपा निर्देशाद्यङ्लुकि न निषेधः। तेन उपसर्गमाश्रित्य

तत्वबोधिनी
॥१७॥

परिष्करोतीति। स्कस्त्वंजोरुपसर्गात्सुनोतीत्यादिना विहितं षत्वं अड्व्यवाय एवेति भ्रमनिवारणार्थमपिशब्दस्योपादानं मा तेषामित्यपि एवं दशानामित्यर्थः।
अस्य षुणोदित्यादीन्युदाहर्तव्यानि। स्थादिषु। इह द्वे वाक्ये। आद्यं षत्वविध्यर्थं द्वितीयं तु नियमार्थमित्याशयेनाह। व्यवायेऽपि षत्वमेषामेव न चैतिरष्टादीना
दशानामेव अभ्यासस्य षत्वमित्यर्थः। तत्र [illegible] प्रेरणे। अभिसुसूषति। अत्रोक्तनियमादभ्यासस्य सकारस्य न षत्वं द्वितीयस्य तु स्तौतीति। पोरिति
नियमान्न भवति। अभिसिषासतीत्यत्र तु षणोऽभावात् अभ्यासात्परस्य षत्वं पूर्वस्य तु उक्तनियमान्नेति बोध्यं। स्यादेतत्। निषिषेधेत्यादौ अ-
भ्यासस्योपसर्गात्सुनोतीत्यनेन सिद्धं। अभ्यासात्परस्य तु आदेशप्रत्यययोरिति किमाद्यवाक्येन। अत्राहुः। फलत्रयार्थमाद्यं वाक्यं। तथाहि
अषोपदेशार्थं सेनया अभियातुमिच्छति अभिषिषेणयिषति। अवर्णान्ताभ्यासार्थं च। [illegible] गोत्रत्तिदोऽधितष्ठौ। षणि प्रतिप्रसवार्थं च। अ-
भिषिषिक्षति। षिच क्षरणे। स्तौतिण्योरेवेति नियमात्सति सनि निवृत्तिमपि षत्वमुपसर्गमाश्रित्य षत्वं भवत्येव। विषे सिधीति। न च से-
धतिशपा निर्देशाद्यङ्लुकि उपसर्गात्सुनोतीति षत्वं। न भवेदिति शंक्यं। शैवादिकनिवृत्त्यर्थतया शपा निर्देशस्य चरितार्थत्वात्। अन्यथा
सेधतेरिति श्तिपा निर्देशस्य वैयर्थ्यापत्तेरिति दिक्। षिधू शास्त्रे मांगल्ये च। मांगल्यं मंगलक्रिया। रक्षार्थेष्वपि। स्वरतिसूति। स्वशास्त्रोपतापू-
योः स्यादिः। ननु स्वरतिसूधूञूदितो वेति सूयतां किमनेन सूतिसूयत्योः पृथग्ग्रहणेनामेवं। तथाहि सतिनिरनुबंधकपरिभाषया षू प्रेरणे
इति तौदादिकस्यैव ग्रहणं स्यान्न त्वादादिकदैवादिकयोरेतयोः। नन्वेवं षू इति पठ्यतामिति वाच्यं। लुग्विकरणालुग्विकरणयोरिति परिभाषया
अलुग्विकरणस्य सूयतेरेव ग्रहणप्रसंगात्। अस्याश्च परिभाषायाः सूतिसूयत्योः पृथग्ग्रहणमेव ज्ञापकमित्याहुः। धूञ् कंपने। स्वा-
दिः क्र्यादिश्च। सानुबंधनिर्देशो धू विधूनन इत्यस्य निवृत्त्यर्थः। इट् सनि वेत्यतो वेत्यनुवर्तमाने पुनर्वा [illegible] ग्रहणं लिङ्सिचो विकल्पनि-
वृत्त्यर्थं। झषस्तथोः। अध इति किं। धत्तः। असैत्सीदिति। अस्ति सिचः इति ईडागमः। वद व्रजेति हलः। ततश्चर्त्वं। झलो झलि। संयोगान्तस्येत्य-
तो लोप इति रात्सस्येत्यतः सस्येति वानुवर्तते तदाह। सस्य लोपः स्यादिति। पदस्येत्यधिकारात्त्वासत्त्वे सति झलि सस्येति निर्दिष्टानां
त्रयाणामेकपदसंबंधित्वे लोपोऽयं। तेन सोमसुत् स्थानमित्यत्र न भवति। झलः किं। अनैष्टां। झलि किं। असैत्सीत्। असेधीदिति। नेटीति ॥१७॥

37

वृद्धिप्रतिषेधः।गुणः।खाद।ऋकार इदिति।तेन नाग्लोपीति निषेधे ऽचखादत्।अत उप।अतः किं।उतोद्।उपधायाः किं।गणयति।इह अतो लो
पं बाधित्वा परत्वाद्वृद्धिः स्यात्।अतो हलादेः।इह सिचि वृद्धिरिति सूत्रमनुवर्त्तनि नेटीति सूत्रादिटीति।ऊर्णोतेर्विभाषेत्यतो विभाषाग्रहणं च नत्।रा
ह।वृद्धिर्वा इडादावित्यादि।अतः किं।अदेवीत्।हलादेः किं।मा भवानवीत्।अटीत्।लघोः किं।अगदीत्।आरक्षीत्।इडादौ किं।अपाक्षीत्।परस्मैप
देषु किं।अपतिष्ट।आपेतिषातां।अथ कासीदित्यत्र चकारादकारस्य वृद्धिवारणाय येन नाव्यवधानमिति न्यायेन यद्येकवर्णव्यवधानमेवाश्रीयते
तदा त्वरक्षीदित्यत्रापि प्रसक्त्यभावाल्लघोरिति व्याख्यामकर्त्तुमित्याऊः।तपरकरणं स्पष्टार्थं।पवर्गीयादिरिति।दंस्यो ब्यादिसेतु न शसददेत्येत्वा
भ्यासलोपनिषेधाद्वेदतुः।वेदिथेत्यादि न सिध्येदिति भावः।नेगदनद।गदादीनां चतुर्णां ज्ञापानि देशात्यादीनामेकादशानां शिपानि।दर्देशाभ्य
नि
यङ्लुङ् निवृत्त्यर्थः।तेन जाजागदीत्।प्रतिनिनानदीदिति।प्रतिप्रनिसासेति।प्रनिजंघनीदिति।इस्यादौ णत्वं न।घुमास्थेत्यत्र घुसंज्ञकाः धादयः षट्।गत्यें
दा
ते।डुदाञ्।प्रणिददाति।दाण्।प्रणियच्छति।दो।प्रणिद्यति।देङ्।प्रणिदयते।धेट्।प्रणिधयति।डुधाञ्।प्रणिदधाति।माशब्देन मेङ् माङोरेव ग्रहणं।
घुप्रकृतिमाङ्तिप ठिन्वा सा व्यापकेत धात्वाख्यानात्।णोनः।धात्वोरिति।धात्वादेः षः सः इत्यतोऽनुवर्त्तनादुपादेरित्येव।नेह।अणति।णोपदेशा
न्त्यपुद्दासमुखेनाह।णोपदेशास्त्विति।नर्द शब्दे।नट अवस्यंदने।चुरादिः।यस्क नट न नाथितिघटादिः सनेह गृह्यते।नाटीति दीर्घनिर्देशात्।ना
ध नाधृ याच्ञादौ।टुनदि समृद्धौ।नक्क नाशने।णी नये।नृती गात्रविक्षेपे।एस्योष्ट्रस्यो।सिन्नाः इत्यर्थः।तवर्गेति।तेषां मतेतु पंचस्यो सिन्ना णोप
देशाः।उपसर्गादसमासेऽपि णोपदेशस्य इत्यतोऽनुवर्त्तनात् समास एव स्यादित्यसमासग्रहणं।कृतेतु तस्मिन् समास एव स्यादित्यपिग्रहणं
कृतं।प्रणिनदतीति।नेर्गदेति णत्वं।धातुनकारस्य उपसर्गादसमास इति णत्वं न त्वत्वयङादिति सिन्नेन व्यवधानात्।तस्माच्चद्धेन कृदी
घाकारः परामृश्यत इत्याह।दीर्घात्कृतादिति।खर्द।दंदशूकस्य सर्पत्वाच्च हा विवेचे धातुत्वं सन् न संगच्छत इत्यत आह।दंदशूकक्रियायामिति।
दंदशूककर्तृकायामित्यर्थः।आनंतोतिह दिव्यानुमत।तस्माल्लुङ्घि हलइति नुट्।वदनैकदेशाइति।तक्रियायामित्यर्थः।आदिर्ञिटुडवः।उप
देशेऽननुनासिक इत्यतोऽनुवर्त्तनादाह।उपदेशेऽद इति।उपदेशो किं।ञिकारीयति।ञिष्वप्।ञीतः क्तः।सुप्तः।ट्वितोऽथुच्।नंदथुः।ड्वितः क्त्रिः।कृत्रिमं।

त्वबोधिनी ॥२०॥

क्लिदि परिदेवने। अनुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थः। क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदार्थश्चरितेत्यर्थः। अयं न पठितः। मुं घमुच्छौ। अयं रौव
कर्म॰ णिमुजादौ मांगलिकए धातिस्तवर्गीयांतस्तदनुरोधेन कति। विचवर्गीयांताः पठिताः। इदानीं लोकप्रसिद्धकादिपाठक्रमेणाह। अथेत्यादि। उकुकी
ति। परमपि गुणं बाधित्वा नित्यत्वात् संयोगादेरिति कित्वं। लुबाचिति। लुबानो रूदाहरणानि षद्दत्ता अस्य षोडन्तमावष्टे। णिजि टिलोपः। षोडयति। एवं
षंडं करोतीत्यर्थे षंडयति। षंडीयतीत्यत्र षंड शब्दात् क्यचि ई ईत्वं बोध्यं। एतच्च वार्त्तिकं स्तावे प्रत्याख्यातं। तथाहि। धात्वादेरिति सूत्रे उपदेश इति वक्त
ते। न च सुधातूनामुपदेशोऽस्ति। ष्ठिवुष्व कृतीत्युयकारादी। लोपो व्योरिति यल्लोपः। प्रणि खनीति। शेषे विभाषेत्यत्र अकोकखादाविति पर्युदासान्नो
र्णत्वं नेति भावः। असवर्णे चेति। असवर्णे किं। ऊखतुः। अचि किं। उचख। उवोखेति। द्विर्वचनेऽचीति निषेधात् पूर्वं द्विर्वचने पश्चादुकारस्य लघूपधगुणे
कृते अभ्यासस्योवङ्। एवं इयेषात्रेयङ्। असवर्णग्रहणसामर्थ्यादियङादेशे कर्तव्ये गुणो यन्न स्थानिवदिति बोध्यं। संनिपातपरिभाषयेति। आमि
सति लिट्परत्वं धातोर्नास्तीत्येदिति भावः। अन्ये तु इजादेरिति सूत्रे गुरुमानिति नियोगोऽमनुपूर्वं ततश्च नियंयोगुरुमान् एधकौ इत्यादिस्तन्नैव
स्यादिति नात्राम्प्रसक्तिरित्याहुः। ऊखतुरिति। कित्वाद्गुणाभावे अभ्यासस्यासवर्णे इति उवङ् न भवति। ननु इयेष इत्यत्रोवोखेत्यत्र अंतरंग
त्वात् सवर्णदीर्घे कृते अच्परत्वाभावादियङुवङौ न स्त इति रूपासिद्धेः किं तत्रासवर्णग्रहणेनेति चेत्। अत्राहुः। वार्णादांगं बलीय इति परिभा
षाज्ञापनार्थमिवासवर्णग्रहणं कृतं तेन भवतीत्यत्रांगरंगमपि यणं बाधित्वा गुणो भवति। तथा करोतेर्घञि कार इत्यत्र यणं बाधित्वा वृद्धिर्भवति।
न चैवं सिवेरौणादिकेन प्रत्ययेन स्योन इत्यत्र च्छ्वोः ऊडित्यूठि कृते लघूपधगुणं बाधित्वा यण न स्यादिति वाच्यं। समानाश्रय एव वार्णादांगस्य बली
यस्त्वादिह तु निमित्तभेदेन व्याश्रयत्वमिति। अभ्यासग्रहणे नेति। पूर्वस्यां तु वचनेनेत्यर्थः। पर्जन्यवल्लक्षणेति। उपयोगानुपयोगाविचारेण प्रव
र्त्तमानं शास्त्रं कृत्स्नस्थानेऽपि कृत्स्नं प्रवर्त्तयतीत्यर्थः। तथा चैकस्मिन् लक्ष्ये लक्षणं सकृदेव प्रवर्त्तत इति न तस्य पुनः प्रवृत्तिरिति भावः। अंतरंग

रो

बलीय इति। न च स्वसवर्णदीर्घयोर्निमित्तभेदात् समानाश्रयत्वाभावे कथमांगस्य बलीयस्त्वमिति चेत्। सत्यं। इष्टानुरोधेन स्थानिनमादाय के
चित् समानाश्रयत्वाभ्युपगमात्। अत एवोङ्शब्दस्य स्मा। लिटि उ नेजवात इत्यादौ च सिध्यति। ऊचतुः। अत्र सवर्णदीर्घप्रवृत्तौ तन्न सिध्येदिति ॥२०॥
दिक्। परत्वाच्चेति। आपाततोऽयं हेतुः। कृत्स्नस्यांतरंगत्वेन बहिरंगत्वादंतरंगे सवर्णदीर्घे प्रति परत्वोपन्यासस्य अयुक्तत्वात्। उखतीति। इ

इंखति। २

दित्वाच्चुम्। लिटि उनुखांचकार। आशिखुषि उं ?योख्यात्। यवखतुरिति। वादिसादेखात्स्यासलोपेन। एखाति। ईंख्यांचकार। ईंखैति। ईंखां
चकम। इंगति। इंगांचकार। लगिंवस्मने। आयंउ । खउखाति दंडके। कौपाठे तस्य गतिविशेषेवत्तिं बोधयितुं पठ्यते॥ अत एवानिप्रयु
ज्नला द्धृ कृ पुस्तकेषु न पठितः। सिवनचेति। यं पर वो वत्र रूपं सचंतद्धसादौ सेवंतेरत्य सिपुक्के व्याख्यातत्वात्। रुचरितत्तुषवसमवाये
इति वृश्चयेत्। लोच। स दित्वान्नाग्लोपीतिकृत्यनिषेधः। अतुल्लोचत्। पचिव्यक्तीकरणे। पचि विस्तारवचन इति चुरादौ। ऋज गति।
अर्जनं अधान्येन उपार्जनं तु आसंगिकं। नुडिधावित्यादि। नुड्विधिनादेशा विनामेषु प्रतिविधेयमिति वचनान्नुडादिविधिषु वर्णैकदेशस्य
वर्णत्वेन ग्रहणादिति भावः। यद्वा। द्विहल्ग्रहणं सामर्थ्यादोग्रत्यारव्यायते नच आट आटतु इत्यत्रातिप्रसंगः। अश्नोतेश्चेत्यनेन
अवर्णोपधस्य यदि स्यात्तर्हि अश्नोतेरेवेति नियमात् सिद्धमिष्ट मिस्यच विस्तारः। सृजि सर्ज निर्जत्वं विनातीं लगदे संतापविशेषः इदित्वा
तश्चीतितो निष्ठायामिति नेट्। सक्तः। सक्तवान्। एजृ भ्रेजृ भ्राजृ। भ्राजे रूदित्करणमनुदात्तेत्त्वमात्रफलं। भ्राजभासेत्यादिना चङ्परे णौ नु
पधाह्रस्वस्य विकल्पितत्वात्। अबिभ्रजत्। अबभ्राजत्। परस्मैपदिन इति। चवर्गीयांताः परस्मैपदिनः। पूजायां चेति। नांचेः पूजायामिति
निषेधादिति भावः। ऋदस्तान्स्तु स्तनुः स्नोकः। आनाट। आनाटीत्। अस्तंभत्। अस्तंभीत्। आभ्यसत्। आभ्यसतां। आभ्यसन्। अभ्यपातत्।
विभाषा घेट्श्व्योरिति च। ङि। आशिश्वियत्। अर्च पूजायां। अयं धुजादौ रश्चेति तत्। इह पाठस्तु कर्तृगे फले परस्मैपदार्थः। दीर्घोनावादि
ति स्याभावविकल्पस्य स्थानिकदीर्घाभावादित्यर्थः। मुखमुखार्थमिति। हल्तहृस्वस्यानिदीर्घोकारासरस्यापिनुट् स्यवस्येवेति भावः।
पुच्छप्रमादे। पुच्छतीति। अंतरंगत्वाच्छेचेतितु कि लघूपधत्वाभावान्न गुणः। राकुश्चायेतां किमनेन छवि धाने नेति शंक्यं। तेन संवीतः
संवीतिरित्यादि सिध्यति। बहुधातुस्ते पुचकारछकारयोरुच्चारणे गौरवात् छेचेत्यस्य शिवच्छायेत्यादावावश्यकत्वाच्च। अजेर्व्यी। वी
इति छेदः। तेन संवीतः संवीतिरित्यादि सिध्यति। आर्धधातुक विषय इति। तेन वीभावोचारं य इंवे वायवइत्यादि सिध्यति। परस्मम्यांकु
हल्वादित्वात्सामावाधङ्न स्यादिति भावः॥ यङ्लुक्कु अस्मान भवति लुकाय उपहारे आर्धधातुक विषयत्वाभावात्नाई धातु

काभिव्यक्तिरिति वीभावस्यैवाप्रसक्तेः। एतच्च नन्तुमतेतिसूत्रे कैयटे स्फुटं। अघञपोः किं। समाजः। समुदोरजः पशुष्वित्यप्। समजः।
उदजः। विव्यतुरिति। एरनेकाच इति यण्। लोपाजादेश एवेति। एतच्च नपदान्तेति सूत्र एवास्माभिरुपपादितं। एकाच इति। अ-
जेरुदात्तत्वेपि वीभावोनुदात्तः। ऊदृदंतादिभिन्ना एकाचोऽजंताः सर्वेऽनुदात्ता इत्यभ्युपगमात्। कृसृ। डुकृञ् करणे। कृञ् हिंसायां।
इह निरनुबंधग्रहणादेकानुबंधस्यानुबंधयोरप्यनयोर्ग्रहणं। एवमग्रेपि। भृञ् भरणे। डुभृञ् धारणपोषणयोः। इत्युभयोर्ग्रहणं। सृ गतौ।
वृङ् संभक्तौ। वृञ् वरणे। इह निरनुबंधकग्रहणात् – – – भिन्नानुबंधयोरप्युभयोर्ग्रहणं। द्रुस्रुश्रु एषामनुदात्तत्वादेकाच उपदेशे
इति सिद्धसाम्प्रये निषेधे प्राप्ते वृङ्वृञोस्तु उदात्तत्वाच्छ्र्युकः कितीत्यस्याप्राप्ते निषेधे प्राप्ते नियमोयमित्याह। क्रादीनां चतुर्णामि-
ति। इह स्तुद्रादीनां चतुर्णां ग्रहणस्यासारत्वान्नियमगर्भितेऽपीह निषेधो निष्प्रयोजन इति बोधयितुमष्टानां ग्रहणमिति नोक्तं इति निषे-
ध इति। नेनेड्वशीति। ज्ञापकमान्ने प्राप्तस्यैवाभावस्य नियमो न तु विभाषाबललभ्यस्यापि अनंतरस्येति न्यायादपि संनिहितस्यैव
नियम उचितः। तेन सिषेधिथ। सिषेद्ध। सिषिधिव। सिषिध इत्युभयं भवति। नान्येभ्य इति। तेन पेचिव। बभृव। विवेत्यादि सिद्धं। नन्वेवं
क्रादिनियमेनैव नेड्वशि कृतीति निषेधस्याप्यप्रवृत्तौ सेदिवान् जक्षिवानित्यादि सिध्यत्येवेति वस्वेकाजाद्घसामितीड्ग्रहणं किमर्थ-
मिति शंक्यं। तस्य नियमार्थत्वेन व्याख्यास्यमानत्वात्। अन्यथा बभूवान्। नित्यत्वादपि इडागमः स्यादिति। न चेहेकादिष्वप्यर्थे इण्न स्या-
त्। हि लिड्येवेति विपरीतनियमः किं न स्यात्। तथा च कर्ता अकार्षीदित्यादावपि इडागमः स्यादिति चेत्। मैवं। कृतेग्रंथे। तामधीष्वे। सन्तः।
परिवर्तोरेघ इत्यादिनिर्देशविरोधापत्तेः। चमादिष्विति। आदिशब्देन सेवेवेहिमहीनां ग्रहणं। तुष्टुषे। तुष्टुध्वे। तुष्टुवहे। तुष्टुम-
हे इत्यादि। स्यादेतत्। अस्तु असाश्रयनिषेधस्य नियमः। साश्रयनिषेधस्य तु न संभवति। वृग्रहणस्य वैयर्थ्यं स्यात्। सा-
मान्यनिषेधज्ञापकत्वात्। न च तत्र सत्याश्रयोऽनिषेधः प्राप्नोति। थलोऽकित्त्वात्। नापि ग्रहः साश्रयः। वृञ उदात्तत्वात्। न चैवम-
पि वृञो नियमार्थत्वमस्त्विति वाच्यम्। तस्य विशिष्याग्रहणात्। यद्यपि विशिष्य ग्रहणं वृञोपि नास्ति तथाप्यप्राप्ते निषेध

॥२१॥

स्राप्तिफलकत्वाद्ध इति वत्त एवग्रहणं त्यजेत्। विधिनियमयोर्विधिरेव ज्यायानिति न्यायात्। एवं च बभृविवेश्यादौ श्र्युकः कि
तीति निषेधो दुर्वार इति केचित्। अचाऊः। बभूथ। आततन्थ जगृभ्म ववर्थेति निगमे इति सूत्रेण छन्दसि ववर्थेति निपातनाद्भाषायां व
न स्यल्लरटः स्वीकर्तव्यतया वृग्रहणस्य फलविषयत्वायोगाद्दमादीनां च क्रियेन नियमस्य दुःस्थत्वादिति। अचस्तास्वत्। उतस्
त्राद्युपदेशे इत्यपकृष्यते तेन अजन्तस्य विशेषणमित्याह। उपदेशे ऽजन्त इति। धातुरित्याक्षेपाल्लभ्यते। न ह्यधातोस्तास्वत्त्वं संभवति। नित्यग्र
हणमनिटो विशेषणं। क्वनित्यमनिडित्यपेक्षायां सन्निधानात्तासावेव विज्ञायते। तासि च कृपरीति सन्निहितां चानुवर्तते। न चेह
इत्यस्मान्नित्यमनुवर्तते तदाह। तासौ निट् ततः परस्येति तासाविव तास्वत् इति सप्तम्यन्ताद्वतिः। यथा तासौ न भवति एवं थल्यपीत्य
र्थः। अच इति किं। बिभेदिथ। रुरोधिथ। उपदेशे इति किम्। जहर्थ। इह परत्वान्नित्यत्वाच्च गुणे रपरत्वे च कृते अजन्तत्वाभावादेतस्या
प्रवृत्ताविट् प्रसज्येतेत्युपदेश इत्युक्तं। थलीति किं। पपिव। पपिम। नित्यमनिटः किं। सस्वरिथ। सस्वर्थ। नायं तासौ नित्यमनिट्।
स्वरतिसूती। ति विकल्पितेट्त्वात्। इह तासौ। तिनेति चानुवर्त्स्यैवेष्टसिद्धेस्तास्वदिति नातीवोपयुज्यत इति केचित्। अन्ये तु यस्य ता
सौ विद्यमानत्वं तस्मादेव परस्य थल इट्त्ताविनिषेधस्येत्तद्धि नार्थं तत्। तेन उवपिथ। जघसिथ। सत्र न निषेधः स्यादुः। उपदेशेऽत्वतः।
पपक्थ। इयष्ठ। उपदेशे किं। कृष्टा। चकर्षिथ। ऋकारवदिति किं। भेत्ता। बिभेदिथ। तपरकरणं किं। राद्धा। रराधिथ। तासौ किं। जिघृक्षेति।
जग्रहिथ। सनि ग्रहगुहोश्चेति सनि नित्यमनिट्। क्रान्तः। चक्रमिथ। उदित्त्वेन क्त्वायां वेट्त्वाद्यस्य विभाषेति निष्ठायां नेट्। नित्यानि
टः किं। अक्ता। अञ्जिता। आनंजिथ। किंच। नित्यग्रहणानुवर्तनाच्चक्रमिथेत्यपि सिध्यति। न हि क्रमिस्तासौ नित्यानिट्। स्नुक्र
मोरनात्मनेपदनिमित्ते इति परस्मैपदे सेट्कत्वात्। ऋतो भारद्वाजस्य। तपरकरणाल्लूगृप्रभृतिषु दीर्घान्तेषु नायं निषेधः। गव
र्तते। ह्रस्वान्ते हृञ् घञादिषु आचस्त्व इत्येव सिद्धं। वृङ्वृञौ यद्यपि सेटौ तथापि वृङः थलेव नास्त्यात्मनेपदित्वात्। वृञस्तु छं
दसि ववर्थेति निपातनाद्वरिथेति भाषायामिट् साध्वेव। तस्मान्नियमोऽयमित्याह। ऋदन्तादेवेति। जहर्थ। दधर्थ। अन्यस्य

स्याद्वेति। एवं च भारद्वाजमते स्यादन्यस्य मतेन स्यादिति विकल्पः फलितः। पपिथ। पपाथ। ययिथ। ययाथ। पेचिथ। पपक्थ। इयजिथ। इयष्ठ। अकारवानिति। ऋच्छ्याकारवानित्यर्थः। इयर्थिथेति। परत्वात्स्यमिट्सनदृतः इति नित्यमिड् भवतीत्यर्थः। ननु स्तुद्रुस्रुवामपि थलि भारद्वाजनियमादिट् स्यात्। न चैवं क्रादिसूत्रे तेषां ग्रहणमनर्थकं स्यादिति वाच्यं। तत्पठनस्य वमादिष्वपि नियमार्थत्वेन सार्थकत्वात्। अन्यथा क्रादिनियमान्नत्र इडागमो वारिः स्यादित्याशंक्याह नचेति। योगद्वयेति। क्रादियोगप्रापितस्य तु न निवर्त्तकमिति भावः। कुत इत्याकांक्षायामाह। अनंतरस्येति। नु चैवमुपदेशेऽत्वत इत्यस्यैव बाधः स्यादिति वाच्यम्। अत्वतस्तु थालुपदेशे तत्वादर्शनेन नयघटते। थलि त्रीणि नपेपस्त्वाहि वरंतादेवेति नियंतुमशक्यत्वात्। ननु तर्हि अचस्तास्वदित्यस्यैव बाधोस्तु तत्कथं योगद्वयप्रापितस्येत्युक्तं। अ। चाऊः। उपदेशेऽचस्तास्वदित्येवं सत्रेकृते पितास्थलि इत्यादिपदानामिवोपदम्। पदस्याप्यनुवृत्तिसंभवे अत्वत इति सूत्रे उपदेशपदस्य अचस्तास्वत् थल्यनिटो नित्यमित्यत्र करणादुभयोः समानयोगक्षय इति ज्ञायते। तस्मादिष्टानुरोधाद्योगद्वयमपि भारद्वाजनियमेन बाध्यते। यदि तु उपदेशेऽत्वत अचस्तास्वत् थल्यनिटो नित्यमित्येको योगः स्वीक्रियते तदाऽत्र नास्त्येव शंकालेशोऽपीति बोध्यमिति। अन्ये तु व्याचक्षते। अचस्तास्वदितिसूत्रानंतरमेव ऋतो भारद्वाजस्येति पठनीये द्वयोरनंतरमस्यारंभादिह तास्थल्यनिटो नित्यं तासौ सानुबन्धयोऽयंता सिनित्यानिटः थलि इण्निषेधस्य भारद्वाजमते ऋकारांतस्यैवेति व्याख्याय तेनेन सर्वेष्टसिद्धिः। यद्वा। क्रादिसूत्रे स्तुप्रभृतीनां ग्रहणमेव द्वयस्यापि बाधकमस्तु। पुरस्तात्प्रतिषेधकांडारंभसामर्थ्यात्। अनाश्रित विधानविशेषमिणमात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाधेते सेतत्सर्वं हि सत्रारंभः। अमुमेवार्थं सिद्धवत्कृत्य ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु च क्रादिनियमप्रापितस्य चेटो निषेधार्थं मितिमूलेऽप्युपनिबद्धमिति। विव्यिव। विव्यिमेति क्रादिनियमान्नित्यमिट्। सिषिचे द्विः। इको गुणवृद्धीति पदे साक्षोपस्थानादाह। इगंतेति। परस्मैपदे थितिकिं। अपविष्ट। अपोष्ट। सिषिधे। एति। विसतिति गुणबाधितात् द्विः स्यात्।

॥२२॥

खजमंथे। कजेतिकेचित्पठंति। एजृकंपने। दीप्तौत्वात्मनेपदीगतः। टुओस्फूर्जा। ट्वितोथुच्। स्फूर्जथुः। ओदितश्चेति निष्ठानत्वार्थओकारः।
स्फूर्णः। स्फूर्णवान्। आकारस्तु आदितश्चेति निष्ठायामिट्निषेधार्थो विभाषाभावादिकर्मणोरिति विकल्पार्थश्च। स्फूर्णंस्फूर्जितमनेने
त्यादि। उपधायांचेतिदीर्घत्वस्यानित्यत्वज्ञापनार्थइहदीर्घोपदेशः। तेनस्फुर्छतिमुर्छतीत्यपिस्फुर्वतीतिकेचित्। क्षि क्षये। अजंतोयस्यपाठो
युक्तः। क्षि निवासगत्योरितितुदादौ। अकृत्सार्व। दीर्घग्रहणेन अचश्चेतिपरिभाषोपस्थानादाह। अजंतेति। यादौप्रत्ययइति। अयंक्षि
क्ङितीत्यतोपीत्यनुवर्त्यं अंगं। क्ङित्प्रत्ययपरत्वेन विशेष्यते। विशेषणेन तदंतादि विधिः। यस्मिन्विधिरितिपरिभाषोपस्थानादितिभावः।
न। लिति। ह्रस्वकारे। प्रत्ययग्रहणादुच्चैःकृत्य। तुकंवा। धित्वापरत्वाद्दीर्घःस्यात्तुग्विधिस्तु। अग्निचित्। सोमसुत्। इत्यादौचरितार्थः।
ल्यपःपित्वमपि अनुदात्तार्थतयाचरितार्थमित्याहुः। सार्वधातुकपकारस्तु। चिनुयात्। सुनुयात्। कूजित्वेति। अथैक्यादकृत्वपाठउचि
तइतिभावः। लजलजि। लज्यात्। लंज्यात्। द्वयमप्रकाशनइतिकथादौ। भर्त्सनेचेति। चाङ्जनि। तुजिपालने। भाषार्थोऽयंयुजादौ।
गजगजि। गंजातुमदिरागृहं। गजमदनेच। मदनंमत्तःचित्तविकारः। वजव्रज। वादित्वादेत्वाभ्यासलोपौन। ववजतुः। वव्रजतुः।
शाध्यंताइति। शाड श्लाघायामित्यसंताइत्यर्थः। वैदोपधोयमिति। तथाचष्टुत्वशास्त्रस्यासिद्धत्वान्नन्द्राइतिद्वित्वनिषेधेनदकार
विहायटिशब्दस्यद्वित्वेपश्चाद्दकारस्यष्टुत्वेन अड्डिटिषते। अड्डिटदित्यादिसिद्ध्यति। दोपधत्वेतु। अड्डिदिषते। आड्डिदत्
स्यादित्यादितिभावः। तोपधइति। अटिंस्तुपक्षे अटिटिषते। आटिटदित्यादिबोध्यं। हलादिःशेषेणटकारनिवृत्तौतन्नि
मित्तस्यापिष्टुत्वस्यनिवृत्तत्वादितिभावः। मनोरमायांतुपूर्वत्रासिद्धमद्विर्वचनइतिष्टुत्वस्यासिद्धत्वाभावात्टकारद्वयस
हितस्यद्वित्वेहलादिशेषे अटिटिषते। आटिटदित्यादिसिद्ध्यतीत्युक्तंनिमित्तापायेनैमित्तिकस्याप्यपायइतितुअनित्यमि
तितदाशयः। आनंददिति। इहनन्द्राइतिनिषेधोन। तत्रद्वितीयस्येत्यनुवर्तनात्द्वितीयएकाचएवनद्राणांनिषेधात्। घट्टचलने।

तत्त्वबोधिनी
॥२३॥

अयंचुरादावपि।स्फुट।अयंस्फुटादावपि।आनंछेति।तस्मान्नुड्द्विहलइतिनुट्।वंछतेरीति।सहायंविना।चरतीस्पर्द्धः।मडिच।पद्मपाठा
दयंवेष्टनेपीत्यर्थभेदः।मडिस्तुवाय।मित्ययंपरस्मैपदिषु।मडि।यःस्वनिंदुपालैस्सस्तात्रस्यात्परिभाषणमित्युक्तेऽमरः।शाडि।शाडोऽस्म
स्पुरोभ्रश्लहितिनकाड्।विशारणमवयवविभागः।शाडृ।डलयोरैक्यात्।शालतेइतिकाश्यपः।शोदवर्गे।अस्पोणा।द्विद्युरंरन्चू
क्ष्यतेतदतिरोदीर्घमोडल्लोमेनंभक्ष्यतीतिकल्पतरुः।कटे।हस्यंतक्षण।आग्रहीत्।टुवम्।अवमीत्।हयगतौ।अहयीत्।क्षणुहिंसा
यां।अक्षणीत्।श्वसप्राणने।अश्वसीत्।जागृनि।अजागरीत्।ण्यंतेछंदसिनोनयतिध्वनयतीत्यादिनाचङिनिषिद्धेओनयी
दितिमुदाहरणं।टुओश्वि।अश्वयीत्।इउदौसिचि।हि।इउदौकिं।दहभस्मीकरणे।अधाक्षीत्।किटखिट।इट किटेनि।किटि
तोपठिष्यते।इहपाठस्त्वर्थभेदात्।जटझट।जेटतुः।जझटतुः।इहत्वादेशादित्वादेत्वाभ्यासलोपौन।खट आम्र।षिलटखिटि
काणिविशिभ्यःक्रन्।खद्गणघ्नन्तौ।अणटति।णोपदेशपर्युदासेनाटीतिसवद्धिकनिर्देशेननश्वावस्पंदनइतिचौरादिकस्ये
वग्रहणाद्दयंणोपदेशएव।हटदीप्तौ।हाटकंसुवर्णं।संज्ञायांचेतिण्वुल्।बाहुलकात्ईद्रस्त्रियांमिति।षट्।घञंताद्दाप्।सटा
जटाकेसरयोः।विट।सर्वधातुभ्यइओणादिकइन्।चेटिः।इदिकारादक्तिनइतिङीष्।चेटी।विट।इगुपधलक्षणःकः।विटः।इ
यायेति।द्वित्वेकृतेणलिवृद्धौसत्यामायादेशः।अभ्यासस्यासवर्णइतीयङ्।इयतुरिति।द्वित्वेकृतेएरनेकाचइतियणंबाधित्वा
अंतरंगत्वात्सवर्णदीर्घः।मैंततोऽचिश्नुधातुभ्रुवामितीयङ्।एकादेशस्यपूर्वान्तत्वेनअभ्यासग्रहणेनग्रहणात्।अभ्यासस्यास
वर्णइत्यनेनेयंकृतेक्विचित्उवर्णादीनांबलीयइतिदीर्घंबाधित्वायण्।नचेहसमानाश्रयत्वंनेतिवाच्यं।अभ्यासोत्तरस्यैका
रस्यसवर्णदीर्घेपूर्वेणप्रतिस्थानित्वेनतयोःसमानाश्रयत्वात्॥अतएवईयतुरित्यत्रइणोयणितितत्तोदीर्घइणःकिती ॥२३॥
त्यभ्यासस्यदीर्घोविधीयते।अन्यथासूत्रमिदंनिर्विषयंस्यादभ्यासाप्रावादित्याङः।स्यादेतत्।णल्रूपलोस्त्वभ्यास

45

स्येयङ् इर्त्सन्तस्मिन्कर्त्तर्ये अचः परस्मिन्निति वृद्धिगुणयोः स्थानिवद्भावे न असवर्णे इति प्रतिषेधादिति चेत्। मैवं। असवर्णग्रहणसाम
र्थ्यादिवस्थानिवद्भावस्याप्रवृत्तेः। ननु नास्ति सामर्थ्यं इयर्ति इत्यत्र इत्यादौ सावकाशत्वादिति चेत्। अत्राऊः। न ह्येकमुदाहरणं योगारंभं प्रयोज
यति। अन्यथाभ्यासस्यासवर्णे इति ब्रूयात्। एवं चांतरंगत्वात्सवर्णे दीर्घे कृते न तो वृद्धिगुणयोः सतोर्ण। ॐ। लि। आय। थलि एयथ। रूपं स्तु
अयिथेतिस्यादित्याकांक्षापि न कार्या। अभ्यासस्यासवर्णे इत्यस्य वैयर्थ्यापत्तेरिति। एता एयाति। अकृत्सार्वेति दीर्घः। ईयात्। ऐषीत्। कुङ् वै
कल्प्यमविवेकः। वृङ्। नोऽनंदारणे। हिंसनं च। रोङ् इलोङ्। उन्मादश्चित्तविभ्रमः। गा ङिबदनैकदेशः। टवर्गस्य गकारणादिह पाठस्तु उक्तिः। ओंतस्या
दिपुतृथं चैतेन तिङ् विषया इति मतांतरं बोधयितुं प्रसंगादुपन्यस्तः। तिप तेप। तिङ् सिचावात्मनेपदेषु इकोऽसल् हलंतात्वे ति वर्तते। असंयो
गाल्लिट् कित् इत्यतः किदिति च तदाह इकः सामीप्यादित्यादि। इक्। कित्। यक्षीष्ट। सति किवे संप्रसारणं स्यात्। आत्मनेपदे तिङ्। अक्षीत्। कि
त्वे सति सिद्धशोऽसिद्ध्यमकित्वादित्यमस्यात्। आत्मनेपदपरत्वं सिच एव विशेषणं। ननु लिङः परत्वासंभवात्। तेपृ कंपने च। चकारः स्मरणार्थ
स्य ला ला दस्य पूर्वत्र पाठस्य कुशकस्य। वे। चिनुते। तिपते पदृ। तिपंति। टवेपृ। वेपथुः। केपृ गेपृ ग्लेपृ च। योगविभागात्। वर्तितार्थे चकारेण।
तुल्यप्येतेतरसाह। चात्कंपने गतौ चेति। योगविभागसामर्थ्यादेवार्थद्वयलाभे च कारो व्यर्थ इत्यन्ये। पुनः पाठ इति। दैन्ये पठितस्य कंपनाद्यर्थ
लाभार्थमिति भावः। त्रपूष् लज्जा। तर तेरक्मस्य गुणशब्देन भावितत्वात् फलभजो वैरूप्यसंपादकादेशादित्वात् अपतोऽस्य केन हन्मध्यस्य त्वासं
वादप्राप्ते विधिरयम्। तेरतुः। तेरुः। फलतुः। फलुः। भेजतुः। भेजुः। ओविशब्दो। अस्माद्गुणोऽस्य हलन्तल्प्रत्ययेऽं बाशब्दः। तिरकः। अंबा। आका
रोकारमकाराः सकाः शब्दाः यस्येति बहु ओत्रैषादि भाषेति कन्प्रत्ययेऽं बकइत्येके। के चित्तु त्रीणि अंबकानि नेत्राणि यस्येति विग्रहं कु
ति। अनिरम्भो इति। सर्वधातुभ्यो ष्टनित्यधिकारे उद्रकेनुभौ चेति वक्ष्यमाणत्वात् ऊणस्तरेणापि अंभः शब्दः सिध्यतीति बोध्यम्। अ
नस्तोभ्यं तस्य पत्संभ्यः। सिः मीष्मः। अंसस्लोलोपश्चेति बाधकादिपाठादि ति सलोपः। तदभावंसिचीति। पूर्वसवर्णप्रवृत्तेः फलाप्रवृत्तेऽस्थवी

तत्वबोधिनी
॥२४॥

जभित्यर्थः। रधिजभोरचि। रंधयति। परापि च वृद्धिर्नित्येन नुमा बाध्येते। अचीति किम्। रद्धा। जब्धा। सनाद्यंताः। सनादय इति। सन्क्यच्का
म्यच्क्यङ्क्यषोऽथाचारक्विप्णिज्यङौ तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः। धातुत्वादिति। प्रत्ययविधिशास्त्रस्य धातुत्वादित्यर्थः। सु
प्तिङंतमित्यनेन संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्तीति ज्ञापितत्वाद्धि शास्त्रस्य धातुसंज्ञालाभाय सूत्रेऽस्मिन्नंतग्रहणं कृतं। भू
वाद्यो धातव इत्यस्यानंतरं सनाद्यंताश्चेति न सूत्रितं। सनादयो द्वादशैवेति निर्द्धारणालाभापत्तेः। सनाद्यंता धातव इत्यस्यानंतरं तु भूवाद
यश्चेति पठित्वा धातव इत्येतत्तत्रत्यं कुर्यात्। आयादयः। आय ईयङ् णिङ् इत्यर्थः। विवक्षायामिति। परसप्तम्यां कृत्वार्द्धधातुकोपदेशका
ले पददंतमित्यनुपदं वक्ष्यमाणेन संगच्छते इति भावः। अन्ये तु गुपूरक्षणे इत्यस्मात् क्विपि पश्चादायप्रत्यये गोपायतीति रूपं नित्यं प्रसज्येत विव
क्षायामित्युक्ते तु आयप्रत्यये कृते क्विपं बाधित्वा अ प्रत्ययादित्यकारप्रत्ययेऽपि च गोपाया। धूपायेति सिध्यतीत्याहुः। कास्प्रत्ययात्। आममं
त्रे किम्। कृष्णो नोनाव। अछंदसीति तु नोक्तं। मंत्रभिन्ने छंदसि आमस्त्वालौ। यथा पुत्रावमामंत्रयामास। प्रत्ययांतत्वादाम्। अयदृशुनःशेपमी
क्षांचक्रे। इजादेश्चेत्याम्। इह चुलुम्पचकास्दरिद्रादिभ्य आमो लाभाय कास्यनेकाच इति वार्त्तिकमारभ्य प्रत्ययग्रहणमपनीयते। अन्य
था आ इवाचरति आति। अस्य लिटि। ओ आवु इत्यादि वक्ष्यमाणेन सिध्येदिति भावः। अन्ये तु भाष्यवार्त्तिकयोः प्रत्ययग्रहणमपनीयस्यानु
त्पाद प्रत्ययांतादेकाचोऽप्याम् भवत्येव। अ इवाचरति इत्याचारक्विपि लिटि आंचकार। आंचकतुरित्यादीत्याहुः। अतो लोपः। अनुदात्तो
पदेशेतिसूत्रात् उपदेश इत्यनुवर्त्तते तदाह। आर्द्धधातुकोपदेशे इत्यादि। उपदेशे इति किम्। अयपयगतौ आभ्यां क्विपि वेरपृक्तलोपाद्वलि
लोपः। पूर्वविप्रतिषेधेनेति वार्त्तिकात् लोपो व्योर्वलि इति यलोपे अतो लोप इति लोपो मा भूत्। अत्र परत्वात् ह्रस्वस्य पिति कृति तुक्।
आर्द्धधातुके पर इति किम्। कथयति। अल्लोपकर्त्तव्यायां अचः परस्मिन्निति स्थानिवत्त्वं यथा स्यात्। गोपायामिति। नन्विह आय ॥२४॥
प्रत्ययस्य अदंततामाश्रित्य लोपकरणे फलाभावात् उच्चारणार्थ एवात्राकारो गृह्यते इति चेत्। अत्राहुः। गोपायतं न इत्यत्र च गोपायशब्द
स्य धातुत्वात् धातोरंत उदात्तो भवति ततः शबकारेण एकादेशेऽप्येकादेश उदात्तेनोदात्त एव। तदकाराकारस्तु नास्त्यनुदात्तत्वं। उन्दउ

पदेघा दित्यनुदात्तस्तेथोदात्तादनुदात्तस्येति स्वरितोनुवर्तितः। स्वरितात्संहितायामनुदात्तानामिति नइत्यस्य एकश्रुतिः। आयप्रत्ययस्य अनन्दंवले
पुनेर्दीर्मष्टं सिध्यतीति। स्तुतावेवेति। सौक्तत्यव्यवहारेपि आयुक्तः। न चोपलैसे वणिजां पणायामिति। वणिजां व्यवहारमित्यर्थः। ऋअस्यादितिञा।
यप्रत्ययांतादकारप्रत्ययेटाप्। चक्षस्हति। दृह अनुनासिकस्याक्विझलोरित्युपधादीर्घो निहतः संसापूर्वकाविंघोरनित्यत्वादिति स्थितस्य गति
कुलोक्षयेति। कमु कांतौ। अस्य णिङ् भावेड इतोवृत्ति कायामिति विकल्पः। कमिता। कंत्वा। निष्ठायां तु यस्य विभाषेति निषेधात्कांतः। आयामंता
नामंतेतिसू. चितेपिणेरनिटीति वक्ष्यमाणलोपस्य निषेधे गुणायादेशयोः सतोः कामयांचक्रे इत्यादिरूपाणि सिद्धेः स्येवं तर्हि अत्यपि
लघुपूर्वादित्येवमर्थमयादेशवचनं। प्रस्तानय्य संगमय्यानघस्त्र गुणायादेशौ लभ्येते। आम्। कारयामास गंडयंतो मंडयंतः। हृस्वाति
वसिसाधिगडिमंडिजिनंदिभ्यश्चेत्युणादिकोसच्। स्पृहिगृहीत्यालुच्। स्पृहयालुः। अदक्षिस्पृहिगृहिभ्य इत्युणादिकेआय्यः
स्पृहयाय्यः। स्तनिहृषिमुषीत्युणादिक एव इत्नुच्। स्तनयित्नुं। णेश्छंदसीति इष्णुच्। धारुघःपारयिस्नवः। णि श्रिद्रु। स्त्रोः सिचोपवादः
णेरनिटि। णेरिति णिङः णिचोर्ग्रहणं। एवमन्यत्रापि बोध्यं। अनिटीत्यनेन। धित्सतमाद्यघातुक इत्येतद्विशेष्यते। यस्मिन्विधिरिति तदा
दादिविधिः। अतोलोपे इत्यस्मात्लोप इति चानुवर्तते तदाह। अनिडादावित्यादि। यणि आस्त इति। ननु परत्वादियङ्यणादिविधे
र्लोपे प्रासंस्तमन्त्रसंतनामतेषु स्थानिवद्भावः। णिज्ग्रहणेन ग्रहणाल्लोपो न भविष्यतीति चेत्। नैवं शक्यं। इयङादेशे हि सति लोपः स्यादि
ति दोषः स्यात्। एतच्चातोलोप इति सूत्रे भाष्ये स्थितं। किं चात्र कारणाकारक इत्यादौ गुणवृद्ध्योः कृतयोरंतरंगत्वादयायादेशयोः कृतयो
रंत्यस्य लोपः प्राप्नोतीति कथं। इयङादेश एव दोष उक्त इति शंक्यं। वार्णादांगं बलीय इत्ययायोर्वा। धित्वा। णिलोपो भविष्यतीति सा
ध्याशयात्। ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन अल्लोपस्तु वृद्धिदीर्घाभ्यामिति विवेकः। णि
लोपस्य निरवकाशत्वेन वार्तिकस्योक्तिसंभव एव नास्तीत्यत आह। पाकिरित्यादि। किंतामिति तन्न। ननु चेती णिनिषेधादिति साकं।

तत्त्वबोधिनी

।।२५।।

वचनसामर्थ्यादिति। अयंभावः। णेरित्येतावतिसूत्रेकृतेप्यार्द्धधातुकइत्यनुवृत्त्या आर्द्धधातुकेपरतःप्रवर्त्तमानोणिलोपः इयङ्यणादिभि-
र्बाधितःसन्परिशेषात् णिच्येवस्यादित्यनिटि। तस्यवैयर्थ्यंप्रसज्येत। तथाच अनिडार्द्धधातुकंसर्वमप्यस्यविषयोनतुणिजंत-
मेवेति। आद्यमितिणिलोपइत्यर्थः। आल्लोपांशेतुवचनमपेक्षितमेव। तेनचकार्षकइत्यत्रवृद्धिः। चिकीर्ष्यादिरत्र अहल्त्वार्वतिदीर्घंचबाधि-
लोपश्चविप्रतिषेधेन। अतोलोपइतिल्लोपोभवतीत्याह। णौचङ्युपधायाः। उपधायाः किं। अचकांक्षत्।। सन्वल्लघुनिचङ्परइत्येतावतै-
व णिरितिनलभ्यते। श्रिद्रुस्रुवामपिचङ्परत्वादतआह। अंगसंज्ञानिमित्तमिति। अंगस्यायेभ्यासइति। अंगस्य येद्वे विहितेतयोः
पूर्वयोभ्यासइत्यर्थः। अंगस्येतिनानुवर्त्ततइति। अस्मिंस्तुव्याख्यानेचङ्परइत्येतावतैव णिरितिलभ्यते। णि। श्रिद्रुस्रुषुपरेषु अंग-
त्वासंभवादतोव्याचष्टे। चङ्परेणौयदंगमिति। चङ्परइत्यस्यैवव्याख्यानंणाविशिष्टेयं। अनग्लोपे किं। अचकथत्। सन्यतः। अ-
त्लोपोऽभ्यासस्य [illegible] सतोऽभ्यासस्येतिभ्रमामाभूदित्यतइरूपंचानुवर्त्ततेतदाह। अह। अभ्यासस्येत्यादि। तपरकरणंकिम्। पा-
पच्यतेः सन्। पापचिषते। नचसन्नियोभ्यासः सन्निमित्तइतिविज्ञानात्तपरकरणाभावेपिनोक्तातिप्रसंगः अभ्यासस्येहयङ्नि-
मित्तत्वादितिवाच्यं। तादृशविवक्षायामधीषिषति प्रतीषिषतीत्यादावव्याप्तेः। नहिकार्यिनिमित्तत्वेनाश्रीयते। यद्याश्रीये-
ततर्हि द्विर्वचनेचीतिनिषेधेन रिसृशब्दस्यद्वित्वात्प्रागवृत्तावरिरिषतीत्यादिनसिद्ध्येत्। नन्वेवंपिपक्षतीत्यादावव्याप्तिः। अभ्या-
सस्यसन्परत्वाभावात्। नचयेननाव्यवधानन्यायेनसन्नहल्त्वाव्यवहितेप्यभ्यासस्येत्वंस्यादेवेतिवाच्यं। अतीषिषतीत्यादा-
वभ्यासस्याव्यवहितसन्परत्वासंभवाउक्तन्यायाप्रवृत्तेरितिचेत्। अत्राहुः। सनाधातुमाक्षिप्य सनिस्थितोयोधातुःसन्नंतस्त- ।।२५।।
दभ्यासस्येतिव्याख्यानेनोक्तदोषः। नचसनिपरेअभ्यासस्येतियथाश्रुतंव्याख्यानंपरित्यज्योक्तव्याख्यानेकिंमान-
मितिवाच्यं। तपरकरणस्यैवतन्त्रमानत्वात्। किंच। आकारग्रहणमपितन्त्रमानं। अन्यथासन्नइत्येवब्रूयात्। तावतापिअधीषिषतीति

त्याद्यावित्यत्रेति सिद्धे। दीर्घो लघोः। लघोरभ्यासस्येति। ननु आन्हलू समुदायस्याभ्यासस्य लघुसंज्ञा दुर्लभा। कृत्स्नस्य लघ्वितिस-
त्रितत्वात्। नैष दोषः। इमे हि न समानाधिकरणषष्ठ्यौ किंतु व्यधिकरणे। तथा चाभ्यासावयवस्य लघोर्दीर्घ इत्यर्थः। लघुनि चङ्परेऽनग्लो-
पे इति सर्वमिहानुवर्त्तते। तिङ्गाग्वदेवद्धाव्याख्येयं तदाह। सन्वद्भावविषय इति। हलादेरिति। आन्चोक्तमिहापेक्षितं निष्प्रमाणत्वात्॥
न हि मुनित्रयोक्तिं विना हलादेरिति व्याख्यातुमुचितं। न चैवमौदिदत्। आ डिउ दित्सादौ दीर्घः स्यादिति शक्यं। अंगलघोरुभयोरपि णिच्यत्र-
ति विशेष्यत्वे दीर्घस्य तत्रापत्तेः। चङ्परे हि यदंगं उद्दूरीति न तदीयोऽभ्यासो न वा चङ्परणिच्परं यल्लघु तत्परः। एतेन आटिटदिति साध्यो-
दाहरणमेव हलादेरिति व्याख्याने प्रमाणमिति केषांचिदुक्तोक्तापि प्रत्युक्ता। दीर्घोऽप्राप्तेवोदाहरणसौष्ठवस्योक्तत्वात्। लघोः। किं। क्षण
हिंसायां। अचिक्षणत्। शास्त्रेऽस्मिन्कालकालसंज्ञापाक्षाभ्यां यथोद्देशंसंज्ञापरिभाषमिति पक्षद्वयमस्ति। ताजातिव्यक्तिपक्षवत्।
तथा च पूर्वोऽभ्यास इत्यस्य सन्वल्लघुनीत्यादिना सह पक्षद्वयेऽपि एकवाक्यतासमानैव तथापि कार्यकालपक्षे पदैकवाक्यता यथोद्देशपक्षे
तु वाक्यैकवाक्यतेत्यस्ति विशेषः। तत्रेदानीं कार्यकालपक्षपातिमाधवमतं तावद्व्याचष्टे। संज्ञायामित्यादिना श्लोकद्वयेन। अंगस्येति।
अयं भावः। सन्वल्लघुनि दीर्घो लघोरिति सूत्रद्वये अंगस्येत्यनुवर्त्तते। अभ्यासस्येति च। तेन अंगस्य ये हेतयोः पूर्वोऽभ्याससंज्ञकस्त-
स्येति फलितं। द्वेरत्यत्र तु उच्चारणे इति विशेष्यसमर्पकमध्याह्रियते। तच्चकृदंतं घोगादंगस्येति कर्मणि षष्ठी। तेन यत्रांगं द्विरुच्यते तत्रै-
व पूर्वस्य दीर्घसन्वद्भावौ स्त इति। अचीकरत्। अपीपचत्। युक्तं चैतत्। अंगस्येति षष्ठ्याः कारकविभक्तित्वसंभवेनापेक्ष्य। शेषषष्ठीत्व-
कल्पनाया अन्याय्यत्वात्। नांगं द्विरुच्यते इति। एवं चावचकासत्। आर्त्तथ्यपत्। और्णुनवदित्येव भवतीति भावः। अवयवः कश्चिदि-
ति। हलादेः प्रथमावयवो द्विरुच्यते। अजादेस्तु द्वितीयावयवादित्यर्थः। अंगं यत्र चाद्विरुच्यते तत्र पूर्वस्य दीर्घसन्वद्भावौ विधायमा-
नावेकाच्च इत्येवेति फलितौ। किं च अस्मिन्पक्षे एकाचरसंगविशेषणं शब्दतोऽपि सुलभमेकाचो द्वे इत्यधिकारादित्याशयेनाह। तस्मा-

देकाच्त्वात्स्थौ देतत् । उच्चकारीत्यादि स्वहलादिलक्ष्यस्य सर्वसंमतत्वात् । तन्निर्वाहार्थं यथोद्देशपक्ष आश्रीयत इति चेत्तर्हि तत्राह । सा
धुस्थानीयत्वाच्चेत्यभिप्रेत्याह । वस्तुत इति । ऊर्णोतेर्दीर्घ इति स्यादित्यपकृष्यते । और्णुनवत् । इह सन्वद्भावस्तु नोपयुज्यते । णौ ऊनस्यादेश
स्य स्थानिवद्भावेन निषेधेन वा नुशब्दस्य द्वित्वे सति अभ्यासे अवर्णाभावादिति भावः । अर्थापयतेति । अर्थमाचष्ट इत्यर्थे णिच्यापु
गागमे च तत ~~ऋ~~ ऊ दीर्घस्य सन्वद्भावस्य चाप्रवृत्तौ आर्तिरिपपदित्येव भवतीति भावः । अर्थ ऊप आयामित्यस्य उ चङ्परे णौ
आर्तिथतेमित्सवतिन तु गात्रदीर्घसन्वद्भावयोः प्रवृत्तिरिति चुरादिषु स्फुटी भविष्यति । उभयमिति । दीर्घः सन्वच्चेत्येतद्द्वयमित्यर्थः । नस्या दृ९
स्याज्ञ्यावस्थायेति । चङ्परे णौ यल्लघ्वीति व्याख्यानेन स्यात् चङ्परे णौ यदङ्गमिति व्याख्याने तु स्यात् । एवं च आचचकासत् । आचीच
कासत् इति व्याख्याभेदेन रूपद्वयमित्यर्थः । ननु यथा चङ्परे णौ यल्लघ्वीति व्याख्याने येन नाव्यवधानन्यायेन अपीपचदित्यादौ व
कुपधं भवति न तथा व्यवाये अचचकासदित्यादौ । तथो न्यायसाम्येन लघुनि यो अभ्यासस्तस्य आप्येकेनैव व्यवायस्य स्वीकार्यत्वा
दचिक्षणदित्यादौ सन्वदितीत्वं न स्यादिति चेत् । अत्राहुः । अस्मद्गत्वरेतीत्वापवादेन अत्वविधानेन तुल्यजातीयापेक्षेण संयोगस्य
व्यवधानेपि इत्वस्य ज्ञापितत्वान्नोक्तदोषः । अत एव दीर्घो लघोरिति सूत्रे लघोरिति सार्थकम् । माधवोपि जागर्धातावित्थमेवाह ॥
एवं च यदन्यथोद्देशपक्षमेवाश्रियत् । तथा च ऊर्णुधातौ यत्तेनोक्तं और्णुनवदित्यत्र दीर्घो लघोरित्यभ्यासस्य दीर्घो न भवति चङ्
परे णौ यदङ्गं तस्य यो भ्यास इति सूत्रार्थात् । अत्र तु अङ्गावयवस्याभ्यासो न त्वङ्गस्येत्यादि । तत्रापि तस्याप्यायहो नास्तीति गम्यते । अ
त एव चकारस्तो । अचीचकासदित्युदाजहार । तथा च मतभेदात् मिश्रायेण पूर्वापरग्रन्थविरोधः समाधेय इति । कातन्त्रपरिशिष्टे त्वि
त्वदीर्घयोः अजीजागरदित्युदाहृतं तन्मतद्वयेप्यसंभवादुपेक्ष्यम् । व्यवस्थामेव विवृणोति । णेरिति । संनिहितमिति हेतुगर्भं वि ॥२६॥
शेषणम् । लघुनीत्येतत् णेर्विशेष्यं भवति संनिहितत्वादित्यर्थः । अङ्गमेव चेति । अस्य चङ्परे इत्यत्र आदेशरूप चङ्शे आ

कांक्षात्तावेपिणाविति अस्यायंशेषु ष्टितकांक्षत्वादिति हेतुः स्पष्ट एवेति भावः। कैय्यटनैवेति। तुल्याच एकै हरदत्तमतं अपरं तु कैयटमतमि
ति विषयविभागेन व्याचक्षाणाउपेक्ष्या इति भावः। चङ्परइत्यावश्यं अग्लोपविशेषणतयापि योजितं तस्य फलमाह। णेरिति। अजिदुस्सुषुप
रतो अग्लोपित्वात्सन्वद्भावा दित्वापि चङ्परइत्येतावतैव णाविति लस्य तइति बोध्यम्। अगितामपीति। पचकमिशाकिप्रभृतीनामित्यर्थः। नहि
संज्ञकानां लोपो णिचं प्रतीक्षतइति भावः। नोपदेशफलमिति। अनुस्वारइत्यर्थः। दध्वंतीति। नुगतोऽनुनासिकांतस्येत्त्वस्यासस्य नुक्। गत्यादि
ष्विति। गतिशब्दसंशकाकिषिवित्यर्थः। मीम। रुदित् फलं तु नाग्लोपीति निषेधः। अमिमीमत्। ष्ठिवु क्लमु। ष्ठीवति। क्लाम्यति। आउव्वमइति। ष्ठिवु क्लमु
मु आचमामिति व नि कारोक्त पाठोऽशुद्ध इति भावः। जिमिंके चिदिति। तथा च जेमनमिति भोजने प्रयुंजते। वाभ्नाश। उत्सयत्र विज्ञाषेयं। अनव
स्थानाथेति मि क्लमिञ्च सीच दिवादयस्तेभ्यो नित्यं प्राप्ते रितरेषामप्राप्ते ध्यारंभात्। ष्ठा शट भ्ला अदाशो। फणादयैतो। त्रसुपत्तने। च्चाज्व
लादिः। फणादिरित्यपि मनोरमायां पठ्यते तत्र स्वस्वादिति नव्याः। भ्रमु अनवस्थाने दिवादिः पुषादिः शमादिस्तत्र भ्वादेः भ्रम्यति भ्रमति शामा
देस्तु श्यनि दीर्घे भ्राम्यतीति त्रैरूप्यं क्रमु ग्लानौ त्रसी उद्वेगे। त्रुट छेदने। लष कांतौ। क्रमः। ष्ठिवुक्लमु आचमामित्यतोऽनुवर्त्तमानादाह। पर
स्मैपदेष्विति। परस्मैपदे किं। उपक्रमते। पराक्रमते। स्नुक्रमोरनात्मनेपदनिमित्त इति आत्मनेपदनिमित्ताभावे इत्यर्थः। अन्ये तु द्विवचने
स्थाने व्यत्ययेन एकवचनम्। आत्मनेपदनिमित्तयोरित्यर्थ इत्याहुः। उभयोरपि तावत्कर्मकर्मव्यतिहारादात्मनेपदनिमित्तं क्रमेस्तु वृत्तिसर्गतायो
पातिबोध्यम्। स्नुक्रमोरुदात्तत्वादिटिसिद्धे नियमार्थोऽयमित्याह। अत्रैवेति। अनात्मनेपदे किम्। उपस्तोष्यते जलेन। उपक्रंस्यते।
निमित्त इति किं। स्नौति। तिस्न वितासइवाचरतिस्न विधाय त्वेइह क्यङ् आत्मनेपदनिमित्तं न तु स्नौतिरित्याहुः। लुङ्। लिटांधस्येति। लिलिहे। लिलिहि
ध्वे। लिलिहिध्वे। अथ कथमिति। शानच् वा वाच्यमिति शंकितुराशयः। क्रुपीशब्दे उंदेच। उदः। क्रूदने। लिङ्क्षे ओष्ठाय इः। पेपापते। दाप
जनदीपीदीप्तौ। जनी प्रादुर्भावे। बुध अवगमने। पूरी आप्यायने। एते दिवादयः। चिणो लुक्। परस्य लुकस्यादिति। तशब्दस्येति केचि

त्वबोधिनी
॥२८॥

सध्यतेतदार्थिकार्थकथनम्।तशब्देपरतः चिणिविहितेचिण्परस्यजायमानोलुक्प्रत्ययस्यलुकुश्लुलुपइतिवचनात्तशब्दस्यैवेतिस्पष्ट
त्वात्।अयमिति।वेवधातुः।भाष्यविरुद्धमिति।यदिसोपदेशःस्यात्तदास्मायतीत्येवायमपिषोपदेशलक्षणेपर्युदस्येततदकरणान्नास्ति
सोपदेशइतिभावः।प्लुङ्गताविति।केचित्प्लुवेतिधात्वंतरमित्याहुः।तदिमनोरमायांदूषितं।प्लुवेतिधात्वंतरत्वेविभाषाङिरुप्लुवोरित्यत्रप्लुव
पक्षेघञ्विधानंव्यर्थंस्यात्।प्लुवेसेतस्माद्घञिआप्लावशब्दस्यसिद्धत्वात्।तथास्त्रेवतिश्रणोतीतिसूत्रेणप्लुवतेरभ्यासोकारस्येत्ववि
धानमपिव्यर्थंस्यात्।तङ्कपक्षेअपिप्लुवदितिरूपसिद्ध्यर्थंक्रियतेतच्चरूपंप्लुवधातोःसन्यतइत्यनेनसिद्धमितिकिंतदुपादानेनेति।मम
न्वेति।यस्यहलइतिलोपस्तुनभवतियस्येतिसंघातग्रहणमितिसिद्धांतितत्वात्।वर्णग्रहणेतुआर्धधातुकग्रहणपरिभाषायाअप्रवृत्त्यापुत्रका
म्यत्यादावपिल्लोपःस्यादितिदिक्।लुङि।माव्यिता।आशिषि।मव्यात्।हलोयमामितिधातुयकारस्यवालोपः।स्य।क्ष्यईर्क्ष्यईर्क्ष्य।णकि।
सुषूक्ष्यी।ईर्क्ष्यांचिकार।ईर्ष्यांचिकार।एभ्यःक्विपिलोपोव्योरितियलोपेस्कोरितिकलोपेजश्त्वचर्त्वयोः।स्ईट्ईट्।संयोगांतलोपस्तु
हन्नभवतिरात्सस्येतिनियमात्।स्क्ष्अदरीतवत्स्यतेतस्यापिस्ईट्इत्येवरूपं।हयगतौ।जहाय।हय्यात्।शि।थिलीकरणमिति।
सोममसिषुणोतीत्यादौतथादर्शनात्।सुरायाइति।तत्करणेसंधानंस्यात्।क्षिषवेइत्यमरोक्तेः।अंतोत्तंतस्या।यद्यवयववचनेनां
तशब्देनबहुव्रीहिणंचान्यपदार्थस्तत्पक्षेविशेषणेनतदंतविधेःसिद्धत्वादंतग्रहणमनर्थकम्।आश्वत्थीदिसत्वातिव्याप्तिश्च।समी
पवाचिनाअंतशब्देनषष्ठीसमासपक्षेअपिरणिश्चच्छुङ्गतिघत्तिव्याप्तिः।अंतास्यातश्लोःसमीपत्वात्।लंवतदंतश्चेतिसमीप
वाचिनांऽतशब्देनकर्मधारयपक्षेत्वंतशब्दस्यविशेषणत्वात्पूर्वनिपातःस्यादतआह।लुप्तषष्ठीकमिति।अंतशब्दःसमीपवाची ॥२८॥
सन्निप्रेत्याह।अंतःसमीपावीति।अतोवृद्धिःस्यादिति।इहअन्तइत्यस्यपतंचाद्यत्वादिकंस्वीकर्तव्यं।अन्यथाप्रयोजनाभा

53

दिक्परिभाषानुपस्थाने प्यलोऽन्त्यपरिभाषयाऽन्त्यस्य स्यादिति भावः। यद्यपि अतो लस्येत्युक्तेऽपि लान्तस्याङ्गस्यातः सिचि परे वृद्धिरित्यर्थो लभ्ये
कृते येन नाव्यवधानन्यायेनेष्टं सिध्यति। तथाप्यङ्गस्य सिचि परे अतो वृद्धिरित्यर्थोऽपि प्रतीयेत। ततश्चाचल्लीदित्यत्रातिप्रसंगः स्यात्तद्वारणा
य सूत्रेऽतग्रहणं कृतमिति तदनुरोधेन अन्तःशब्दस्य समीपवाचित्वं मत इत्यस्य चावृत्तिः स्वीकृतेति बोध्यं। अन्तःसमीपवाचीति किं। अखोरम्।
अमीलीत्। ल्रान्तस्याङ्गस्य किं। चल आभ्युगमे। अचल्लीत्। अत्र आकारसमीपो यो लकारः स नाङ्गस्यान्तः यस्त्वङ्गस्यान्तः स तु नाकारस्य
समीपः। ननु ल्रेत्यस्य लुप्तषष्ठीकत्वाभ्युपगमेप्यन्तशब्दस्यावयववाचित्वं स्वीकृत्य अङ्गस्यान्तं यल्लरं तस्यान्तः तत्समीपस्यातो वृ
द्धिरिति व्याख्याने लतरत्वस्यावृत्तिर्नापेक्षितेति चेत्। अत्राहुः। हलन्त्यमिति सूत्रे मनोरमायां सामीप्यं षष्ठ्यर्थ इति पक्षस्य निराक
रणात्तदनुरोधेनात्र लरत्वस्यावृत्तिराश्रितेति। अत्र केचित्। आतो ल्रान्ते। ल्रेति लुप्तसप्तमीकं। अथवा अतो ल्रान्ते इति व्यस्त
मेव सूत्रं पठितुं शक्यं। तथा चाङ्गस्यान्तं यत् ल्रं तस्मिन्परे अव्यवहितस्यातो वृद्धिरिति व्याख्यानसंभवान्न तत्राद्याश्रयणक्लेशः। न चा
ङ्गस्य विशेष्यत्वे नैवान्वयो युज्यते ननु विशेषणत्वेन पदाङ्गाधिकारे तस्य च तदन्तस्येति परिभाषया अपदमङ्गं विशेष्यं सत्वतीत्यस्तिग्रा
यवर्णनादि इति वाच्यं।। अल्लोपोऽन इति सूत्रे अङ्गावयवो। सर्वनामस्थाने इत्येवं भाष्यकारादिभिर्विशेषणतया व्याख्यानात् विधिविशेष
णत्वेप्यङ्गस्य न क्षतिरित्याहुः। नेटीत्यादि। यद्यपि पुरस्तादपवादा अन्यायेन नेटीत्यस्यायेवादो न तु विकल्पस्यापि तथापि बाध्यसामान्य
चिंतायां च विषये शक्तसर्वं बाध्यत इति पुरस्तादपवादन्यायोऽत्र न प्रवर्तत इति भावः। मील संकोचने इति नेत्रसंकोचे तु प्रचुरः प्रयोगः।।
तिल गतौ। तिल स्नेहने इति चुरादौ। दल विशरणे। विशरणमवयवानां विभागः। धोर्ऋ। धोरितकमश्वानां गतिविशेषः। निष्ठान्तात्संज्ञा
यां कन्। लरा। छः मनाक्पटनं गतिः। छपगतिः। क्मर ~~हूर्छनं~~। हूर्छनं कौटिल्यं। ष्ठिवु निरसने। अस्य ल्युटि ष्ठेवनं। ष्ठीवनाम कु
शब्दस्तु र इत्यस्य पस्य न निक्षिपेदिति पृषोदरादित्वात् सक्षेरो दीर्घ इकार इत्याहुः। सन्तोलिग्रोर्जैः। सन्तोलिरूर्निमित्त इति। यदि तु सनिलि

टिचपरेयोऽस्यासदितिप्राचाव्याख्यानमाश्रित्येतत्दायेनन्तव्यवधानन्यायेनप्रवृत्तिव्यवधानंसोढव्यमेवपरंतुयङ्लुगंतात्सनिजेऽपि
मतीत्यत्रकुत्वंस्यात्।नचतन्माधवग्रंथसंमतमितिसाव:। घिन्विकृण्व्योरच। अतोलोपस्यस्थानिवत्त्वात्सकारस्याकारादेशश्चकारेणतुप्रत्ययो
नुलुप्यते। बोपदेवेनतनयोस्तनादित्वंस्वीकृतंतन्मतेचकारंविनाप्युप्रत्ययस्तासि। अतोलोपइतिपदद्वयस्यापिउपदेशेऽदंतत्वंनास्तितथाप्याईधा
तुकोपदेशेतदस्त्येव। धिन्विकृण्व्योरचेतिसूत्रस्यादकारादेशेकृतेचानुबन्धस्यपश्चाज्जायमानत्वादितिभाव:। लोपश्च।य:प्रत्ययोकारस्त्री
असंयोगपूर्वोपि:ऽत्स्यइतिप्रत्ययविशेषणंतुनकृतं। अक्ष्णुव:। अक्ष्णुमइत्यादावनिष्टत्वापि अश्नुवहेइत्यादावतिप्रसंगात्। एवमुतश्चे
तिसूत्रेपि अक्ष्णुहीत्यत्रदोषाभावेपि अश्नुहीत्यत्रातिप्रसंग:स्यादित्यसंयोगपूर्वेतिप्रत्ययविशेषणंनकृतमित्याहु:। अश्नुहीतिपरस्मै
पदंयद्यपिलोकेदुर्लभंतथापिवदादिन्यायेनतत्प्रयोगस्यसाधुत्वंबोध्यम्। आप्नुहीतिपाठस्तूचित:। कृवि। अयमिति। कृणोतीत्यादिरिति
र्थ:स्वादौहिकृवीत्ययंधातुर्नपठ्यते किंतुक्षुत्रहिंसायामितितस्यचपरस्मैपदेषुसार्वधातुके कृणोतीत्यादीनिरूपाणितुल्यानीतिफलितो
र्थ:। अथरक्षण। एकोनविंशतिरर्था:। कोतिःरोषणादौक्षिप्तेजरस्यर्थ:। तद्विरिक्षाणाशा:। स्वाम्यर्थ:स्वामि हिंसाहननं। आदानंग्रहणं। नचा
यदानमेवार्थोस्त्वितिवाच्यं। सागेवकृतौ। यहेवघेवइत्येवमर्थानांविशिष्यबोपदेवेनगणितत्वात्। सिञ्। याच्याप्त्ताछा। तस्ययोऽर्थ:
स्वामीनुक्ते। शेऽअव्यक्तायांवाचिनीतिपठित्वारमाचपिसि क्लृप्तधातोरर्थोविंतिमन्यते क्लिशउपतापेइतिदिवादौक्लिशूविबाधनेइतिक्र्या
दौ। दाप्लापंचाथ। ईषगतौ। गुरोश्चहलःइत्यप्रत्ययेटाप्। ईषामनसईषामनीषा। शकंध्वादि। मनीषामस्तीतिविष्टमनीषितं। प्रीत
पदिकाद्धालर्थेबहुलमिष्ठवच्चेतिणिचितरसोलक्त:। इषउञ्छे। मिरितितुपरस्मैपदिषु। कस्वादयश्चपः। इषगतौ। दिवादि:। इषइच्छायांतु
दादि:। इषआभीक्ष्ण्ये क्र्यादि:। कासांचकारेति। कास्प्रत्ययेस्याम्। भासदीप्तौ। अस्यसदित्वंव्याजातेरिव तउमात्रफलकं। घ्रा ।।२८
जभात्यादिनोपधाह्रस्वस्यविकल्पितत्वात्णत्वसकोटित्वे। लिणिन मित्त्वादेशादित्वाभावादेत्वं निसे। आङ:शासि। शासस्तु।वि

तिङ्कुपरस्मैपदिषु वक्ष्यते। ग्रसु ग्लसु। उदितो वेति क्त्वायां वेट्। ग्रसित्वा। ग्रस्त्वा। यस्य विभाषेति नेट्। ग्रस्तः। वेहृ जहृ बाहृ। आद्य इति। वेहते इति प्रत्यये वहेतृश ह्यो। निपातः। पोटायुवतीति सूत्रे इति भावः। वेहद्गर्भोपघातिनी। अंत्य इति। बाढशब्दस्य तुडप र्यायस्य लुब्धस्वांतध्वांतेति निपातितस्य बाढशब्दस्य च निर्विवादत्वादिति भावः। दंत्योष्ठ्यादीति। उत्तावपीत्येतु वक्ष्यते। अनुदात्तेत्त्वप्रयुक्त मात्मनेपदमनित्यं। तेन ववाह रुंरुपुरुवास्ते जाताः सहस्रशः इति सिद्धं। न चात्रार्थसंगतिः। धातूनामनेकार्थत्वात् अस्य वर्णनार्थकत्वे बाधकाभावादित्याहुः। ऊहा कथं तर्हि अनुक्रमप्यूहति पंडितो जन इति। अत्राहुः। अनुदात्तेत्त्वलक्षणस्य तङो नित्यत्वाभावान्न दोष इति। गाहू। ऊदित्वादिड्वा। इडभावे ढत्वमेकाच इति भष्भावः। षढोः कः सीति कः। कात्परस्य षत्वं। जघाक्षे। विभाषेटि इति मूर्द्धन्यः। जघाढ्वे। जगाहिध्वे। इडभावे तु भष्भावः। ढो ढे लोपः। जघाढ्वे किं। ऊढः। इह पूर्वत्र लोपो मा भूत्। कृते तु ढग्रहणे ष्टुनाष्टुरित्यस्याश्रया सिद्धत्वं भवतीति सिद्धमिष्टमित्याहुः। अगाढ इति। झलो झलीति सलोपः। रुत्व घत्व ष्टुत्व लोपाः। सिज्लोपात्पूर्वं भष्भावस्तु असिद्धत्वात्। नन्व कृतेपि सलोपे प्रत्ययलक्षणेन सिच्परत्वात् भष्भावो दुर्वार इति चेन्न। वर्णाश्रये प्रत्ययलक्षणाभावात्। अन्यथा गवे हितं गोहितमि त्यत्र वादेशः स्यादिति दिक्। जगृहे इति। कित्वात्परत्वात्तु गंतेति गुणे प्राप्ते उपधेस्य इति वार्त्तिकात् कित्वगुणाभावः। शल इगुपधा। शल इति धातोर्विशेषणान्न दंतत्वासः। शल इति किं। अतप्त। इगिति किं। अगाढ। अनिट्किं। औहिष्ठावतस्याति। अनाहाविति। अगाक्षि। प्रत्ययोत्र विशेष्यः। तङीति तु केषांचित्सलोपस्तस्य काशिकादावनुक्तत्वादित्याहुः। अन्ये तु लुग्वा दुहस्यत आत्मनेपदे इत्यपकर्षणाच्चङीति लभ्यते। तेन दृशाः स्कण [illegible] क्स इति वार्त्तिकोक्तः क्सस्य प्रत्ययस्य लोपो न भवति। अदृक्षाः। अन्योदृक्षाः इत्याहुः। घुषि। अ लुङि। अघुंषिष्ट। अघुंषिषातां। अदुपधपाठे तु। अघाषीत्। अघषीत्। अतह्लादिति। नेटीति वृद्धिनिषेधः। इडभावे त्वताक्षी

त्प्रणिक्षतीति। उपसर्गादसमासेपीति नित्यं णत्वं। कानिंसनिक्षनिंदामिति तु कृद्विषयं। ण्वुल्तृचौ। प्रणिक्षकः। प्रतिनिक्षकः। प्रणिक्षिता।
प्रतिनिक्षिता। अवक्षेत्यादि। सूर्क्षणमादरः। ततोन्यदसूर्क्षणमित्यमरग्रंथार्थः। यदि तु सूर्क्षणमनादर इत्युच्येत तर्हि असूर्क्षणमवज्ञापर्या
यो न स्यादिति भावः। काक्षि। कांक्षा इच्छा। द्राक्षि। ध्राक्षि। ध्वाक्षि। घोरवासित घोरशब्दः। वास शब्दे। ध्वांक्षतीति ध्वांक्षः। आक्षि धातोर्गु
रोश्च हल इत्यप्रत्यये आक्षा। यवादिगणे निपातनान्नलोपः। आक्षामन् इह मतोर्वत्वं तु न भवति आयवादिभ्य इत्युक्तेः। तूष तुष्टौ दिवा
दौ। कुकुस्त्वोपधः। मूष स्तेये। संज्ञायां धूनिमूषकः। न्यादौ तु हृस्वोपधोयं। रूष अलंकारे। अयं चुरादावपि। ईष उंछे। गुरोश्च हल
इत्यप्रत्यये ईषा लांगलदंडः। कषखष शिबेत्ययं मम निघ्नः। न तु रोधादिकरणवसंकोचे मानाभावादित्यभिप्रेत्योदाहरंतीति शेषः। आपि
स्पर्दितीषसह। इष इच्छायां। षह मर्षणे। लुषगा। ध्येरुष रिष हिंसायां। एषिता। एष्टा। सहिता सोढा। लोमिता लोमिजा। उवोजिपुर्णी
तीति गुणः। आ स्यास्यास्य सवर्ण इत्युवङ्। घुषु संघर्षे। त्वुटि घर्षणं। घस्लृ अदने। अयमिति। यघयं सार्वत्रिकः स्यात्तदा लिङ्घ्योपि
प्रयुज्येत। ततलिङ्घन्यतरस्यामिति विकल्पेनादेशविधानं व्यर्थं स्यादिति भावः। अत्रैव पाठ इति। ल्युटादौ परस्मैपदे पाठ इत्यर्थः॥
क्मरच्। ति। सृघस्यदः क्मरच्। नीतिसत्त्वे। सः स्यार्द्धधातुके। ससीति छेदः। सादौ किं। घस्मरः। आर्द्धधातुक इति किं। वस्मा आशिषाति। आ
शीर्लिङित्यर्थः। एतच्च कर्त्तरि प्रयोगमभिप्रेत्योक्तं। कर्मणि तु यावि क्विषयेप्रयोगो नेति बोध्यं। पुषादि द्युता। पुषधातुः श्यादौ दिवा
दौ क्र्यादौ चुरादौ च पठ्यते। यदि पुष पुष्टौ वि सौवादिकधातुमारभ्य गणान्गृह्णीत तदा धुनादिग्रहणमनर्थकं भवेत्। पुषेरुत्तरं च पु
तादीनां पाठात्। नापि क्र्याद्यंतर्गणः। तत्र हि पुष धातोरग्रे मुष स्तेये खच प्रसूत प्रादुर्भावे। हेठ च। ग्रह उपादान इति चत्वारः
पठ्यंते। यदि तु त एव धिच द्युतादिः स्युस्तर्हि लाघवार्थं लदित एव क्रियेरन्। ग्रहेः स्वरितेत्त्वेपि ल्ह कारणेवतन्निर्बाहः स्नेका
नुबंधासंगगौरवशंकाया अप्यभावात्। नापि चुरादिः। णिचा व्यवधानेन ततोऽनंतरस्य ल्हेर्च्लेरसंभवात्। अतः परिशेषात्

॥२१॥

57

दिवादय एव गृह्यंते इत्याह श्यन्विकरणपुषादेरिति। किंचित्तु दिवाद्यंतर्गण एव पुषादिर्गृह्यते व्याख्यानादित्याहुः। चुरादीनां सर्वेषां णि
ज्विकल्प इति पक्षे चौरादिकपुषादेरपि परः॥ अङः संभवतीति तेषामाशयः। नं दियृहादि पचादिभ्य इतिवत्सु सुवघुताद्यु दित इति सूचयितु
मुचितं। ननु पुषाद्यो द्युदादयश्च लृदित एव कुतो न कृता इति चेदत्राहुः। निरनुबंधेषु सानुबंधेषु च प्रत्येकं लृकारपाठे विपरीतगौरवं स्या
त्। न च अनुबंधांतरस्य प्रयोजनमात्मनेपदं न तु लृदित्करणेपि सिध्यतीत्यनेकानुबंधासंगगौरवदोषो नास्तीति सपि शक्यं। आदिना
मादिताम्र दितां च तेषु सत्वात्। लृकारेण तत्तत्कार्यालाभमनिर्वाहादनेकानुबंधासंगगौरवस्य दुर्निवारत्वादिति। जर्जचर्चझर्झ एषां परिभा
षणादिति: सहस्य थासंरव्यानादित्याहुः। परिभाषणं सनिंदोपालंभः। त्रयाणामपि चवर्गाद्यांतेषु पाठ उचितः न लिह ब्यांतेषु णिरास मा
धौ। समाधिरंतःकरणनिरोधः। श्रणे शब्द इति। उपसर्गादसमासेपीति णत्वं। र प्लुतो चेति चकारात् समाधौ। शाशाप्लुतगतौ। नशसदद
तिप्रतिषेधसूत्रे सांतस्य ग्रहणमिति सिद्धेत्य व्याचष्टे शशप्लुतेरिति। आचार्यानु शाशशप्लुतेरित्युक्ते तस्य युक्तमिति भावः। अचदत्तादिति॥
हंस्यते तिनवर्द्धिः। रहत्यागे। आर्यकृयाद्यावपि। दयमित्येति मिहाकरणेपि अयमेकीयमतो न पठितः। नेघ्रतीति। व्याख्यानमेवात्र श
रणं। माभवानुहदिति न मो मोगरत्याङ्भावः ई रितो वेत्यहुः॥ अथ घुतादिः॥ ॥ घुत दीप्तौ। घुतिस्वाप्योः स्वापाति णिजंतस्य ग्र
हणं। दिद्युतेरिति संप्रसारणे कृते संप्रसारणाच्चेति पूर्वरूपं स्वापेरुदाहरणं सुषुपायिषति। इह स्वापेर्णिजंतस्य। भ्यासनिमित्तप्र
त्ययेनानंतर्ये सति संप्रसारणमिष्यते तेनेह न। स्वापेरावुत्स्वापकस्तामिच्छतीति स्वापकीयति ततः सन् सिस्वापकीयिषति। घुद्
भ्यो लुङि। बहुवचननिर्देशात् शोडे रित्सूत्रे वतदादिग्रहणं। तदाह। पुषादिभ्य इति। घुतादिभ्य घटचेष्टायामित्यवधिकाः। ऊः सीत्स
त्रेव लुङीति सहाम्याः षष्ठ्यर्थे तसाशिश्रेयाह। लुङः परस्मैपदमिति। स्तामिद्यामिर्दुर्गुणः। क्षि वु कुमुच माभियतः। शिता स्तनुया
तो। तत्र शब्दासोरिच्चेति कर्मधारयात्सप्तमी ओगा। क्षित्तप्रत्ययस्तु विशेष्यस्तेन यस्मिन्विधिरिति तदादिविधिः प्रवर्त्तते तदाह

इसंज्ञक शर्करादाविति। आदिशिला सावादिति मिघीत। मेघृत इत्या। दौदिवा दिष्यु इति रपन आदिशिला गुणो सवस्येव। मि मिदे इती।
शिलीतिव इञ्झौ सिद्धस्यादेव गुणस्त्याप पेतस्थेरित्यादौ पिबादयौ पिरिति भावः। ञिष्विदा। अनिट्कारिकायां स्विद्यतिरित्ति श्यना नि
र्देशाद्यंसेट्। स्वेदितः। स्वेदिष्यते। ञिक्ष्विदा चेति। पूर्वयोरेवार्थयोरयमिति। बोध्यः। हरयेइति। रुच्यर्थानामिति संप्रदानसंज्ञायां
चतुर्थी। घुट परिवर्त्तनमिति स्यातो क्रमेण जुघुटे इति। असंयोगादिति कित्वाद्गुणाभावः। क्षुभ संचलने। संक्षुब्धनुगङ्गुति विप
र्यासोमर्थनं च। क्षोभते। क्षुभ्यतीति दिवादौ। क्षुभ्नातीति क्र्यादौ। नास्रसदिति। नास्रंसदित्यपपाठ एव। नचेदं ल्ङरूपं। तत्र
च परस्मैपदासंभवादिति भावः। वृत्त्यः। वृतादयः पंच। न वृद्भ्यः। गणकार्यत्वादुभयोर्ङ्लुक्प्रवृत्तिः। वर्त्स्यति। विवर्त्तिषति। स्यंदे
रूदित्वाद्विकल्पे प्राप्तइतरेषां नित्य मिट् प्राप्ते निषेधोयं। तङानयोरिति। जिगमिषिता। जिगमिषितारावि स्याद्दौतल्चिपरतः सनूङागम
सिद्ध्येगमेरिट्परस्मैपदेष्वित्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयतीत्यभ्युपगम्यते तच्चात्रापि तथैवानुवर्त्तते। यद्यपि
कारान्त्रयणात्तेन परस्मैपदाभावेपि तत्वि विवृत्सिता। विवृत्सितारा क्लिप्त्यत्रात्तोहेर्स्यैरितिहेल्ड् कित्वं विवृत्सेत्यत्र च सनइत्ती णिनषेधः
सिद्ध्यतीति भावः। अत्र भाष्यवार्त्तिकयोर्वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात्त्र निषेध इति स्थितं तेन विवर्त्तिषते। इत्या
दाविड्भवति विवृत्सितेवाचरति विवृत्सित्र्यतिरित्यत्रात्मनेपदोत्पत्तेः पूर्वं तत्समानपदस्थत्वाभावादन्तरंगोयं निषेधः प्रवर्त्तते।
स च पश्चात्तङ्कृतेपि न निवर्त्तते। चतुर्ग्रहणसामर्थ्यादिति। अत्र व्याचख्युः। पंचभ्यः कृपुतिव कृपुरुत्सितं। तासि चेत्येवं सूत्रं कर्त्तव्यं न ॥३०॥
च वृतादिष्वतिव्याप्तिस्तङानयोः सत्त्वादिति। अस्पंतेति। अत्रानिदितामिति लोपो न भवति सिलोपस्यासिद्धत्वेनानुपधात्वात्।
अनुविष्य। भेनिभ्यः। एभ्य इति। पंचभ्य इत्यर्थः। चलंसवसेवेविग्रहव्यप्राणिकर्तृकस्याप्यप्राणिकर्तृकत्वान पायादीति भा
जः। असमर्थसमासश्चेद्वाक्यभेदापत्तिदोषाभ्यां गस्यगतिपुष्पोनस्तत्रे। भिन्नेतरत्याशयेनाहुप्राणिषु तेनेति कापि

59

कॢप्सामर्थ्ये। त्साध्यकॢप्तांव्याख्यामाह। कॢपउ इति। कॢपेरोऌदित्वर्चानुपाठस्तुनादर्त्तव्य इति घनयो। कॢपेर्लकारस्येत्यादिना। वर्णैकदे
शस्यवर्णग्रहणेन। नायहणादाहरे फलद्धराइति। औरेवंचात्रकॢपेसस्यावृ त्तिरवश्यंस्वा कर्तव्या। तथा चलुटिचकॢपइत्यादिसोत्रनिर्देशोपिप्रप
पद्यत इतिभावः। तासिचकॢपः। चकारात्साधार्द्धधातुकंगृह्यते। कॢप्सीष्टेति। लिङ्सिचावात्मनेपदेष्विति कित्वान्नगुणः। चकॢते। चलुक्तैने
इत्यस्मात्क्विप्। त्रिभिलरासिभामइत्यस्यानंतरंघटादयः षितइत्युक्तेसाल्कृरत्यंतोस्त्वयोदशैव षितो ननु फणांताः सर्वेपीति सिद्धांतः। यापिफल
वजातिपस्यर्थमाह। षितश्चेतिप्रयोजनंतु षिद्भिदादिभ्यइत्यङ्। यापाघटा व्यथेति रूपसिद्धिः। घटत्वेष्टापयां। ये धातवोन्यत्राधीतास्तेष
मिहपाठोयं नियमाय। ये त्विहैवपठ्यंते तेषामुपसर्गादिना अर्थांतरपरत्वेपि मित्वमस्त्येवेति धातुवत्यादिषु स्थितं। तदेतद्ध्वनयन्नु
दाहरति। विचटयतीति। व्यथोलिटि। हलादिःशेषापवादइति। हलादिशेषबाधकमिणादितिभावः। एवंचोत्सर्गसदेशत्वापवादइतिपर
स्यैवसंप्रसारणंभवति। नपूर्वस्येति कैयटः। घुत्वस्यानसंप्रसारणइति मिषेधोवचनापेक्षितः। केचित्तु हलादिःशेषेण यकारनिवृत्तावपिव
कारस्यसत्त्वात्सूत्रमिदं सावकाशमिति अपवादत्वंनसंभवतीति। किमत्वासंप्रसारणंतदाश्रयंच कार्यंबलवदितिवचनाद्धलादिःशेषं
बाधित्वापरस्यसंप्रसारणेपूर्वस्यनि●षेधः संप्रसारणंतदाश्रयंचे●तिवचनाभावेतुव्यर्थं। लिटि। नि संप्रसारणस्य धातुविशेषत्र
ग्रस्यपविशेषाश्रयत्वेन इग्यणइतिसंज्ञाविशेषद्वयाश्रयत्वेनचबकूपेश्चस्यबहिरंगत्वात्संप्रसारणंबा। धित्वाहलादिशेषजातेयका
रस्यसंप्रसारणंस्यादित्याऊः। यस्येति। संप्रसारणस्याभ्यासांतर्गतयकारनिवृत्तेरपवादत्वंननुयकारनिवृत्तेरितिभावः। लिटी
तिकिं। विव्याधीषतो। इहसमतइतिरले। वाव्यध्यते। वाव्यधीति। कॢपकॢपायांगतो। चकाराभावेपीहार्थरूपमित्सवबोध्यमि
त्याऊः। कॢदिकॢदि। कॢंस्यति। अकॢंदि। अक्रांदि। कॢंदः। क्रांदः। कॢंदं। मित्वरा। आस्तिमिहव्यर्थंहस्वोच्चारणेनापि आत्मनेपदसिद्धेः।
नचनिष्ठायामादित्वस्येतिइट्। अतिषेधार्थमितिशंक्यं। रुष्यमत्वरइतिनिष्ठायामिस्येवविकल्पितत्वात्। रूप्णः। त्वरितः। ज्वररोगे।

णौ ज्वरयति। अज्वरि। अज्वारि। ज्वरंज्वरं ज्वारंज्वारं। गड सेचने। णौ गडयति। अगडि। अगाडि। गडंगडं। गाडंगाडं। एवमन्यत्राप्यूह्यं।
हेड वेष्टने उत्सृष्टवा तुवं घनेरिति। तेन वेष्टत इति। तेन मितां ह्रस्व इति न प्रवर्त्तत इति भावः। निपातनात्परत्वादिति। निपातनविषयभूत
मितां ह्रस्व इत्यस्मात्परत्वात्। मितां ह्रस्व इतीदमेव निपातनेन बाध्यते न तु नतः परं चिण्णमुलोरित्येतदित्यर्थः। वन च। संभक्तौ पठितस्य
हिंसार्थ्याया। मित्त्वार्थोऽनुवादः। वनति। णौ वनयति। अवनि। अवानि। वनंवनं। वानंवानं। तानादिकस्येति। वनु याचने इत्यस्येत्यर्थः।
सामर्थ्यादिति। अनुवादे तु तत्र कृते नोदित्त्वेन क्त्वायामिड्विकल्पस्य निष्ठायामिट्प्रतिषेधस्य च सिद्धेः पुनरुदित्करणं व्यर्थं स्यादि
ति भावः। वनुतः। वनतीत्यादीति। णौ वनयति। तानादिकस्य तु वनुते। वानयति। मित्त्वविकल्प इति। ग्लास्नावनुवमां चेति गणसूत्रेण।
णप्रत्ययायमिति। ज्वलितिकसन्तेभ्यो ण इति ज्वलादिषु णप्रत्ययार्थं। दॄ भये। धातोरनेकार्थत्वाद्भयार्थकत्वं। दृणाति। दरयति। तच्चे
तीति। माधवस्यायमाशयः। सूत्रे दीर्घान्त एव पाठः सर्वसंमतः। घटादावपि दीर्घान्त एव सर्वैः पठ्यते। यद्ययं ह्रस्वान्तोऽभविष्यत्तर्हि शॄ
दॄप्रां ह्रस्वो वेति ह्रस्वविकल्पविधायके सूत्रे दृग्रहणमनर्थकं स्यात्। धातुद्वयेन दद्रतुः ददरतुरिति रूपद्वयसिद्धेः। न च दॄ विदारणे
रूपद्वयलाभाय दृग्रहणमावश्यकमिति वाच्यं। धातूनामनेकार्थत्वात्समीहितसिद्धेरिति। नॄ नये। नृणाति। नरयति। अनारि।
अनारि। नरंनरं। नारंनारं। श्रौरतीति। अयं हि वक्ष्यमाणः सौवादिकः। लुग्विकरणेति। अत्र व्याचक्षते। स्वरतिसूतीति सूत्रे सूङ् इ
ति पठितेऽपि द्वयोर्ग्रहणे सिद्धे सूतिसूयत्योः पृथग्ग्रहणं व्यर्थं सदिमां परिभाषां ज्ञापयति तत्र लुग्विकरणं बलीय इति। परे त्वेवं
किं न स्यादिति शंक्यं। दृष्टानुरोधात्सूत्रे सूङ् इति पठिते स्वरतिसाहचर्यादलुग्विकरणस्यैव ग्रहणं स्यान्न तूभयोरित्य

पि न शंक्यं। साहचर्यस्यानित्यत्वात्। तस्मात्सूयग्रहणं व्यर्थं सत् ज्ञापकमेवेति। लक्षणप्रतिपदोक्तपरिभाषा तु न्याय्यासि
द्धा। लाक्षणिकं हि विलम्बितोपस्थितिकं। प्रतिपदोक्तं तु शीघ्रोपस्थितिकमिति। पादिरिभाषाभ्यामिति। यद्यपि उक्तपरिभा

पयोः परस्परविरोधेनाप्रवृत्तावपि रूपं सिध्यति। तथाप्यविशेषात्तयोः प्रवृत्तिरप्यत्र युक्तैवेति भावः। मारणतोषण। निशामन [illegible]
मित्यस्य शाम आलोचनमित्यस्मान्निष्पन्नत्वाच्चाक्षुषं ज्ञानमिति। एष्वर्थेष्विति। पशुं संज्ञपयति मारयतीत्यर्थः। विसुं विज्ञपयति
संतोषयतीत्यर्थः। संज्ञपयति रूपं माधवमते दर्शयतीत्यर्थः। मतांतरे तु बोधयतीत्यर्थः। प्रज्ञपयति शरं तीक्ष्णीकरोतीत्यर्थः। स्यादेतत्।
निशामनं ज्ञापनमात्रमिति वृत्तोमते श्लाघह्नुङ्स्थेति सूत्रे ज्ञीप्समानो बोधयितुमभिप्रेत इति व्याख्याग्रंथः संगच्छतां नाम। माधवमते तु
न द्वैरूप्यस्य का गतिरित्यत आह ज्ञप मिच्चेति। ज्ञापनमिति। एवं च वृत्तिग्रंथो माधवमतेऽपि संगच्छत इति भावः। मारणादिकं चेति। तच्चुग
णांतरात्तिप्रायेणोक्तं। चुरादिषु तु ज्ञप मिच्च अयं ज्ञाने ज्ञापने च वर्त्तत इति वक्ष्यमाणत्वात्। कथमिति। ज्ञा धातोर्ज्ञप धातोश्च णौ ति
ताद्रूप्येन न भवितव्यमिति भावः। मित्त्वाभावादिति। एवं च बोधने ज्ञा धातोः ज्ञापयति। ज्ञप धातोस्तु ज्ञपयतीति रूपद्वयं माधवम[ते]
बोध्यं। छदिरूर्जने। ऊर्ज बलप्राणनयोः। अत्र छदिर्मित्तु। चुराद्यंतर्गणो यो ज्ञादिकः स्वार्थे णिज्भाव इति। आधृषाद्वेति वैकल्पि-
कत्वादिति भावः। लडयति जिह्वामिति। जिह्वां ज्ञापयतीत्यर्थः। जिह्वयेति। जिह्वया पदार्थांतरं ज्ञापयतीत्यर्थः। जिह्वाव्यापा
उदाहरणमाह। लडयति शत्रुमिति। शत्रुमुद्दिश्य गालनादि करोतीत्यर्थः। लडयति दधीति। उन्मथ्नातीति विलोडयतीत्यर्थः। केचित्तु
जिह्वारे लडयति दधि। उन्मथने तु लडयति शत्रुमिति व्यत्यासेन योजयंति। लाडयति पुत्रमिति। शर्करादिदानेनानुकूलयतीत्य-
र्थः। ध्वनिरणी उदाहृताविति। ध्वनिरव्यवधानेनोदाहृतः। रणिस्तु कणगतावित्यत्रेत्यर्थः। स्वन अवतंसने। अवतंसनं भूषणं। स्वन-
यतीति। भूषयतीत्यर्थः। अस्वानीत्। अस्वनीत्। अस्वनि। अस्वानि। स्वनं स्वनं स्वानं स्वानं। घटादयो मितसंज्ञा इत्यर्थ इति। अ-
म२ न्ये तु मकारानुबंधा इति व्याचक्षते। घटं चेष्टायामिति। प्रत्येकपाठे गौरवाभावारेकत्रैव सर्वेषां मित्संज्ञा मकारानुबंधकत्वं चाने-
न सूत्रेण विधीयत इति भावः। जनी जृष्। जनी प्रादुर्भावे। जृष् वयोहानौ। क्नसु ह्वरणदीप्त्योः। त्रयोऽपि दिवादयः। रंज रागे देवादिकोऽपि

बालबोधिनी
॥३२॥

वादिकच्च। अमंताः क्रमिगमीत्याद्यः। जनयति। जरयति। क्नसयति। रजयति मृगान्। रंजयति पक्षिणः। क्रमयति। गमयति। रमयति। ज्व
लकृत्वा। एषां मित्त्वमिति। मितां ह्रस्व इत्यनुवृत्तस्येह ह्रस्वे सावधानता। अनुपसर्गाद्वेति तु षष्ठ्यर्थे पंचमीत्येवं क्लेशेन व्याख्येयमिति भावः। नमोनु
पसर्गाद्वेति पाठांतरं तत्र न कश्चित्क्लेशः। आमविलोषिति। ज्वल दीप्तौ। ह्वल ह्मल चलने इति त्रयाणां पूर्वं पठितत्वान्नमेस्तु आमंतत्वादिति
भावः। कथं संक्रामयतीति। क्रमेर्नोदात्तोपदेशस्येति वृद्धिप्रतिषेधात् घञि क्रम इत्येव भवति न तु क्राम इति पूर्वोक्तसमाधानस्यात्रास
म्भवात् पृथक्प्रश्नः॥ व्यवस्थितविभाषेत्यादि। कृ चिण्णौ मितां ह्रस्वो न प्रवर्त्तत इति भावः। वृत्तिकृदिति। केचित्तु घञंतात् क्रमशब्दात्स्वा
र्थेऽणि क्रामशब्दं स्वीकृत्य तस्मात्तत्करोतीति णौ संक्रामयतीति समादधे इति भावः। इतरयोः अन्तरितावनोः पूर्वपाठात् वमेरमंतत्वा
च्चेति भावः। ग्लापयति। ग्लपयति। स्नापयति। स्नपयति। वनयति। वानयति। वमयति। वामयति। शाम्यतिवदिति यथा शाम्यति निशा
मयतीत्यादौ दर्शने प्रयुज्यते तथा चुरादिः शमधातुरपि श्रवणेक्षविषयतीत्यर्थः। यमोऽपरिवेषणे। पर्युदासेतरिति। यम उपरम इत्यस्य धातोः
भोजनातोन्यत्रा भोजनार्थद्रोणयासस्त्रां योयुजितियुजंतोशेषः। परिवेषणमिह भोजनानुकूलव्यापारः ततोन्यस्मिन्नर्थे मित्त्वनिषेधः।
नियमन्निति। नियमवद्धब्दास्मि। चिविन्मतोर्लौकिकशतरि शत्रन्तस्य गुणवत्त्वेयं व्यासासः फलितइति। स्वाभिमतेऽपरिवेषणे आ
यमयति। परिवेषणे तु यामयति। ब्राह्मणान्। अवादिपूर्वस्य स्खदेरवस्खदयति। परिस्खदयति। अपूर्वस्य तु प्रस्खादयतीत्येवं
व्यत्यासो ज्ञेयः। उपेक्ष्यमिति। नपादम्येतिसूत्रेण आयामयत इत्युदाहृत्य वृत्तावुक्तेः। एवं हि निषेधानंतरपाठ उपपद्यते अन्यथा न
कमीसतः ज्ञागेकविसूत्रीं पठेदिति भावः। फण गतौ। फणति। लुङि अफाणीत्। अफणीत्। णौ तु चिण्णमुलोरिति वा दीर्घः। अफणि ॥३३॥
अफाणि। फणंफणं। फाणंफाणं। असंभवादिति। मित्त्वप्राप्तिं विना निषेधासंभवादिह नेत्येतत्तत्र संबध्यते। किंतु मित्संज्ञैवातिदे
नदाह फणयतीति। चतुः। सामर्थ्यादिति। फणादिषु पाठसामर्थ्यादित्यर्थः। तत्र लेहो। तिषत्वविधो हात्यर्थः। तथा च वित्तादौ। विला

63

ङ्म्यां। पूर्वपठितस्य तु विभाषा। विभाषा गम्यादिति सिद्धान्तीति भावः। अस्यमीदिति मां तत्वान्न वृद्धिः। अथ जक्षादिः। आत्वाली कू
दिति। अतो ल्यान्तस्येति वृद्धिः। वैकूव्य इति। वैकूव्यं सेव्य ईदृजोन नोद्धिग्नता। तथा च इति विबुधानुंलो व्यापारः। यत पुम्। मित्वादस्यादुत्वः
रः। अघ धातोरिति। एदित्वान्न वृद्धिः। एवं अपथात्। अमथा दिल्यस्यापि। कुपम। केचिदमुमुदितं पठित्वा वान्ता वामित्येत्तुदाहरन्ति। तन्तु वामदेवेन
विरुध्यते। तेन हि आदितश्चेति चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य स्वान्तवान्त इत्यत्र इडभावः साधितः। उदित्वे तु यस्य विभाषेत्यनेनैव वा
न्त इति सिद्धेस्तदसंगतं स्यात्। एवं च क्ताप्रत्यये वमित्वेत्येव साधु। निपातनादिति। अन्यथा उणे सति उद्वरणइति स्यात्। यद्यप्यर्थनि
र्देशः आधुनिकस्तथापि पृषोदरादित्वेनेत्वमित्यत्रैव तात्पर्यं बोध्यं। इत्याद्युदाहृतमिति। केमुष्य केचिदुधिरमित्यादिप्रयोगानुरोधेन
तथोदाहृतमित्याहुः। तन्तु वादित्वेन निषेधात् एचाभ्यासलोपो कथमिहस्यात्। तामिति चेदत्राहुः। नशसदस्वादिगुणानामिति सूत्रेतेपि
वेत्यकारान्तसंघातग्रहणेन इष्टसिद्धेरादिग्रहणमोपदेशिकप्रतिपत्त्यर्थमेकान्ता अनुबन्धा इति च स्वीक्रियते। तथा च नायं वादिः किन्तु वा
दिरिति। अन्ये तु वमेरादौ लोपाभ्यासलोपेन मकारः श्रूयते तत औपदेशिकत्वान्निषेधो नेत्याहुः। अम च लने। मंउ ना कारेण वल
नमेवलनमेव धात्वर्थो न तु चलनमात्रं। तदभावे वृद्धिशेष्यकारस्य कारकृत्वाच्च धात्वर्थः। अत्तिं परस्यन्नजतमिति। भ्रमतीति प्रयोगा
त्। उदित्वे वेति क्त्वायां वेदं। भ्रामित्वा। भ्रान्त्वा। यस्य विभाषेति निष्ठायां नेट्। भ्रान्तः। नन्वस्य ज्वलादिगणे पाठः किमर्थः। न चात्रण
प्रत्ययार्थमेव पाठ इति वाच्यं। अपवादे राहुतिगणत्वाद्प्रत्ययेनापि भ्रमरइति रूपसिद्धेः। नोदात्तोपदेशस्येति वृद्धिनिषेधात् णप्रत्य
ये अप्रत्यये च रूपस्य तुल्यत्वादिति चेदत्राहुः। पदिपवादिसादप्रत्ययः स्यात्तर्हि भ्रमरइत्यत्र अचकावशक्तावितिनञः पर
मन्तोदात्तं स्यात्। णप्रत्यये। सिद्धतत्पुरुषे तुल्यार्थ इत्याद्यात्तमेव भवतीति वाच्यं भ्रमुऽत्रसा। अत्रात्त विभाषेयं। आप्नमीदिति।

मांतत्वान्न वृद्धिः। अक्षारीदिति। हलंतलक्षणाप्राप्तवृद्धेर्नेटि। ति निषेधे अतो ल्रांतस्येति वृद्धिः। षह। अपराधे सत्यपि कोपानावि
ष्करणं मर्षः। सहिवहो। इह रेफलोपस्यासंभवात् ढ्रलोपे पूर्वस्येत्यतो ढ्रलोप इत्यनुवर्त्तते। तदाह ढ्रलोप इति। ढ्रलोपे किं। सहते। व
रुते। सोढः। षत्वं नेति। न रपरेति सूत्रान्नेत्यनुवर्ततेइति भावः। दिवादीनां। सिवुसहसुट्स्तुस्वंजां। सिवादयः। पर्यषीव्यत्। प
र्यसीव्यत्। पर्यकरोत्। पर्यस्करोत्। न्यष्टौत्। न्यस्तौत्। व्यष्वजत्। व्यस्वजत्। रमु क्रीडायां। अमुमुदितं मत्वा रंत्वा रमित्वेति केचि
उदाजह्रुः॥ तन्माधवादयो न सहंते तथा च क्त्वायां रत्वेत्येव साधु। रेमिषेइति। क्रादिनियमादिट्। पचाद्यचि टाप्। रमा। घञि तु रामः।
अमंतत्वेन मित्वात् णौ ह्रस्वः। रमयति। षद्लृ। विशरणमवयवानां विश्लेषः। अवसादनं नाशः। पाघ्राध्मा। पापाने। पा रक्षणे इ
ति तु न गृह्यते लुग्विकरणत्वात्। द्रशीति केषांचित्पाठस्तत्र स्व जिघ्रशोरित्सम्। अचार इत्यादौ च्छादेशा धसावइवसोत्रत्वस्य स्या
देशाभावइति बोध्यं। दृश्यतेइति पाठस्तु निर्दुष्ट एव। पादीनामिति। एकादशानामेषां यथासंख्यं एकादश पिबाद्यादेशाः स्युरि
त्यर्थः। ष्ठिवुक्लमुचमामित्यतः शितीत्यनुवर्त्तते स च कर्मधारयइत्यभिप्रेत्याह। इत्संज्ञकशकारादाविति। शकारादाविति किं। पपौ।
जघ्रौ। दध्मौ। शितीति बहुव्रीहिरित्यभ्युपगमे त्विह पिबाद्यादेशाः स्युरेव। सेदिथेति। उपदेशेऽत्वत इति क्रादिनियमप्राप्तस्ये
टो निषेधे पि भारद्वाजनियमादिट्। सदेः परस्य। सदेरिति षष्ठी। फलितमाह। अभ्यासात्परस्येति। स्थादिष्वभ्यासेन चेति प्राप्तिः। ॥३३॥
लिटीति किं। निषिषत्सति। सदिस्वंज्योरिति वक्तव्यारूढोपि पाठ इह उपेक्षितः भाष्याननुगुणत्वात्। निषसादेति। सदिर
प्रतेरित्यत्रापि अप्रतेरिति पर्युदासाश्रयणात् ससादेत्यत्र अभ्यासस्यापि षत्वं नेति। बोध्यं। शद्लृ विशीर्णतायामिति वक्तव्ये शा॥

नेरित्युक्तिर संगतेत्याशंक्य कथं चिहसाधत्ते शातनं हिनोति। शदेरेच ह्रिणि विशदेरगताविति तत्वे ल्युटि च शातन मिति रूपं तथा चा
स्यैव धातोरिदं रूपं प्रसिद्धं चेत्य सिद्धेस्तन्निर्देशः कृतः। तथा गम्लृ गतौ। उप्च षु पाक इत्यादाविति भावः। कुचँ संपर्चनादौ कु[illegible] चशब्दे।
नारे इति च चगदृयांतेषु पठितस्य पुनरिह पाठः संपर्चनादावेव ज्वलादिलगयुक्तोणप्रत्ययो यथा स्यादिति मनोरमादौ स्थितं। अत्र नव्याः।
अनेनैव ग्रंथेन पाणिनिनापि क्लचिल्क विदर्थनिर्देशः कृत इत्यनुमीयते। अन्यथा अत्ययं धस्वा रस्य धंगापुत्ते रित्याकुः। बोधितेति।
बुध्यते स्व निद्रा दिकासु पठितत्वादयं सेडिति तावत्। अकासीदिति। हलंतलक्षणायावद्धे नेटीति निषेधप्रतो हल्वादिरिति वेक
ल्पिका वृद्धिः। वदिति। अत्र नव्याः। ज्वल्विति कसंतेभ्य इति निर्देशाद्वल्करणमिहानार्षमित्यनुमीयते। अन्यथा ज्वलादिभ्यो णर
स्यैव सत्त्वये दित्याकुः। जि चु गतौ। अनिदितामिति न लोपः। अ चयात्। अ लीलेकीयमते तुरु दित्वादन्यात्। से घ संगमे च। चुम
वोक्तोऽर्थः। अजायै गृह मेधिनामित्यत्र गरुदे दरि मेधंते संगछंत इति विग्रहः। खुप्पनाज्ञा विति णिनिः। श्वष्ट। क्रुंदन मिति। आर्ऽइस्
व इत्यर्थः। उदि चात्का। यांवेद्यट्। शर्दित्वा। छु छर्द। उ बुंदिर। नंदित्वा। बुंधी निष्ठायां वुन्नं। निशामने चाक्षुषे ज्ञानं। विरा इत्याद
यः पंचार्थाः। वा घ सांउ स्पवा वादनार्थ ग्रहणं वादिचय ग्रहणं। वेणिः। वेणी। वेणुरित्यादि रूपाण्यस्यैव धातोः। नांतोपीति। उतमा
नामक्षिषमन्त्ववेनदित्स चनांत दर्शनादिति भावः। खनेः। खनित्वा। खात्वा। निष्ठायां खातः। गम हन। अचि अनुधातु भ्रुवामि
मित्यतो चास्यनुवर्त्तने। ऊरः उपधाया गोहः इत्यत्र उपधाया ग्रहणं च तदाह। एषामुपधायाः इत्यादि। जग्मतुः। जग्मुः। जघ्नतुः जघ्नुः।
जसेजने। जसतु जक्षुः। ज्ञान इति किं। अगमत्। चीव। चीवरं वस्त्रं। चीवरपीवरमीवरेत्युणादिषु निपातितोयं। अ ग्र गतौ।
चित्वा गेतुं नित्यमात्मनेपदी गत इति मनोरमा। न कुत्रापि [illegible]गत इति धिंत्यैव सा। अव्ययात् इति प्रांतत्वान्न वृद्धिः। स्पराबा

घनस्पर्शनियोः। णि आ ति चेऽश्च ङ अपस्पसात्। अस्य दत्तरग्रपे इत्यादिनाभ्यासस्यात्वं। सन्वादित्वापवादः। पस्पशा। यङं तादविषयेऽपि
चेति लुक्। अजाघतइति। पदाघोः कितइतीत्यभ्यासदीर्घस्तुन भवतीसंज्ञापूर्वकविधेरनित्यत्वादित्याहुः। जपजभदहदशभञ्जपशां चेत्यत्र पसे
तिसौत्रो धातुः पसतीत्यादि। यङ्लुकोस्तु जपजभेत्यनेनैवाभ्यासस्य नुक्। पंपस्यते। लुकि। पंपसीति। पंपस्ति। कंद्वादिः। पंपस्यति। उदुप
धायाः। गुणङेनावीति। एतच्च गोहइति विकृतनिर्देशाल्लभ्यं। अचिश्नुधात्वित्यतोऽनुवर्त्तनाचाऽनेनांगा। श्नुप्रत्ययो विशेष्यते। विशेषणे
नतदादिविधि स्यादाहाजादावितिदंत्येतऊ ईति। दरूपादौ तङ् इत्यर्थः। अगुध। अधुक्षत। आदिग्ध। अधिक्षत। अलीढ। अलिक्षत इत्यादि।
रिङ्शयलिङ्क्षु। आयङ् पि कित्त्वीत्यतोऽनुवृत्तं पात्येतल्लिङ एव विशेषणं। शेऽसंभवात यकि तु वैयर्थ्यात्। तथाऽसार्वधातुक
योरित्यनुवृत्तमपि लिङ एव विशेषणमित्यभिप्रेत्याह यादावित्यादि। शे म्रि म्रि म्रियते। तुदादिस्परितिशः। यकि। क्रियते। म्रि म्रियते।
उश्चाइको झल्लित्यतो झल्ग्रहणं। लिङ्सिचावितिपूर्वसूत्रंचानुवर्त्तते। तदाह सवर्णादि इत्यादि। आभाषिइदिति। सिचिवृद्धिरितिवृद्धिः
ह्रस्वादंगात्। ऋस्थाः किं। अच्योष्ट। अंगग्रहणादिहरात्मस्ये सतः सस्येत्यनुवर्त्तनापिऽप्रत्ययस्यैवतत्रापीष्टं ला। सिचएवलोपो भवति।
तेनेह न। अस्तां। द्विषमां। केचिदिहऽअंगग्रहणाभावे अयाविष्टां अलाविष्टामित्यादावतिप्रसंगः स्यादित्याहुः। तदपरे न क्षमंते। सन्निपा
तपरिभाषयापि परिहारसंभवादिति। ऋस्तरिति किं। अमथातामभषत। हृ हृञ् हरणे। चत्वारइहार्थाः। भारंहरतीति प्रापयतीत्यर्थः।
अंशं हरतिस्वीकरोति। स्वर्णं हरति चोरयति। पापं हरतिनाशयति। ध्वृ ञ्। हृद धारदृ छुधुः। दधर्थ। दध्रे। दध्राते। धर्त्ता। ध्रियात्। णञ्।
णिनयिषेति। भारद्वाजनियमादिद्धिकल्पः। आदेच उपदेशेऽशितीति। लिटि धातोरित्यतो धातोरित्यनुवृत्तं तदेवविशेष्यते। ॥३४॥
तदाह। एजंतस्य धातोरिति। उपदेशे किं। चेता। स्तोता। ननु लाक्षणिकादेवात्र न भविष्यतीति चेद् आहुः। वर्णग्रहणे लक्षणप्रति
पदोक्तपरिभाषा नाश्रीयतइति ज्ञापनार्थमुपदेशग्रहणं। तेन क्रीङ्जीनांणाविति ह्रुतालेकापयतीत्यादौ पुक् सिध्यतीति म

67

नोरमारुतः। घाघोः किं। गे स्यां नौ स्यां। अस्ति ह्यत्रापि गमेडो ग्लानुदिस्यां डोर् इत्युपदेश एवो अशितीति प्रसज्यप्रतिषेध इत्यत आह।
न तु शितीति। पर्युदासे तु जग्लेमम्लेइत्यादौ द्विर्वचने चाशितीति निषेधादात्वं न स्याद् अभ्यासे इकारश्च श्रूयेत। किंच सुग्लइत्यत्र आतश्चोप
सर्ग इति कः। सुग्लेत्यत्र आतश्चोपसर्ग इति स्त्रियाम् अङ् सुग्लान इत्यत्र आतो युजिति युच् न स्यात्। प्रत्ययनिमित्तं ह्यात्वं आदन्ताच्च प्रत्यय
इत्यन्योन्याश्रयः स्यात्। प्रसज्यप्रतिषेधे तु न कोपि दोषः। ह्वावामश्चेति सूत्रेण कबाधनार्थं पुनरण्विधानं च प्रतिषेधपक्षे ज्ञापकं। तद
कुः। अनैमित्तिकमात्वं शितीति तु प्रतिषेध इति। न चैवमपि एकाचः शिचात् जग्लेमम्लेइत्यादि न सिध्यतीति चेदत्राह। परि तु शितीति बहु
व्रीहिः स्यात्तदा स्यादेव दोषः किंतु कर्मधारयोऽयं। तथा च। शिति इत्यत्रेत्संज्ञकशकारादौ प्रत्यये परे इत्यर्थः। धातुग्रहणात् शिन्नस्य प्रत्य
यस्याशितीति कर्मधारयेण विशेषणात्तु विषयसप्तम्यां तु इत्संज्ञकशकारादिभिन्नप्रत्ययविषय आत्वमित्यर्थात् पर्युदासेऽपि न क्षतिरिति।
आत औ णलः। इह अंगस्येत्यनुवर्त्तते धातोरिति तु फलितार्थकथनं आदन्तादंगादित्यर्थः। आतो लोप इटि च। आर्द्धधातुक इत्यनु
वर्त्तते। डाङो युडचि क्ङिती मतो [illegible] क्ङितीति च। तदेतत्फलितमाह अजाद्यार्द्धधातुकयोरिति। अजाद्योः किं। ग्लायते। यङ्
सायड्दाज्ञो लिङुत्तमैकवचनमिदं। आर्द्धधातुकयोः किं। यांति। वांति। व्यत्यरे। रा दाने। कर्मव्यतिहारे रा धातोर्लङुत्तमैकवचनमिदं।
धिषीति। एवं च अजाद्यार्द्धधातुके क्ङिति चेन दिधिवाद्धिमेसादिषु आतो लोपसिद्धावपि दधिषपपिपेसादिरूपसिद्ध्ये सूत्रे सिनिर्देशाति
ग्रहणमावश्यकमिति तत्त्वं। यदि तु इडागम एवात्र गृह्यते व्याख्यानात्तदा अजाद्योः किं। तास्येन दार्द्धधातुकस्यैव विशेषणं न तु सयोः रा
दाधा घ्वदाप्। इह दारूपाश्चत्वारः। डुदाञ् दाने। दाण् दाने। दो अवखंडने। देङ् रक्षणे। धारूपौ तु द्वौ। डुधाञ् धारणपोषणयोः। धेट् पा
ने। अनुबन्धानामनेकांतत्वात् दैप्चोपदेशे इत्योत्वे दो देङ् धेटामनुकरणे धो इत्येतद्रूपत्वमस्ति। एवं च दाश्च दाश्च दाः। धाश्च धाश्च धौ
दा धा इति विग्रहः। दाप् दैपो विनेति। दाप् लवने। दैप् शोधने। एतद्भिन्ना इत्यर्थः। दैपः पित्वमिह प्रतिषेधार्थं न त्वनुदात्तार्थं। अनुदात्तो

तत्वबोधिनी

।।३५।।

सुप्पितावितिप्रत्ययस्यैव पित अनुदात्तत्वात् न च दैपो लाक्षणिकत्वान्नास्य प्रतिषेध इति शंक्यं । पित्करणस्य आनर्थक्यप्रसंगात् । इदमेव दैपः पित्वं गामादाग्रहणेष्वविशेष इति परिभाषाज्ञापकमित्याहुः । अदाविति किं । दातं बर्हिः । लूनमित्यर्थः । इह दोदद्घोरिति दद्भावो न । अव दातं मुखं । शुद्धमित्यर्थः । इह त्वच उपसर्गादिति तादेशो न । एर्लिङि । मास्थापादानामिति । मास्था गा पा जहाति सामित्यर्थः । मामाने । गामादाग्रहणेष्वविशेषे पि माङ् मेङौ नेह गृह्येते लिङि कित्वासंभवात् । गा इति निवृत्तौ गेशब्दो गाङ् गतावितिलुङ्न गृह्यते । लिङि कित्वासंभवादेव पापाने । ओहाक् त्यागे । षोन्तकर्मणि । देयात् । धेयात् । मेयात् । स्थेयात् । गेयात् । पेयात् । हेयात् । अवसेयात् । आर्द्धधातुके किं । मायात् । माताम्मायुः । कितीति किं । दासीष्ट । इह डाङौ युङ् उचास्यतः । वृङ्गीत्यनुवर्त्तमाने पित्र लपोपयोगतया कितास्येवानुवृत्तिः कृता । विभाषा घेट् । च्लि लुङीत्यनुवर्त्तते । णिश्रीत्यस्मात्कर्त्तरीति च । तदाह श्लेश्च दङ् वेत्यादि । अदधदिति । चङि आतो लोपः । श्वयतेरुदाहरणमशिश्वियत् । विभाषा च । इह च्लेश्चिण्यस क्रियार्थस्य तालुगनुवर्त्तते । गातिस्थेत्यतः सिचः परस्मैपदेष्विति च । तदाह । सिचो लुग्वेत्यादि । अधादिति । आत इति सेर्जुसः । परस्मैपदे किं । व्यस घ्रास्तापमरमा । इह आर्द्धधातुकस्येड्वलादेरितीडनुवर्त्तते । अंजेः सिचीत्यतः सिचग्रहणं । स्तुसुधूञ्भ्य इत्यतः परस्मैपदग्रहणं च । तदाह । एषां सिच इडित्यादि । अयंसीत् । अयंसिष्टां । अरंसादरंसिष्टां । आनंसीदनंसिष्टां । परस्मैपदेषु किं । उदायत भारं । आरंस्त । आरंसातां । वान्यस्य । अन्यस्य किं । स्थेयात् । घेन्यकरणे । घायति । दघौ । अघासीत् । घुमास्थेत्यत्रेति । व्याख्यानात्तंत्रांतरे जहातिस्यतीनामिति श्यना निर्देशा ।।३५।।

चेति भावः । विभाषात्रेति । राप्रश्यन्विकरणाभ्यां शाच्छाभ्यां साहचर्यादिति भावः । एवं शाच्छासेति मुग्विधावपि स्यतेरेव ग्रहणमिति बोध्यं । तेनास्या निःक्षीति प्रगेवत्सायापयति ये ओ वै पायति । वापति । शुष्यतीत्यर्थः । ओदितश्चेति निष्ठान । वा वानं । शुष्क र वानमुत्सं । अविचित्समरः । आदितत्वादि । केचित्तु अंगवत्तपरिभाषयापि गुणाभावसमर्थयंति । घाग्मं घोपादाने । गं घोपादानेगं

69

पग्रहणं । नन्वेवं कर्मणो धात्वर्थेनोपसंग्रहादकर्मकत्वेन जिघ्रति कुसुममित्यादिप्रयोगो न सिद्ध्येदिति चेदत्राहुः । यत्रात्वर्थेन कर्तृ
निष्ठकर्मण उपसंग्रहस्तस्यैव धातोरकर्मकत्वं नान्यस्य भवति हि जीवति नृत्यतीत्यादेरकर्मकत्वं । तदर्थोपिसंग्रहात्कर्मणः कर्तृनिष्ठत्वात् ।
घ्रा धातोः कर्मणस्तथात्वात् नाकर्मकतेति । ध्मा शब्दाग्निसंयोगयोः । शब्दः शब्दनं तदनुकूलो वायुरिह गृह्यते तेन शंखं धमतीति व
मृदंगं धमतीति प्रयोगो नेत्याहुः । अग्निसंयोगे सुवर्णं धमति । अग्निना संयुनक्तीत्यर्थः । स्थेयादिति एर्लिङीति नित्यमेत्वं । लुङि अस्था
त् । म्ना अभ्यासे मनति विद्यां अभ्यस्यतीत्यर्थः । मम्नौ । अम्नासीत् । अदादिति गातिस्थेति सिचो लुक् । स्तम्भ । संयोगादेः किं । चक्रतुः ।
चक्रुः । तपरकरणं स्पष्टार्थं । स्तृञ् जॄ इत्यादेर्लिटि तस्तरतुरित्यादौ ऋच्छत्यृतामिति गुणस्य जायमानत्वात् । चकारो मंडूकयोजनः । दय
तेर्दिगि लिटीत्यतो लिटीत्यनुवर्त्तनादाह गुणः स्यात् लिटीति । अवृद्धिनिमित्ते लिटीति गाच[illegible] व्याख्यानं तु नादर्त्तव्यं । न चस्य विष
येव द्विर्बाधकेति फलितार्थकथनपरतयाप्युक्तिसंगच्छत इति वाच्यं । परत्वेन गुणस्यैव न्याय्यत्वादिति भावः । गुणोर्त्ति । अर्त्तेरिति
ऋच्चादिरचाद्ध्योर्ग्रहणं । लुकानिर्देशस्तु सौत्रः । स यसोर्णे कर्त्तव्ये यानिर्देशो यङ्लुङि चेत्यर्थः । रीङृत इत्यस्मादृत इति वचनात् तेन
न संयोगादित्वेन विशेष्यते । तदाह संयोगादेरिति । अर्तिसंयोगाद्योर इत्यकारे विधेये गुणग्रहणं चिंत्यप्रयोजनं । अयङ् यि क्ङिती
ति सूत्रात् यीत्यनुवर्त्तते तच्च लिङो विशेषणं । रिङ् शयग्लिङ्क्ष्विति सूत्रात् यग्रहणस्य लिङ्ग्रहणस्य वानुवर्त्तनादित्युक्तिस्तु
कृञ् क्रियादीति । आर्द्धधातुक इत्येतदत्र सार्वधातुकयोरित्यनुवृत्तिपर्यालोचनया फलितार्थकथनमिति ज्ञेयं । संयोगादेरिति किं ।
क्रियात् ह्रियादीति किं । संस्क्रसीष्ट । आर्द्धधातुके किं । इष्यात् । स्च । उपतापो रोगः । श्र्युकः किति । एकाच उपदेश इत्यत एकाच इत्यनु
वर्त्तते । तच्च उको विशेषणमित्याह एकाच उगंतादिति । श्रितः । श्रितवान् । श्रित्वा । भृतः भृत्वा । स्तुतिः । कित्युदाहरणं । स्थास्नुः । ग्ला

तत्वबोधिनी
॥३६॥

जिस्थश्चेति ग्स्नुः। सच गिद्भवति न तु कित्। स्थास्नुरित्यत्र घुमास्थेतीत्वप्रसंगात्। एकाचइति किं। जागरितः। जागरितवान्। ऊर्णोतेस्तु नुवद्भावेन ऊर्णुतः। ऊर्णुतवानिति सिध्यति। उगन्तात्किं। शापितः। शापितवान्। पुरस्तादित्यादि। आर्द्धधातुकस्येड्वलादेरित्यस्य विधिकाले। तत्रागेव नेड्वशि कृतीत्यादिना निषेधकांडारंभसामर्थ्यादित्यर्थः। निषेधमात्रेइति। स्नुतः। स्रुतः। धृतइत्यादौ यथेति भावः। सृगतौ। सरति। सरिष्यति। सर्त्तिशास्त्यर्त्ति। परस्मैपदेष्विति न संबध्यते। पुषादियोगादस्य पृथक्करणात्। आङः शासु इच्छायामित्यस्यात्र न ग्रहणं। किंतु सर्त्यर्त्तिभ्यां साहचर्यात्परस्मैपदिनः शासेरेवेत्याहुः। असरत्। अशिषत्। आरत्। प्राग्वदिति। किदर्थमारब्धोपि गुणः परत्वाण्णल्यपि भवति। रपरत्वं। ततउपधावृद्धिरित्यर्थः। निरस्यमिदं स्यादिति। विभाषासृजिदृशोरित्यतो विभाषा नानुवर्ततइति भावः। कृ ह्वर्णं कौटिल्ये। स्रुगतौ। यद्यपि सामान्येन गतिरुक्ता तथापि द्रवद्रव्यस्यैव गतिरिह ज्ञेया। स्रवति घृतं। प्रसवोभ्यनुज्ञानमिति। देवस्य त्वा सवितुः प्रसवे इत्यादावभ्यनुज्ञानार्थदर्शनात्। स्तुसुधूञ्भ्यः। परस्मैपदेषु किं। अस्तोष्ट। अधोष्ट। धूञ् कंपने च। यद्ययं धूञ्धातुः स्वादौ पठितस्तर्हि चकारो नकर्त्तव्य इति लाघवमित्याहुः। हुश्नुवोः। जुह्वति। सुन्वंति। हुश्नुवोः किं। योयुवति। नोनुवति। सार्वधातुके किं। जुहुवतुः। जुहुवुः। असंयोगपूर्वेति किं। अक्ष्णुवंति। असंयोगपूर्वग्रहणमोर्विशेषणं ततः श्नुप्रत्ययः स्यात्तेन आप्नुवंतीत्यत्रापि परनिषेधः सिध्यति। प्रत्ययविशेषणत्वे तु अक्ष्णुवंतीत्यत्रैव निषेधः स्यादिति भावः। स्यादेतत्। यङ्लुकश्छांदसत्वात् योयुवतीत्यादौ प्रत्ययस्य छंदस्युभयथेत्यनेन आर्द्धधातुकत्वाश्रयणे यणादेशो न भवेदिति किमनेन श्नुग्रहणेन। न च युवंति नुवंतीत्यत्रापि प्रसंगवारणार्थं तद्ग्रहणमिति वाच्यं। अनेकाच इत्यनुवर्त्तते नोक्तदोषाभावादिति चेदत्राहुः। दाधर्तिदर्धर्षिबोभूत्विति छंदसि निपातनाद्भाषायामपि क्वचिद्यङ्लुग्भवतीति भाष्यकाराः। एवं च सार्वधातुकपरयोर्हुश्नुवोरनेकाचत्वाव्य- ॥३६॥

से॰

71

ति चाराइने काचत्स्यस्याभुवनि रिरह। किमर्थेत्याशंकायां निरवकाश एव। तदनु वृ सत्सावेऊ भुयहणस्य ज्ञापकत्वासंभवादिति दिक्। ऊङ
द् विधेति। भारद्वाजनियमादिट्। उद्दोधा। उङ्वेति। आ दिवाल्लि दिनेट्। गाङ् गतौ। गाते गातइति। पूर्वशापासह सवर्णदीर्घेकृते आतो
ङितइति न प्रवर्त्तते। आत्मनेपदेष्वनत इति तु प्रवर्त्तत इति तत्रा तीयेसे पुं तुल्यं रूपमिति भावः। गे। गावहे। गामहे। जगे। अगाते। ग
ता। गातां। गा तां गातां। गास्व। उत्तमे तु गै गावहे गामहे। अगात्। अगाता। अगात। न त्वस्येति। गाते इत्यादौ गत ङ प्रवसेङ्कारस्यच
रितार्थत्वात्। आदेश ङकारस्तु न चरितार्थः। एवं चापेक्षितानपेक्षितविध्योरपेक्षितविधिर्न्याय्य इति भावः। स्थानिवद्भावेन ङित्वा
देवतङः सिद्धत्वादिति भावः। आदादिकोयमिति। एवं च गाते। गाथे इत्यादौ वा ता मा धा मोः परतः आतो ङित इत्यस्य प्रवृत्तिप्रागेवेना
स्तीति भावः। फुल्लेतु न भेद इति। न च गाते गाथे इत्यादौ शापासह सवर्णदीर्घे कृतेपि पूर्वस्मात्परस्य विधौ कृतव्ये स्थानिवत्वादतः पर
त्वेन ङितामाकारस्य इयस्यादिति वाच्यं पंचमीसमासपक्षस्यानित्यत्वाभ्युपगमादिति भावः। जुङ्वइति। कुहोश्चुरिति ङस्य जः
कुकुङ इति। अभ्यासचार्घचिति कुवः। चपयोर्भेदाद्धिकृवइत्यन्ये मेङ्। प्रणिमयत इति। न नु नेर्गदेति कथमिह णत्वं स्यात् धिधि
षये आत्तासावेन मारूपाभावादतद्विषये कृतालोपस्मिन्नूणले दुर्लभमेव प्रतिपदोक्तस्यैव माधातोर्ग्रहणौचित्यात् न त्वस्य त्वाक्षणिक
स्या गामादायग्रहणेन विशेष इत्यभ्युपगमे नु मिनातिर्नि नोत्सोरालेकृते ग्रनिमाता प्रनिमास्यतीत्यादावतिप्रसंगः स्यादित्यत आह।
त्येति। वेरप्त्वादिति। अयं भावः। प्रसेत्यासवे प्रणिक्ष्यते। प्रणिधयुतेरित्यादौ णत्वसिद्ध्ये भाष्यकारैरित्थं सिद्धांतितम्। नेर्गदे
तिणत्वविधौ घुमेत्यस्य स्थाने घुमकृतिमाङिति पठनीयं। घुश्च मकृतिश्च माङ् चेति द्वंद्वः। अकृतिश्चकस्येत्याकांक्षायां सेनिधा
नास्तु चेत्तिरधोरेव तेन क्वापि व्याप्तिः। नापि मामानेरित्यत्र मिनाति मिनोत्योश्चाप्तिव्याप्तिः। माप्तिः। माङिति ङकानुबंधस्यैव
पठितत्वादिति दिग्यादेशेनेति। दयतेर्लिटि परे। द्वित्वप्राप्तं दिग्यादेशश्च तत्र विशेषविहितेन दिग्यादेशेन द्विस्त्र शास्त्रस्य बाधः।।

72

तत्वबोधिना ॥२७॥

नन्वेवं प्यायः पी चास्लिङः ख्याजिति पाख्याजोरपि विशेषविहितत्वात्ताभ्यां द्वित्वाबाधः स्यादिति वाच्यं। विषयसप्तमीमाश्रित्य लिड्सत्योः
प्रागेव तयोः प्रवृत्तत्वात्। दिग्यादेशविधौ तु लिटीति परसप्तम्येव न तु विषयसप्तमी लक्ष्यानुरोधात्। तदेतद्ध्वनयति इष्यत इति। दयतो लिटि
द्वित्वे प्राप्ते तद्बाधित्वा परत्वा दिग्यादेश इति तु नोक्तं। परस्परं लब्धावकाशयोरेव परस्य बलीयस्त्वा दिग्यादेशं विना द्वित्वस्य सावकाशत्वे
पि द्वित्वं विना दिग्यादेशस्य तदसावादिति दिक्। स्याद्यौ रिञ्च। इह लिङः सिचाविति सूत्रादात्मनेपदेष्विति नानुवर्त्तितव्यं। परस्मैपदेषु गा
तिस्थेति लुक्प्रवृत्ते व्यावर्त्यालाभात्। आस्थिषत। आस्थिषातां। साव्येमानोण्कचिहलवर्णान्ता दीति यत्र इदमपि तपरकरणं लिंगमि
त्याहुः। अत्र वदंति। विधीयमानस्य सवर्णग्राहकत्वेपि तपरकरणमिह व्यर्थं। न चात्र दीर्घः स्यादिति वाच्यं। घुमास्थेत्यनेनैव तत्सिद्धौ
विधिवैयर्थ्यापत्तेः। न चैवं गापि प्लुतः स्यादिति वाच्यं। प्लुताप्लुतप्रसंगे प्लुतश्च विषये स्मृत इति सिद्धांतादिति। उ ऊ। विहायसा आकाशेन।
विहायसामिति पाठस्त्वनाकर इत्याहुः। स्तृ इत्तोः। किरति। गिरति। कीर्णः स्तीर्णः। धातोः किं मातृणां। इत्वोत्वाभ्यामिति। परत्वाद्गुण
वृद्धी स्वत इति वक्तव्ये किमिदं वार्त्तिकमिति चेदौङः। परादप्यंतरंगं बलमिति ह्येतदाशंकावार्त्तिकमिदमारब्धमिति। ऋतो वा इहार्ध
धातुकस्येत्यत इडित्यनुवर्त्तते। ग्रहो लिटीत्यतोऽलिटि दीर्घ इति वा। तदाह इटो दीर्घो वस्यादि। सिचि च। न लिङि। स्ततो नेत्यनुवर्त्तनादाह इ
टो दीर्घो नेति। मान्वध। अभ्यासस्येति च्छेदः। अभ्यासस्य विकार अभ्यासः स चात्र सन्यत इतीत्वमेव। यदि तु उस्वरस्येव गृह्येत तर्हि
द्वित निर्देशोऽपार्थः स्यात्। तदेतदाह अभ्यासेकारस्येति। वृत्तिकारास्तु पन्निबद्धार्थान्दर्शयति गुपेर्निंदायामित्यादिना। सन्यङोः सप्त ॥२७॥
मीमाश्रित्य सन्यङि च परे इति व्याख्यायां गतीति। आद्य धातु इत्यादि न सिध्येत् स्यच्यङोः उक्ताविति भागस्यैव द्वित्वप्रसक्तेरत आह
सप्तमतस्येति नुनु सप्तमीपक्षेपि सन्यङोरेव द्वित्वं स्यान्न तु गन्ध इति भागस्य। शापोकारेणैव जुगुप्सते तितिक्षत इत्यादिरूपासिद्ध
त्वयोरकारोच्चारणस्य आजादेर्द्वितीयस्येति द्वित्वार्थत्वात्। यद्यपि निमित्तस्य कार्यित्वस्वीकारे आर। आटस्तु रिस्यादेर्लिटि परतः

पूर्वस्यागमात्रस्य द्वित्वं न सिध्येत् पाप्यकारोच्चारणसामर्थ्याद्धलन्त्यं ऽ ओ कार्यित्वमभ्युपगंतुं शक्यमिति चेन्नैवं । आकारफलानां बहूनां
सत्वात् । तथाहि । दित्स्यं धित्स्यमित्यत्र आचोस्तिति कृते यतोनाव इत्याद्युदात्तः सिध्यति । अकाराभावे तु स्यहलो रिति णत्वप्रसंगे स्वरेण न सिध्येत् ।
किंच पिपठिषि ब्राह्मणकुलानीत्यत्राल्लोपस्यानिवत्वाद्धल उपधायाइति च द्विर्न प्रवर्त्तते । अपिपचयस्य हल ई । पिपचयस्येति संघातग्रहणा
महपी स्यादो यल्लोपव्याख्यस्यर्थमित्सीति सर्वसंमतं । तथा च आपापचिरेत्यादो यल्लोपोप्यकारफलमिति सन्यऽरितिषष्ठ्येव युक्ता ॥
एवं हि यऽलुकि ग्रस्य पलक्षणेन युऽ नत्वाद्द्वित्वं सिध्यति परस्य सम्प्यांगुदि द्वित्वस्यांगकार्यत्वान्नलुमतेति निषेधः प्रवर्त्तते ति दिक् । दा
नशानचौचेति । आर्जवनिशानार्थाविति भावः । अर्थांतरे स्विति । धातुपाठोपात्तगोपनादिरूपे र्थ इत्यर्थः । अननुबंधकाइति । सानु
बंधकत्वे तु केन स्या । चरितार्थत्वादनुबंधस्य सन्नंतादिव अत्तंगफलात् ण्यंतादपि तङ् स्यादिति भावः । एवं चानुपदवक्ष्यमाणसाम्येपि पूर्वो
च्चादयप्रकरादिभ्यो भिन्ना इति फलितं । रभ्रगुणोनेति । यत्र पि हलंताच्चेति सन् । किलेनापि गुणाभावः सुसाधस्तथापि इउभावार्थमि
कहेतुरेवाश्रयणीय इति किं हलंतराश्रयणेनेति भावः । केचित्तु आर्थव ग्रहणपरिभाषया इवास्सन एव हलंताच्चेतिसूत्रे ग्रहणमिति ना
स्यस्वार्थसनः किन्त्वमित्याहुः । रभराभस्ये । राभस्यमुपक्रमः । लिटि रेभे रेभाते लुङि अरब्ध । अरप्साताम् । डुकुलभष द्वितः क्रिः । लब्धि ।
डुमां श्रिद्भिदादिभ्य इतीयङ् उत्सा । लिटि तेभे । लुङि अलब्ध । विः स्कंधे रत्नीश्रायां । सिवाद्युदाहृतं तत्र मलंभणमिति भावः । नस्यं
बध्यत इति । अत एव तिङंतेपि वत्वमुदाहरति । परिष्कंदतीति । जगमतुरिति । गमहनेत्युपधालोपः । णिमन्नफले । केचिदममुदितं पठंति ।
तहासामादिकमित्याहुः । अनुदात्तस्य । आदेच उपदेशे । शितीत्यत उपदेत्यतः शोइत्यनुवर्त्तते । उपदेशे किं । [illegible] । नुमुचि उदात्तः । रूदुपधः ।
किं । कर्त्ता । सत्तीति किं । सस्र्प । आक्लितीति किं । स्रप्तुः । असृपदिति । लृदित्वादङ् । द्रषमर्षेति सिद्धविकल्प एवाति किं सपंग क्षिप्यं । आस्रा
प्सात् । असाप्सीदिति केचिदुदाहरंति तहासामादिकमित्याहुः । अयं सीदितीयमरमेति रमूसको । निसस्सुपता । मर्दन्य इत्यनुवर्तमाने फ

तत्वबोधिनी
॥३८॥

लितमाहुः षः स्यादिति। आसेवने तु निस्तपति। पुनः पुनस्तपतीत्यर्थः। विभाषा सृजिदृशोः। क्रादिनियमान्नित्ये प्राप्ते विभाषेयं। सृजि
दृशोः। झलि किं। ससर्ज। ददर्श। अकिति किं। सृष्टः सृष्टवान्। दृष्टः दृष्टवान्। अद्राक्षीदिति। वदव्रजेति वृद्धिः। अद्राष्टां अद्राक्षुः। क्रष्टा।
कर्ष्टेति। अनुदात्तस्य चेत्यम् वा। धक्ष्यतीति। घत्वषत्वभष्भावाः। अधाक्षीदिति। अस्तिसिच इतीट्। वृद्धिः। घत्वादि प्राग्वत्। मिह सेचने।
सेचनमिह शिश्नकरणकं विवक्षितं तत्तु सेचनमात्रं। शिश्नो मेहनं शेफः इत्यमरः। कित निवासे। कितेर्व्याधिप्रतीकारादावेव सन्नित्युक्तं
तदुदाहरति। चिकित्सतीति। रोगमपनयतीत्यर्थः। शत्रुं चिकित्सति। निगृह्णातीत्यर्थः। क्षेत्रे तृणं चिकित्सति। अपनयति नाशयतीति वेत्यर्थः।
अर्थान्तरे तु चुरादिरित्युक्तं। तदुदाहरति। केतयतीति। षच समवाये। समवायः संबंधः। भेजतुरिति। तृफलभजेत्येत्वं। भक्ष्यतीति। कुत्वष
त्वे। लिषदृशो। अलिक्षदिति। शल इति क्सः। कत्वषत्वे। अलिक्षातामिति। क्सस्याचीति लोपः। यज देव। देवपूजा त्विह देवोद्देशेन विधिबो
धितो द्रव्यत्यागः। लिट्यभ्यासस्य। वच्यादयो वश्चिस्वपियजादयः। ग्रहादयस्तु ग्रहिज्यावयीत्यादयः। यद्यपि ग्रहिप्रच्छतिभ्रज्जतीनाम
भ्यासस्य संप्रसारणे कृते। कृते च विशेषो नास्ति तथापि पर्जन्यवल्लक्षणं प्रवर्त्तते। जग्राह। पप्रच्छ। बभ्रज्ज। व्रश्चतेस्तु विशेषोऽस्ति। सं
प्रसारणस्याकरणे वव्रश्चेत्यत्र वकारस्य संप्रसारणं स्यात्। कृते तु संप्रसारणे न संप्रसारणे इति निषेधप्रवृत्तिरिति। लिटीति किं। विवक्ष
ति। यियक्षति। वश्चिस्वपि। आगणोक्ता यजादयः। यजिर्वपिर्वहिश्चैव वसिर्वेञ्व्येञ् इत्यपि ह्वेञ् वदी श्वयतिश्चैव यजाद्याः स्युरिमे
नव। कितीति किं। पिपष्ठ। डुवप्। ड्वितः क्त्रिः। उप्त्रिमं। शासिवसिघसीनां च। धातुसकारस्याप्राप्ते विधिरयं। ननु सुपि सरुत्सादावतिप्रसंगः। ता
रणाय धातोः सकारस्य चेदेषामेवेति नियमार्थतां स्वीकृत्य आदेशप्रत्ययोरिति सूत्रं त्यज्यतामिति चेदत्राहुः। आदेशावयवस्य सकार ॥३८॥
णाय आदेशस्यैत्वं शास्त्रावश्यकं। न च ग्रहणे कृते धातुभिन्नस्य सकारस्य चेद्भवति आदेशरूपस्यैवेति नियमप्रसंगवारणाय प्रत्ययग्रह
णमपि कर्त्तव्यमेवेति। अवात्सीदिति। वदव्रजेति वृद्धिः। सः सीति तः। अस्ति सिच इतीट्। उच्चारणार्थ इति। इत्संज्ञाप्राप्तामिदित इति तु मत्स्यादीति
त्वायः। उवायेति। ग्रहिज्येत्यत्र वयिग्रहणात् वेञ इति निषेधोऽत्र न प्रवर्त्तत इत्याहुः। ग्रहिज्यावयि। गृह्णाति। गृह्णीतः। जिनाति। जि

75

जीनः। ऊ॰ तिबपेरूदाहरणं नास्ति। किंतु वचिस्वपियजादीनामिति सिद्धं यजादिषु वेञः पाठात्। अत एवाभ्यासस्य संप्रसारणमपि सिद्धं वे
ञ् इति संप्रसारणनिषेधस्तु लिटि वयो य इति निषेधारंभान्न प्रवर्त्तेत तस्मात् ग्रहिज्यादिषु वपि ग्रहणं स्पष्टार्थमेवेति बोध्यं। वश्चास्य।
अस्येत्यनेन वयो य इति परामृश्यते तदाह वयो यस्येति। वा किति। स्येव सुवचं। लिटि वयो य इति प्रकृतत्वात्। उपदेशेत्वत इति निषेध
माशंक्याह। वपेस्तासावभावादिति। ननु स्थानिनस्तासो विद्यमानत्वात् स्थानिवद्भावेन तासौ विद्यमानत्वं सुलभमिति चेद्वाढं।
शास्त्रीयकार्ये हि स्थानिवद्भावो न तु लौकिके। अवस्तादुच्चदिति निषेधस्य शास्त्रीयत्वेपि सोप्यनातिदिश्यते अच इत्युक्तेरल्विधित्वा
दिति। वेञः। लिटि किं। उतं। उतवान्। नु व्योर्लिटि। लिटि किं। व्याता। व्यास्यति। हलादिशेषं बाधितेति। हलादिशेषेणु वस्य संप्रसा
रणं स्यादिति भावः। वीयादिति। संप्रसारणे अकृत्सार्वेति दीर्घः। अजन्तोकारवान्वायस्तास्यनिट् थलि वेट् भवतीत्याशंकायां
यामाह। नित्यमिडिति। कृञ्। शब्द इति सामान्योक्तावपि आकारणरूपशब्द एवात्र गृह्यत इत्याहुः। तथा च माघे। यातोव्रतः पूतरु
तरुचरमाभृद्दराउद्धाकुनीजुविरेमुऽरात्मवर्ग्या इति। कर्मणि प्रयोगः। ह्वः संप्रसारणमभ्यस्तस्य चेति सूत्रं योगविभागेन व्याचष्टे अ
भ्यस्तस्य चेति। पूर्वयोगस्तु णौ च संश्चङोरिति विषये प्रवर्त्तते। जुहावयिषति। अजूहवत्। अभ्यस्तीन विष्यतो ह्वेञ इति। अभ्यस्तनिमि
त्तोगत्ययेपरे द्विर्वचनात् प्रागेव ह्वेञः संप्रसारणमिति फलितोर्थः। अभ्यस्तमस्यास्तीत्यभ्यस्तः सनादिस्तस्य यो ह्वेञ्। स्तहाहलि
मत्तस्यस्येत्यादिव्याख्यानस्य स्वीकारात्। तेन जिह्वायकीयिषतीत्यत्र ह्वेञः संप्रसारणं न भवति। राबुल्लोद्विचनिमित्तत्वाभावा
त्। अत एव णिचो द्वित्वनिमित्तत्वं नेति ह्वः संप्रसारणमिति योगविभागः क्रियते एतच्चाकरे स्पष्टं। लिपिसिचि। लिप उपदेहे। षि
च क्षरणे। अलिपत्। असिचत्। आह्वदतीति। अच्छेत्यस्य वदयोगे गतित्वाद्धातोः प्राक्प्रयोगः। विभाषा श्वेः। लिट्यङि चेति। लि
ड्यङोश्चेति। पूर्वसूत्रमिहानुवर्त्तत इति भावः। उभयत्र विभाषेयं लिटि ऽशो। अनुसारेणैनि संप्रसारणं कादावप्राप्ते। पक्षे शत्व प्राप्त विभा।

76

तत्त्वबोधिनी
॥३९॥

शोशूयते। शोश्वीयते। संप्रसारणं नेति। अन्यथा शुश्वापेत्यादि स्यादिति भावः। श्वयतेनः। अलोन्त्यपरिभाषाबलप्यमाह हकारस्येति। परस्य
पमिति। अतो लोपस्तु न भवति। आर्धधातुकोपदेशे यदकारान्तमिति व्याख्यातत्वात्। ईङ् पाङिति। लोलूयप्रथगुणापेक्षया अंतरंगत्वा
दिति भावः। अभ्यासादिति। नन्विह अंतरंगत्वात् गुणायादेशयोः कृतयोर्यंति बाह्यद्विर्निषेधो स्यादिति। कुमनेनेति। णिश्वि ग्रहणेनेति चेत्
अत्राहुः। न सिध्यंतरंगमस्तीति ज्ञापनार्थं णिश्वि ग्रहणं। तेन चिरिणोति जिरिणोति। लोयुङ् लुगंतानां विनाप्यतीनां च सिचि च द्वि
रंगाच्च द्विरेव भवति। अचिरायात्। अजिरायात्। अचेचायात्। अनेनापीदितिमिति चेनापीति चेदुदाहरणं। तेनेति। उक्तं च वार्ति
कहता। कास्यनेकाच् ग्रहणं चुलुंपाद्यर्थमिति। चुलुंपतीति। लुंपतीत्यर्थः। चुलुंप लोपे इति कविकल्पद्रुमे उक्तत्वात्॥ ॥इति चादयः॥
सूतेरीयङ्। तांतोयं धातुरिकान्निर्दिष्टो न। लिकारांतः। वंचिलुंच्यवतश्चेति निर्देशात्। केचित्तु ईयङ् इति दीर्घोच्चारणात्तांतोयमिति
ज्ञायते ईदंतत्वे हि सवर्णदीर्घेणैव सिद्धे इयङमेव कुर्यादित्याहुस्तच्चिंत्यं। ईदंतत्वे चेत् लेरनेकाच इति यणा सवर्णदीर्घस्य बाधात्। न
चसूतेरीयङ् विधाववश्यसार्वेति दीर्घोपपत्तेरीयङ् विधानं तोतत्वे लिंगे न भवत्येवेति वाच्यं। यङ् विधौ सन्यङोरिति द्वित्वापत्तेः। हृणीयाच्चे
ति। अतर्नंचक्रतीयाच्च घृणीयाव घृणार्थकाः इति जुगुप्साकरणे घं घृणे इति चामरः। ऋस ल्भ्याहेड्डिः। जुगुः। धि। घासि सस्सोर्हलि
स्यतो हलीत्यनुवर्त्य हल्लादेरिति व्याख्यानात् रुदिहि स्वपिहीत्यादाविडादेर्हेर्धिर्न भवति। अंतादित्यत्र तु धित्वात्परत्वान्नाल्
ङिःकृतेस्थानिवद्भावेन पुनर्धिं लंतुसहलकृताविति न्यायात्तेसाहुः। अन्ये तु हेर्द्विरित्यत्र स्थान्यादेशयोरिकारपिरकारउच्चारणार्थ
इति हकारस्य धकार आदेशः। तेन हलीत्यनुवृत्तिर्न कर्तव्या। नापि तातङः धित्वप्रसंग इति सकृद्गतिन्यायात् आपणमपिमास्थित्याऊः
आदः सर्वेषां। अक्ग्यर्ग्यगालवयोरित्युत अड्डित्यतोऽनुवर्तति। गार्ग्यगालवयोरित्यस्य तनुवर्तिशंकां निवारयितुं सर्वेषां ग्रहणम्।
लुङ्सनोः। जिघत्सति। प्रणिहन्ति। णेर्गदेरिति णत्वम्। अनुदात्तोपदेश। यद्यपि ऐ तेषामनुनासिकत्वोपर इति व्याख्यायेततथा

॥३९॥

77

मन्यतेर्नम्नन हमिहमुद्यमस्आदीनां अनंत्यस्यापि लोपः स्यात् तथा च मतः नतः नद्रुः मीडः मुक्तः मग्न इत्यादिना सिद्धेदत आह लुप्तषष्ठी
कमिति। वनतीतरेषामिति। वनतेरव्यभिचारात् विशेषणं व्यर्थमिति भावः। वतिः। इह क्तिनि नेड्वशि कृतीति इण्निषेधात् तस्य लि क्तिनि
नलोपः। लोपः स्यादिति। अलोंत्यस्येत्यंत्यस्येति भावः। अनुनासिकांतानुदात्तोपदेशान् दर्शयति। यमिरमीति। तनोत्यादीनप्यनुना
सिकांतान्दर्शयति। तनुक्षणु। क्षिणोति। करोतिवर्जिता स्वनो सार्वभौमन न तन्मध्ये सनोतेर्जनसनखनामित्यात्वं वक्ष्यतीति न स
परिगणितत्वे ततः। क्षितइत्यादीन्युदाहरणानि तनोत्यादीनामुदित्वात् क्त्वायामिड्विकल्पना नित्यायां नेट्। अनुनासिकांतानां
मिति किं। शक्तः। रुद्धः। सृप्लीति किं। गम्यते नम्यते। क्ङितीति किम्। गंता। मंता। जनसनखनां सञ्झलोरिति। यद्यप्येवाभ्यासाच्चे स्यस्या
पि ग्रहणं तिरश्चीन तथाप्यंतरंगत्वात्तत्र हौहंते रित्यनुपरतं न्ये।। आमीयतयेति। सन्निपातपरिभाषयापिह लुङ् नेति वक्तुं शक्यमिति के
चित्तन्मंदम्। आतोहेरित्यारंभसामर्थ्यात् स्यात्प्रवृत्तेरिति न व्याः। वधादेशोऽदंतइति। तेन आदेशोपदेशेऽनेकाच्त्वात् इट् वधीत्यवे
काच इति इण्निषेधाप्रवृत्ता विड्ढादौ सिच्यतो हलादेरिति ग्राप्राप्त वृद्धिरल्लोपस्यास्थानिवत्वान्नेति भावः। इट् गपूरणे। ग्रपूरणं स्याज्जनं।
लद्वुदपीति। आउग्घ। आउग्घः। आउग्धं। आउद्धहि। आउं दिह। उपवर्णोवृद्धिरग्रणिदेग्धीति। नेर्गदेतिणत्वे। आलिक्षतेति। शल इगुप
धे तिक्सः। आलिक्षातां। आलिक्षत। आलीढेति। लुग्वादुहेति वालुकू। अलीढाः। अलीढम्। चाक्षिङ् दर्शनेपीति। विभाषारूपेष्टेशाच्
मिथ्यन्नदर्शनार्थत्वेन व्याख्यातत्वादिति भावः। पुजर्थ इति। अनुदात्तेतश्चहलादेरिति। उ। अंतोदित इति। इतितरेतिनुम्विधौ
गोः पादांत इत्यस्मादंत इत्यनुवर्ततइति भावः। एवं च नुमागमशंकानुत्थानाय च। क्षिउ इकारस्थाने आकार एव अस्तु किंतु मुनि
तः अनुदात्तत्वेनैव तादृशि सिद्धे उकारो व्यर्थ इत्याशंक्याह। उकारस्त्विति। स्फायमिति। स्फायीवृद्धावित्यनुदात्तेतो लटः शानः
राः चरे इति। स्फोमिति कालोपः। स्फुलं। स्वराद्रिरिति। तेन पुंस्त्वानमित्यत्रे पुमव्ययम् पर इतिसूत्रनेत्यादि परवाड् एवोक्तं असिद्धकाज्जेति।

णत्वप्रकरणानंतरमिति शेषः। तेन पर्यख्यानमित्यत्र शकारेण व्यवधानेऽपीत्यत्र इति णत्वेन। तथा। सुज्ञख्येनानिव्यक्तं सोऽशरख्यं तत्र सवः
सोऽशरख्येयः यत्वस्यासिद्धत्वात् धत्वं योपधादिति वुन्न किंतु छ एवेति बोध्यम्। आचष्टे। स्कोरिति कः ल्वोर्लोपः। ख्यातम्। अस्य
तिवक्ख्यातीत्यत्र विधिसामर्थ्याद् घत्वं नासिद्धं। एतत्रस्य ख्या धातोः सार्वधातुकमात्रविषयतया वक्ष्यमाणत्वात्। असपतेः पुषादि
पाठादङ्। सिद्धत्वात् अर्थग्रहणमिसादिषु बादिषु वक्ष्यामि। चक्षीति। ब्रुवो वचि। वच परिभाषणे इति उभयोर्ग्रहणं॥ ईरा ईर्ष्यते।
लङि। ऐर्त्त। ऐराताम्। ऐरत। ऐरि। ऐर्वहि। ऐर्महि। ईशः से। यथाश्रुतसूत्रन्यासे ईशो घे। घे शब्दे परे ईध्वमिति न सिध्येदत आह।
ईशीङ् जनामिति। वेधिष्यार्थ इति। घे इत्यस्य पूर्वत्रापकर्षः से इत्यस्योत्तरत्रानुवृत्तिरित्येवं विचित्रबोधार्थ इत्यर्थः। इह काशि
कादौ जनेरुदाहरणमुक्तं। तथाहि। जनी प्रादुर्भावे इत्यस्मात् श्यनः छांदसो लुक् उपधालोपाभावश्च। जनिषे। जनिध्वे। जनिध्व
जनिध्वम्। जन जनने इत्यस्य लुविकरणस्यापूपधालोपेव्यत्यिज सिद्ध्। चजोरिति कुत्वं। ववसे इति। वाहित्वादेत्वाभ्यासलोपाविति। णिसि चु
म्बने॥ वध्वामेति। नुम्विसर्जनीयेति सूत्रे न शीपदमंजाप्यादि। शिरुकेनुमादिभिः प्रत्येकं व्यवायेषत्वमिष्यते तेन निस्ससि निस्स्वे इत्यस्य वनम
वतीति तच्चास्यसांतत्वे युज्यते शांतत्वे तु प्रश्च्चादिषे चौरिति कत्वे कवर्गात्सि रत्वेन षत्वं दुर्वारमिति तस्योदाहरणमिदं न संगछत इति भावः।
णिञ्जो॥ अनिक्षु णिजि रिजो होत्यादिकस्य ग्रहणादयं से ङिति धुनयति। निंजितेति। शिजि अव्यक्ते शब्दे। क्तप्रत्यये शिंजितं। आ
वश्यकणिन्यं तालङ्। पृशिजिनी। भषणानां तु शिंजितम्। मोवीज्या शिंजिनी गुण इति चामरः। सुषुविषे इति। स्वरति सूति वीति वि
कत्वं बाधित्वा अभ्युकः। कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। शीङ् स्वप्ने। किंतिवेत्यस्येति। अन्यत्र सार्वधातुकार्धधातु ॥४०॥
कयोरित्यनेन सिद्ध इति भावः। शीङो रुट्। सोऽन्तस्य तो स्सर इत्यनुवर्तते। आदभ्यस्तादित्यतोऽदिति च। तथा चेष्टानुरोधेनादिति
प्रथमांतस्य षष्ठ्यंततया विपरिणम्य व्याचष्टे। शीङो दशस्यातेरिति। झस्य एव रुडागमे तु अदादेशो दुर्लभ इत्यसाद्विशिष्ट्यस्यापानुवृत्तिः कृता। शीङ्स्येति।

एतेरनेकाच इति यण्। शेतां। शयातां। शेरतां। शेष्व। शयायां। शेध्वं। उतो वृद्धिः। नाभ्यस्तस्याचि पितीत्यतो निषेधावृत्तेराह। नत्वभ्यस्त
स्येति। उतः किं। एषि। लुकीति किं। सुनोति। जुहोति। हलीति किं। यवानि। युयाव। आडुत्तमस्येत्याडागमः। पितः। पितीति किं। युतः। रुतः। नाभ्यस्त
स्येति किं। योयोति। रोरोति। सार्वधातुके किम्। प्रषात्। न चात्र ङिच्चापित्तेति व्याख्यानान्निवर्हिं शक्यं। किंदाशीबीतियासुटः कित्वा
त्। केचित्तु यत्तु स्तुयादिस्यादावपि ङिच्च पित्तेत्यनाश्रित्य व्याचक्षते संलाप एवंविधेरनित्यत्वाद्धिर्न भवति। अन्यथा उत औदिति सेववदेदिसे
ववदेदिति। तुरुस्तु। तुः सौत्रो धातुरिति वक्ष्यति। अपिदर्थमिति। एभ्यः परस्य पितः सार्वधातुकस्येति प्राचो व्याख्यानं प्रामादिकम्।
रवीः। स्तुवीत रुस्याद्य सिद्ध्यापत्तेरिति भावः। शम्यमोरुदाहरणं तु शमीध्वम्। अभ्य। अभ्यमीति। अभ्यंति। शम्यमोश्छन्दसि विकर
णस्य लुकि सति हल्यादि सार्वधातुके मनंतरस्य सचीतरु इति काशिकायामुक्तं। आपिशलास्तु शम्यमः सार्वधातुके छंदसि तिपदं तित
न्मतेरस्त्वमिदं छंदस्येव। ऊर्णोतेर्विभाषा। उतो वृद्धिरिति नित्ये प्राप्ते विभाषेयं। हल्यादौ किम्। ऊर्णवानि। पितिकिम्। ऊर्णुतः। सार्व
धातुके किम्। ऊर्णुयात्। ऊर्णोतिराम्नेति ऊर्णोतेर्नुवद्भावो वाच्य इति वक्ष्यमाणस्याम् न्यायोपि फलमिति भावः। नन्द्राः। अजादेरि
ति वर्त्तते स च कर्मधारयः। आदिग्रहणस्य तु प्रकृते नुपयोगस्तदेतदाह। अच परा इति। उँदिदिषति। इंदिधुति। इंदिदिषति। अ
डिषति। अर्चिषति। नन्द्रा इति किम्। ईक्षतेः सनि ईचिक्षिषते। संयोगादयः किम्। आणिणिषति। अरिरिषति। अचः पराः किन्नं म
इंद्र। पितुमिच्छतीति क्यजंतात्सनि इंदिद्रीयिषति। इह नकारस्य द्वित्वाभावे पि दकारस्तु द्विरुच्यत एव अचः परत्वाभावात्। नुशब्द
स्येति। उपदेशे नकार एवोणत्वं तु रषाभ्यामित्यनेनेति भावः। पूर्वत्रासिद्धायमिति। अत्र द्विर्वचनशब्देन षाष्ठमाष्टमिकं चोभयं गृह्य
ते तत्र षाष्ठस्य रूढिमाख्यात् ओडढत इत्युदाहरणम्। आष्टमिकस्य तु। ज्ञो। घा। ज्ञोघ्या। ज्ञोढ। ज्ञोढेति। इह तिसादिस्य घत्वढत्वा
दिकं द्विर्वचने सिद्धमेव। असिद्धत्वे तु त्रिपादीस्थकार्यासर्वमेव जोहुता इत्यस्य द्वित्वे पश्चाद्दादुहेति घत्वढत्वयोः प्रवृत्तौ घ्याज्ञोढेत्य
पि द्विर्वचनं कदापि स्यान्न तु ज्ञोघेति समानजातीयस्य च नियमेन द्विर्वचनं सिध्यति। किंचाषट्संतरस्यवेडस्य चर्त्वे टकारस्य द्वि

त्त्वबोधिनी.
॥४१॥

लं पूर्वत्रासिद्धमसिद्धवदत्रेत्युक्तेरिति मनोरमायां कृतम्॥ अत एव सुध्युपास्य इत्यत्र धस्य शत्वे न दकारो व्यक्ति नेदाद्दकारस्यापि द्वित्वं स्ववचमे
त्याङः। अनित्यमिति। अत एव उदि शब्दस्य द्वित्वं जौ जिघदित्यपि नाम धातुष्ठुव ष्यति उ सौ साभ्यासस्येति। अनितेरित्यनेन णत्वं हलादि द्विवच
ने कृते प्राणिणत्। प्राणिणिषतीति सिद्धमिति सूत्रमिद्दत्यापकमित्यर्थः। एवं च प्राणिनाय सादौ द्वितीयस्य णत्वाभावः सिद्धः। विभाषोर्णोः।
गाङ्कुटादिभ्य इत्यतो ङिदिति विजिटडीत्यत इट् उतीति चानुवर्त्तत इत्याशयेनाह। इडादिप्रत्यय इत्यादि। तेन गुणविकल्पपक्षे उवङ्। गुणोऽप्रक्ते। ना
भ्यस्तस्याचीत्यतः पिति सार्वधातुके इति चानुवर्त्तते। हलि हलीत्यतो हलीति वर्त्ततेत्याह। हलादावित्यादि। ऊर्णोति विभाषा। सिचि वृद्धिरिति सूत्रं नेटीत्यत
इटीति चानुवर्त्तत इत्याशयेनाह। इडादावित्यादि। स्तौतीति गुरुः स्तुशाम्यमः इति इढ्ढा। स्तुसुधूञ्भ्य इत्यत्र परस्मैपदेषु इत्युक्ते आत्मनेपदे तु नेट्।
आतोऽस्य। अतोऽपातताम्। स्तुवः पञ्चानाम्। विदोलटोवेत्यतो लट इति वर्त्तते ब्रुवः स एतदादिमं पञ्चम्यन्तं मतं मं तु षष्ठ्यन्तमित्याशयेनाह। ब्रुवो लट इ
त्यादि। चहमिति। प्रक्रियालाघवार्थमस्त इत्येव सुवचमित्याहुः। पुनः पूर्वं हलादेः किम्। ब्रुवाणि। पितः किम्। ब्रूतः। हलीति धलविधानादिति। इडाग
मे कृते सत्याचिपत्वाभावादिति भावः। इणगतौ। इयङ्ङुपवाद इति। येन नाप्राप्तिन्यायेनेति भावः। गुणवृद्धी तु परत्वादस्य बाधके॥ आपनम्र
आपकः। दीर्घ इणः किति। अत्र लोपोऽभ्यासस्येत्यतोऽभ्यासस्येत्यनुवर्त्तते व्यथो लिटीत्यतो लिटीति चा। किति किम्। इयाय। अत्र
दीति। इह दीर्घे कृते प्यभ्यासस्यासवर्णे इतीयङ् तद्रूपसिद्धेः किदीति व्यर्थं न च दीर्घस्येयङि दीर्घविधानं व्यर्थमिति वाच्यम्। इयतुः। ई
युरित्यत्र वार्णादाङ्गं बलीय इतीयणि कृते दीर्घविधेरावश्यकत्वात्। किं च। लिटीत्यनुवर्त्तनमपीह व्यर्थमेव व्यावर्त्याभावादिति। एताए
प्यतीति एतु। इताम्। इतात्। इताम्। यन्तु। इहि। उत्तमे तु अयानि। अयाव। अयाम। लङ् मध्यमे। ऐः। ऐतौ। ऐत। उत्तमे त्वायम्। ऐव। ऐम। इयादिति। ॥४१॥
अभ्यासावर्णीति दीर्घः। एतेर्लिङि। इह आङ्धातुक इति स्वरूपकथनार्थं न विशेषणम्। किन्तु लिङीत्येतावतैवेष्टसिद्धेः। उभयत आश्रय
इति। आङ्गादि शब्दावयवयव विशेषवाचिनौ। तत्र यदि पूर्वस्याव्ययवबुद्ध्या एकादेश आश्रीयते तदा तस्यैव पूर्वस्य कथमादिवद्भा
वः स्यात्। एवं परस्यादिमत्वे पूर्वस्यान्तवद्भावो न स्यादेकस्यान्तयापेक्षया पारतन्त्र्यविरोधादिति भावः। नन्वेवं रामो इत्यस्य सु

81

ङ्तमिति पदत्वेन स्यात्। परादित्ये रामेति प्रकृतेरभावात्। यस्मात्तस्य पूर्वविधिस्तदादेस्तस्य ग्रहणमिति स्वीकार। गुरामरुत्स्याप्रस्तुतित्वात्। पूर्वं तात्ये
उपरत्र प्रत्ययाभावात्। अनाङः। पूर्वपदसंज्ञापक्ष्यादेकदेशाद् इतिनोक्तदोषः। इह च ज्ञापकं सुपिस्थ इति समास इति। विध्यादौ समीपायादिन भवत्येव। अ
शाल्लिङि तु अध्यगीष्ट सार्वेति दीर्घस्मृतोपि कृत्स्नेन भाव्यमित्याशंक्याह। सौवादिकस्येति। हट किट कट्यौ। इत्यत्र भविष्यत्स्यइ धातोराशीर्लिङि रूपम्। नी
गतस्यत्र ईकारोपि धात्वंतरं गाङ् क्रियत इतिमतेनुपि ध्यादित्रिध्या पि भवत्येवेति बोध्यं। गाङ् लिटि। लावस्थायामिति वा। किंमतरकादेशा गाङो
गेव गाङादेशो द्विर्वचनेचीति स्थानिवत्त्वं न प्रवर्त्तते द्वित्वनिमित्ताचोऽभावात्। विचिदित इति भाष्यमेव तु सुतरामप्रवर्त्तते अनेमित्तिकत्वादिति भावः।
अध्येयतीति। आत्मनेपदेष्वनत इति तस्य अत्। लङ्। म् अध्यमेतु अध्यैषाः। आध्येयाथाम्। अध्यैध्वम्। अध्येयाथाम्। आध्यैषीध्वेति। लिङि
सीयुट्। आध्येषीयास्ताम्। अध्येषीरन्। गाङ्कुटादिभ्यः। इह गाङ् गतावित्यस्य न ग्रहणम् तङ्ङर्थतया ङकारानुबंधस्य तत्र चरितार्थत्वात्।
आदेशङकारस्तु अचरितार्थः स्थानिवद्भावेनेव तङः सिद्धत्वादित आह। गाङादेशादिति। कुटादिस्तु दाघतगणः। केचित्तु कुट आदिर्ये
षां ते कुटादयः। कुटस्य आदिः कुटादिः। कुटादिश्च कुटादयश्च कुटादय इति समासद्वयम्। अस्य कुपवर्गस्य। लिख धातोरपि ग्रहणम्। लुलिख
नमिति ङयोग सिद्धं इत्याङ्। तच्छलोव्युपधादिति सूत्रस्येन लिखित्वा लेखित्वा लिलिखिषतीव तिर्यं येन शकुनि बालखन इतिसो
ग्रयोगेण च विरुध्यते। अत्रिणि ङितीति किम्। चत्रिकोटयः पोटः। णल्चुकोट। पुपोट। घुमास्था। गाङ्कुटेति चोत्सृतः। कितीसनुवर्त्तते। आ
ईधातुकेइति चात्रा धिक्रियत एव। किति किम्। दाता। हल्वादौ किम्। ददतुः। ददुः। अन्यथा आतो लोपादप्लवादित्वं स्यात्। आर्द्धधातु
के किम्। मातः। माथः। अध्यगीष्टेति। सिचो ङित्वादालम्। दकुस्मरणे। ककार इह रणवदि कुरति विशेषणार्थः। इत्युक्ते कुरट किट कुय
स्यत्र गम्लिषु स्यरू धातोरपि ग्रहणं स्यादित्याङ। केचित्तु इति। आर्द्धधातुकाधिकारे वार्त्तिकपाठात्। धिकारोक्तानामेव कार्याणामुपस्थि
तत्वादतिदेश इति भावः। आपीङ् पतीति स्मरंतीत्यर्थः। साधवयोरित्यत्र आधीगर्थदयेशां कर्मणीति षष्ठी। वा गति। अविपत्तीति। आउ
गमात्परत्वादियङ्। आडागमे सतीति। कृताकृतप्रसंगित्वमात्रेणायो नित्यत्वादिति भावः। अत एवापवादितोषादसिद्धवदत्राभादिति स

ालबोधिनी:
॥४२॥

मानाअ्रयेयणिकर्त्तव्येआयेः। सिद्धत्वादियङ्वो च्चितइत्याशयेनवाके चिदित्युक्तं। लाचस्यायामेवाउ। आगम इति पक्षेतु यणेवेतिबोध्यम्। ईकारो

पाति। अयुंजतेच। नहितरणिरुदितेदिकूपराधीनवत्तिरिति। व्याख्यातंचमनोरमायाम्। कर्मव्यतिहारेतङ्। न च न गतिहिंसार्थेभ्य इति निषे

धश्शंक्यः। उरूर्वस्या विशर्वार्थत्वादिति। अवबदंति। व्यतिशब्दं विनाकर्मव्यतिहारे वृक्कुत्स्वनं क्रोशावहं। परेकायकर्मव्यतिहारेऽपेक्ष्यते। त

च्चात्रनोपात्तम्। परस्परकरणं तु नसे सत्येव। ततश्चोदाते इति त्वावे निर्ज्ञेया। तथाचोदयेदिकूपराधीनवृत्तिस्तारणिर्नेत्यर्थः। सुगमं इति॥

अणिदाते ति। शेषे विभाषेतिणत्व विकल्पः। अदासीदिति। अलघुत्वात्तमिङ्लुक्। नमःस्याचेइति। यघष्पयमाई्धपातुके पिअयुज्येत। तर्हि

वजेते। स्मिन्परे शर्परि विसर्जनीयइत्यस्याप्रवृत्त्या कुघोरिति जिह्वामूलीयोऽर्वारः स्यादेवेति दन्त्यावः। खर्शादित्यप्रयोजनमितिवा

र्त्तिककाराधूत्किव्या कृष्ये तेति लाव। संत्यपरवस्पेत्यादि संख्यातीत्यादि अप्रयोगो नास्येवासंख्येति प्रयोगस्तु ख्याजादेशस्येति न्यासका

रास्वरशयः। मामाने। नास्येति। घुम हृतिमाङ इति पाठात्। ङितामेवतत्रग्रहणं। ततश्च शेषे विभाषेति विकल्प एव भवति तत्स्यात्। अणिमा

तीत्यादि। वच परिभाषणे। उवाच। वक्ता। वक्ष्यति। वक्तु। वक्ता। वक्ष्यति। वक्तु वक्तात्। अवक्। अवक्ताम्। अपपतीति पर इति। तथाच वचांसि।

वक्ष्यंति। वचंतु। अवचन्। अवोचन्। अवक्ष्यन्नित्यैतेयचु। वक्तात्। अवक्। अवक्ताम्। अपपतीतिपर इति। तथाचुवचांति। वक्ष्यंति। वच

तु। अवचन्। अवोचन्। अवक्ष्यन्नित्येते साधवः। वरु वचनपर इति। अस्मिन्पक्षेलटिमध्यमे। वः। धातुत्तमेतु वच्यः। लिटि ऊचु

मध्यमेतु ऊचिम। लुटि वक्तारः। लिङि वच्यासुः। उच्यासुरित्यादयोप्यसाधवः। क्षिपर इति। अस्मिंस्तु पक्षे वग्धः। वग्मः। ऊचा। उ

चिमेत्यादयः साधव इति दिक्। विदो लटो वा। पंचमी। पंचतुपष्ठी। तेन विद्यतिविदं त्योरव्यवहितपरस्यलटोऽभावान्नेते आदेशाको ॥४२॥

दाहः। चेत्तेरिति। लोटो लुगिति। आम इतीरस्य मंचेघसेसलोलेरिति। अनुवर्त्य आमः परस्य लोलुगितिव्याकुर्वतां मतेनेदमु

क्तम्। निष्कृष्टं तु नैवं लुगिति बोध्यम्। पुरुषवचनेइति प्रथमपुरुषो बहुवचनं चेत्यर्थः। परस्मैपदमप्य विवक्षितमुवेति केषांचिन्म

तेकर्मव्यतिहारे तङ्। व्यतिविदांकुरुताम्। व्यतिविदांकुर्वातामित्यादि द्रैयमित्याहुः। तेने ति। विश्वसेदित्यत्रशपो लुगनोवः। म

83

सिद्ध इति स्थावः। एवमप्यविश्वस्तामित्यत्र उ स्थावः कथमिति चेदागमशास्त्रस्यानित्यत्वादिग्रहणम्। आवश्यकम्। इह भ्रूत पर्वगत्यासार्वधातुक
परत्वमाश्रीयतोरिति। वस्तिमतेत्व सिद्धत्व वर्णतस्योपयोगलेशोपिनास्तीति ज्ञेयम्। दश्च। सिपि धातो रुर्वेत्यनुवर्ततीयुदस्येति स्पलांज शोऽते
इत्यस्मादंत इति वतदाह। धातोर्दस्येत्यादि। सिपि किम्। दिपि अवेत। दांतस्य धातोः सिपिरुर्वेत्येतावतैवेष्टसिद्धौ पदांतानुवृत्तिमंदप्रयोजनं
स्याकुः। तद्धिं लं। वेहसीत्यत्रातिप्रसंगात् चर्त्वे स्यात्। सिद्धत्वे न पदांतत्वात्। असोरल्लोपः। आत उदिति सत्वाद त इत्यनुवर्त्त्य ग्रहणं त्यक्तु शक्य
मित्याकुः। असोरिति शाकंधादित्वात्सररूपमित्याह। अस्यास्ते श्चेति। अस्योदाहरणम्। रुंधः। रुंधंतीत्यादि। किति किम्। रुणद्धि। असिद्ध।
तपरकरणमास्तामासन्नित्यत्र घ्वोऽआगमे कृते तस्य लोपो माभूदित्येतदर्थम्। निक्षूर्जस्तु अनुपदं स्फुटीभविष्यति। घ्वसोरेद्धा। एल
मलोऽत्यस्य लोपस्तु। शिल्वा सर्वस्येति भाष्यादौ स्पष्टं। देहि। धेहि। आसिद्धत्वादाडिति। नन्वेवमाटोऽसिद्धत्वात् असोरित्यल्लोपो न
भवेदिति तपरकरणं तत्रव्यर्थमिति चेत्। अत्राहुः। आभाच्छास्त्रस्यानित्यता ज्ञापनाय तपरकरणस्य ज्ञापनार्थत्वं न सिद्धेत्। न चात
उदिति सत्व अस्य तपरकरणमेव ज्ञापनार्थमावश्यकमित्याहुः। उपसर्गप्रादुर्भ्याम्। प्रादुरस् इति सांतमव्ययम्। प्रादुषश्चेति पाठे प्रादुर्भ्या
मिति निर्देशो न युज्यत इति प्राचां पाठ आमादिकः। परस्येति। अयमस्तेः सस्य विशेषणं न त्वस्तेरिति न प्रादुरस्तीत्यत्र न षत्वम्। उप
सर्गस्यादि किम्। दधि स्यात्। अस्तेः किम्। परिसृजति। मृजू शुद्धौ। अयं न षित्। भिदादिपाठसामर्थ्याच्चाम। मृजेर्वृद्धिः। गुणापवादः।
धाः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्याह। धातुप्रत्यय इति। धातुप्रत्यये किं। कंसपरिमृड्भ्याम्। क्ङित्यजादौ वेति। एतच्चा
न्येषां वैयाकरणानां मतं। इग्गुणवृद्धी इति सूत्रे भाष्यकृता स्वीकृतम्। मृजन्ति। कुसंभ्य इति। हेर्धिः। षत्वष्टुत्वजश्त्वानि। वला ल२
देः। सार्वधातुकस्येति। वलादेः किम्। रुदति। सार्वधातुके किम्। स्वप्ता। धित्वं नेति। सकृद्गताविति न्यायात्। हेर्धिरिति स्या

84

न्यादेशयोरिकाकार उच्चारणार्थ इत्यादि प्रागुक्तसमाधानादिति भावः। रुदश्च पंचभ्यः। किं। जागर्त्तेर्लङ्। अजागः। प्रकृतिप्रत्ययेसादि।
हल्ङ्यादिखिसार्वधातुकापक्षापेक्षत्वाच्च बहिरंगत्वमङयोः। अरुदादिति। इरितो वेत्यङ्। अरोदीदिति। अ। स्तिसिचइतीट्। रुदश्चेत्य
नेन तु न। सिचाव्यवधानेन रुदादेः परत्वाभावात्। सुषुपतुरिति। वचिस्वपीति संप्रसारणे ततो द्वित्वं। सुपिसमाइति। सूतीति। णिजंतः।
समेतियवाद्यनंतः। सुषुप्तः सुषमा विषमः। अ। द्विर्वचनइति। तेन षत्वस हितस्य द्वित्वं। स्वपिरूपाभावादिति। एकदेशविकृतमनन्यवदि
ति तु न अवर्त्तते। तस्य स्थानिवद्भावस्य अशेषत्वात्। षत्वस्य त्रैपादिकत्वेन तत्कार्यं प्रति स्थानिवद्भावाभावादित्याहुः। वस्तुतस्तु स्था
निवदादेशइत्येनं प्रति त्रियादि सिद्धेत्युक्तम्। तस्मादिह समाधानांतरं मृग्यमित्यन्ये। अभितः। उपसर्गादसमासेपीत्यत्र उपसर्ग
स्थितिवर्त्तते षष्ठ्यामित्यतो नो णइति च तदाह। उपसर्गस्थादित्यादि। अंतापवादइति। सोऽतरत्वस्य अदादेशोऽपवादः। अस्यत्वप
वादोऽनुसिनिति ज्ञेयः। जक्षमेति। जक्षन् क्रौउन् रमरममाणस्त्युपभिषदिजशादित्वस्य नि विवादत्वात्। नाभ्यस्ताच्छतुरिति निषेधेन नु
नू इति नुमः छांदसत्वेपि जशादित्वस्य तत्कल्पनाया अन्याय्यत्वात्। धातुवस्वादौ जशादिपाठात्। जाग्रो विचिणल्ङित्सु। विचिणि
त्वु ङि त्स्वोन्यस्मिन्निति। जागरविः। विशब्देन वादिप्रत्यययोग्रहः एते इकारस्तु उच्चारणार्थ इति वदतां मते क्वसावपि न भवति। जजागरवान्। जि
जागर्वांसौ। णिच्। अजागारि। णल्। जजागार। ङित। जागरतः। जागरथः। वृद्धिविषये इति। ण्वुलि। जागरकः। घञि। जागारः। क्ति।
जागरयति। न चैतेषु गुणे कृते उपधायाइति वृद्धिः स्यादिति वाच्यम्। गुणविधेः सामर्थ्यात् प्रतिषेधस्य चानर्थक्यापत्तेः। जुसि च।
चकारः स्पष्टप्रतिपत्त्यर्थः। कसस्यामीत्यतोऽमीत्यनुवर्त्तत इत्याह। अजादाविति। जागरयुरिति। एवं शृणुयुः। किन्तु भुरित्यादावपि
गुणानेतिबोध्यम्। यासुटो ङित्वात् शृणुयुरित्यादौ गुणो नेति भावः। क्रिस्तु मनोरमायां दूषितः। जुसि चेत्युपधायस्ये निषेधोपवादत्वादिति।

॥४३॥

85

केचित्तु जुसि चेत्यत्र जुसौ। सावर्स्य उस्रूपे जुसीति व्याख्यानान्नोक्तदोष इत्याहुः। आजादौ जुसीति समाधानं तु भाष्यारूढं। जागर्तेः
सिच इटि कृते यणादिशा। क्रमं दर्शयति। जागरस्तु इत्यत्र नेति। तत्र हलुते इति। हल्ते तल्लक्षणाया वृद्धेर्जागर्तिति गुणेन बाधस्तेन गुणे न हलंतल
संपादनात्। या हि गुणप्रवृत्तिसमये वृद्धिः सा बाध्यते नान्येति भावः। अजागरिषाम्। अजागरिषुः। अजागरीत्यादि। दरिद्राइ दरिद्रस्य। इ
दरिद्र इति वक्तुमुचितम्। श्नाभ्यस्त। क्रीणंति। क्रीणते। पुनंति। पुनते। दधति। दधते। क्ङितीति किम्। क्रीणाति। पुनाति। दधाति। आतः किम्।
बिभ्रति। ओरित्येव सिद्धे इति। अघमत्यागे भानाभावादिति भावः। निर्मूलमेवेति। यत्तु व्याख्यातं भिःसमर्थ्यते। आमोऽभावे आतो लो
पे कृते आदंतत्वाभावादौत्वं नेति तन्न। आत औ णल इत्यत्र प्राथम्यादोकारे कर्त्तव्ये औकारविधानं दरिद्रातेरालोपेऽपि अवणार्थं सत् आम
भावे लिंगमिति हरदत्तमाधवादिग्रंथैः स्वग्रंथेन च विरोधात्। कथमोत्वस्याप्रवृत्तिर्भवेत्। यदप्युक्तम्। आकारौकारयोर्द्विमात्रत्वाविशेषा
दौकारविधानमिति तदपि स्वचीयः। तस्मिन्पक्षे आमोऽवर्णत्वप्रसंगात्। विवक्षितमिति। तेन दरिद्रातीति दरिद्रः निपचाद्यजेव स्यादिति प
रसप्तम्यां तु श्याद्व्यधेत्यादंतलक्षणो णः स्यात् स तु तस्मिन् आतो युक् चिण्कृतोरिति युकि दरिद्रायक इति स्यादिति भावः। स णिण्वुलो
ति एतेष्वालोपो नेत्यर्थः। दिदरिद्रासति। दरिद्रायकः। दरिद्राणम्। अदरिद्रीदिति। सिनप्यस्तीति सेऽसि। लङः शाकटायनस्यैवेत्यादंतल
क्षणो विकल्पस्तु न भवति। परत्वात् आभ्यस्तयोरित्याल्लोपे आकारांतस्यैवाभावात्। ईहल्यघोरित्यालभिहन शंक्यमेव। स्नेर्जुसि
हलादिपरत्वाभावादिति भावः। ननु दरिद्रा झि इति स्थिते जुसः आगेव आल्लोपात्परत्वादपवादत्वाच्च ईत्वं स्यात्। मैवम्। अकृतव्यूहपरि
परिभाषाया जागरूकत्वात्। ईत्वनिमित्तं हि हलादित्वं तच्च विनाशोन्मुखं जुसो भावित्वात्। झस्य अद् इति। अभ्यस्तादित्यनेन। तिप्य
नस्तेः। पदांतस्य किं। चकास्ति ध्रौ। सस्येति किम्। वशेर्लङः तिपि अवट्। तिपि किं। क्विप चकाः। अनस्तेः किम्। सर्वमा इदम्। आ इति ल
ङि तिपि अस्तेः रूपम्। बहुलं छंदसीति इट् न। शास इदङ्हलोः। अशिषत्। अशिषताम्। क्ङिति। शिष्टः। शिष्टवान्। शिष्यात्।

86

तत्त्वबोधिनी·
॥४४॥

शिष्यस्त्वाम्।आङःसाहच यत्परस्मैपदएवेत्वम्।नेह।आशास्ते।आन्येतुयस्माद्धासेरङ्संभवतितस्यैवेत्वमितिव्याख्यायख्यातिशिष्टोव्याति
शिङ्इत्यात्मनेपदेपिइत्वंस्वीकुर्वंति।शाहे।पूर्वसूत्रेउपधापदान्वयानुरोधेनशासइत्यवयवषष्ठ्यपिइहस्थानषष्ठ्येवउपधायाइत्यस्य
निवृत्तत्वादित्याहस्तेः शादेशइति।धिचेतिसलोपेनशाधीतिरूपेसिद्धेपिसलोपस्यासिद्धत्वाच्छासइतिइत्वंस्यात्तद्वारणायशाविधानमि
त्याहुः।पावर्णयोः।योरित्युक्तेपोष्ठ।सिद्धोयकारइकारयोरितिस्फुटप्रतिपत्तिर्नस्यादितिवर्णग्रहणंकृतं।पिश्चवर्णश्चपावर्णौतयोः
पिश्चेतिइकारउच्चारणार्थोनतुविवक्षितस्तदाह।पकारेइवर्णेचेति।पिवर्णयोरितिपाठस्तुउचितः।लोपंचाधिस्वेतिलोपस्यउदाहरणं
आदीध्यगतः।आवेव्यगतः।दीधिता।दीधिष्यते।वेविता।वेविष्यते।पावर्णयोरितिकिम्।आदीध्यनम्।आवेव्यनम्।यसः।अ
सदिति।तिप्यनस्तेोरितिदत्वम्।आसइति।सिपिधातोरितिरुर्वा।पक्षेरुः।संतादिति।इदित्वान्नुमिसंस्तइति।स्थितेस्कोरितिस
लोपेसरोसिसवर्णइतितकारस्यवालोपः।स्तांति।संस्तःइति।इहापिपूर्ववत्तलोपोवाबोध्यः।वशकांतो।भाषायामप्यस्यप्रयोगो
दृश्यते।वष्टिभागुरिरल्लोपम्।जयायसेनान्यमुत्तिदेवाइति।चर्करीतंच।गणसूत्रमिदम्।चर्करीतमितियङ्लुक्।तस्यपूर्वाचार्याणां
संज्ञा।अदादौबोध्यमिति।तेनयङ्लुगंतेष्वदिप्रभृतिभ्यइतिशपोलुग्भवतीतिभावः।आचार्याश्चर्करीतमितियङ्लुगंतंपरस्मैपद
ऊ॰सा॰५ मित्युक्तंतच्चेहागमकृतत्वादुपेक्षि[illegible]तम्॥ ॥इत्यदादयः॥ ॥यच्चयिपिस्वत्वनिवृत्तिपूर्वकंपरस्वत्वापादनमेवदानंतथापिप्रयोगम
नुसृत्यव्याचष्टे।प्रक्षेपइति।वेधेरितिआहवनीयादौहविषइति।विधिबो।धितद्रव्यस्येत्यर्थः।स्वभावादितितेनआहवनीयेपुरोडा
शप्रक्षेपेत्वप्रमादेनकोपेनवापाषाणःप्रक्षिप्तःपुरोडाशोवागर्तादौसतुप्रक्षेपोनहोमइतिज्ञेयम्।परस्मैपदिनइति।तेनहोष्येइति ॥४४॥
केषांचित्प्रयोगोऽसाधुरेव।स्मराम्भोजुह्वानाइत्यादेस्तुहरौप्रयोगःसाधुरेवशानचोऽप्रवृत्तावपिचानशंतत्वात्।आटीति।आ
डुत्तमस्येत्यनेन।परत्वादिति।हुश्नुवोरिति।यणपेक्षयापरत्वादित्यर्थः।भियोऽन्यतरस्याम्।सार्वधातुके किम्।भायते।बेभायते।

हलादौ किम्। बिभ्यति। क्ङिति किम्। बिभेति। केचित्तु हलौ क्ङितीत्येतन्नातीवोपयुज्यते। इत्वविधानस्य बिभित इत्यादौ चरितार्थत्वात्॥ बिभ्यतीति बिभेतीत्यादौ यणादिप्रवृत्तिसंभवादित्याहुः। अर्तिपिपर्त्योश्च। अर्तेरुदाहरणमियर्तीति वक्ष्यति। उदोष्ठ्य। अंगावयवेति किम्। उद्गतो। ऋदिस्तस्मात्क्तप्रत्यये श्र्युकः कितीतीण्णिषेधात्समीर्ण इति भवति। अन्यथा तु समूर्ण इति स्यात्। शॄदॄप्राम्। शॄ हिंसायाम्। दॄ विदारणे। इमौ क्र्यादौ। पक्षे गुण इति। ऋच्छत्यृतामित्यनेन। पक्षे तु रिति ह्रस्वपक्षे यण्। ननु ह्रस्वग्रहणमिह मास्तु गुणानुवृत्त्या तत्रैव विकल्पोऽस्तु तथा च पूर्णादेशेन पप्रतुः शश्रतुरित्यादि सिद्ध्यत्येव। गुणपक्षे तु पपरतुः शशरतुरित्याद्यपि सिध्यतीति चेत्। मैवम्। गुणाभावपक्षे सन्तरृज्ञातोऽपि तिरित्यप्रसंगात्। न चान्तरंगत्वाद्यणो वस्यादिति वाच्यम्। वार्णादांगस्य बलीयस्त्वात्। उरृत्। ड्वितः क्त्रिः। भृ त्रिमम्। भृञामित्। निजां त्रयाणामित्यतोऽनुवर्तनादाह। एषां त्रयाणामिति। केचित्तु कपिंजलाधिकरणन्यायेन त्रयाणामिति लभ्यत इत्याहुः। त्रयाणां किम्। जहाति। श्लौ किम्। बभार। ईहल्यघोः। श्नाभ्यस्तयोरातः। लुनीते। पुनीते। क्ङितीति किम्। लुनाति। अघोः किम्। धत्तः। दत्तः। मिमीतेइति। घुमास्थेतीत्वमिह न प्रवर्तते। तत्रार्धधातुकस्यानुवृत्तेः। अन्यथा मातः। माथः। गाते। गासे। इत्वापत्तिप्रसंगात्। अतएव काशिकायामुक्तमार्धधातुकस्येत्यधिकारेणात्यपीतियोगं व्यावदिति। जहातेश्च। क्ङितीति किम्। जहाति। सार्वधातुके किम्। हीयते। चादिदीताविति। अतएव च प्रदिः प्रयुक्तः। जहिहि। जहाहि। जहीहि। रामं जायामिति। लोपो यि। सार्वेति किम्। हेयात्। प्रणिददातीति। नेर्गदेति णत्वम्। दत्त इति। श्नाभ्यस्तयोरित्यालोपः। अघोरित्युक्तत्वादीत्वं तु न। अदादिति। गातिस्थेति सिचो लुक्। दधस्तथोश्च। दध इति कृतद्विर्वचनाभ्यासं दधातेर्ग्रहणं तेन तु दध धारण इत्यस्य मिति व्याचष्टे। द्विरुक्तस्येति। सुषंतस्य किम्। दधाति। नन्वेवं दधत्तोरित्यादावपि न स्यादाल्लोपस्यानित्यत्वेनासषंगत्वादत आह। वचनसामर्थ्यादिति। निजाम्। श्लाविति किम्। निनेजु। नाभ्यस्तस्य। अभ्यस्तस्य किम्। देषाणि। अचीति किम्। देवेष्टि। षिद्ग्रहणमुतो वृद्धिर्लुकि हलीत्युत्तरार्थम्। निनेत्त। बहुलं छन्दसीति लमिति। एतच्च पूर्वोत्तरान्वयि। इयर्तरिति। अभ्यासस्य इयङ्। अ

भ्यासाउत्तरस्य तु गुणः। इयर्तीति। अदभ्यस्तादित्यतात्र्युर्यादिति। गुणोर्त्तीति गुणः। आरदिसर्त्तिशास्त्तीत्यङ्। ऋदृशोऽङि इति गुणः। क्व
इति। तस्य तकारस्य ससजुषो रिति षत्वं। तुतूर्तीति। हल्चि चेति दीर्घः। धन धान्ये। धान्यार्जन इत्यर्थः। दधंत इति। छांदसत्वादनुनासिकस्येति
नेह दीर्घ इत्याहुः। जनसनखनाम्। जननी। जनामादुसंविरित्युस्तयोरपि ग्रहणम्। सत्वादौ सनि सिषासतीति। जज्ञतीति। गमहनेत्युपधालोपः।
जज्ञापादिति। येविभाषेतिवा आत्वम्। एवं जायादित्यत्रापि। जिगातीति। बहुलं छंदसीतीत्वम्॥ ॥ इति जुहोत्यादि॥ ॥ दिवु क्रीडा।
उदित्करणं क्त्वायामिड्विकल्पार्थं निष्ठायामनिडर्थं चादेवित्वा। द्यूत्वा। द्यूतं। क्रीडायां दीव्यंति माणवकाः। विजिगीषायां शत्रुं दीव्यति।
विजिगीषते इत्यर्थः। कांतिरिच्छा। द्युतेः पृथग्ग्रहणात्। षिवु। परिषिषेवेति। स्थादिष्वेवाभ्यासस्येति नियमो नेह प्रवर्त्तते तत्र प्राक्सिता
दित्यनुवृत्तेः। अस्य चाप्राक्सितीयत्वात्। तेनाभ्यासषत्वं यदि निविभ्य इत्यनेन न भवत्येव। न्यषेवीदिति। सिवादीनां वेति विकल्पः।
नृती। ईदित्करणं श्वीदित इति निष्ठायामिण्निषेधार्थम्। यद्यपि सेऽसिचीति इटो विकल्पितत्वाद्यस्य विभाषेत्यनेनैवेण्निषेधः सिद्ध
स्तथापि यस्य विभाषेत्यस्य अनित्यत्वज्ञापनार्थमीदित्करणं तेन धावितमित्यत्र राजधियेत्यादि सिद्धम्। सेऽसिचीति। नर्तिष्य
ति नर्त्स्यतीति। निनृत्सतीति। कर्तिष्यति कर्त्स्यतीति। चिकर्तिषति चिकृत्सतीत्यादि ज्ञेयम्। अनत्तरादिति। निश्चसिचात्युक्त्यादिह नित्यमिट्।
चेस्तुरिति। वाऽङ्गत्रस्तुअसाभित्येत्वाभ्यासलोपौ। कुथ पूती भावः पवित्रभवनम्। कुथ्यति कृमिः। पवित्रीभवतीत्यर्थः। पुष्प विक
सने। कालात्। पुष्प्यत्पच्यमाने श्चेति सूत्रे पुष्प्यदिति शत्रंतः। पुचाद्यच्चि पुष्पम्। संज्ञायां कन् पुष्पकम्। जीउ। गुणश्चहलन्तस्य
त्ययेटाप्। व्रीडा। घ्निजुडाउः। अत एव व्रीडमावहति मे स संप्रतीति कालिदासः। ओडादिवाभ्याशगतो विलिल्ये इति माघश्च। षह मु
ह। परिनिविभ्य इत्यत्र सहेत्यकार उच्चारणार्थ इति षत्वमिह भवति। परिषह्यति। तीषसहेति इड्विकल्पस्तु नास्य भवति। सहेति शब्देन
निर्देशः। परिनिविभ्य इत्यत्र तु नेस्यर्द्ध जरतीयमिदं हेयमेव। तत्वं तु शयोगमनुसरत्यमहद्भिरेवं निर्द्धार्यं। नपुंसके भावे क्तः। खुहितात्

89

रत एव पूरणगुणेतिसूत्रेसुहितार्थतृप्तस्य र्थ इतिव्याख्यातं। अ छत्य तामीतिगुणेकृतेनशास्देतिगुणशब्देनभावितस्यनिषेधात्त
एकहल्मध्येइत्यप्रवृत्तौवातृ अमुत्रसामित्येत्वाभ्यासलोपविकल्पः। षड् असवकुत्सितिःस्मर तिप्रोघटस्यतद्वत्त्वादिशयोगाभावात्। शा
णीस्युक्तं। स्वादय ओदित इतिवक्ष्यमाणत्वादोदित ओति निष्ठातस्यनत्वम्। क्षे सूनम्। विकल्पमिति। परमपीतिशेषः। निषेधेप्राप्तइति। पु
रस्तात्प्रतिषेधकाण्डारंभसामर्थ्यादितिभावः। दीङ्। पंचमीत्वभिप्रायेणव्याचष्टे। परस्येति। आजादेरिति। ङःसीत्यत्रवङ्भयनिर्देशपूर्व
मीनिर्देशोबलीयानितिसप्तम्याः षष्ठीकल्पनम्। अविकिरेदद्यते। क्तितातिविंठपदानम्। अध्यायत्वेनासिद्धत्वमाशंक्याह। वुग्युटाविति।
दिदापेरति। परमपियणं बाधित्वा नित्यत्वाद्दीधीयुट्। सतिङयणिईकारअवर्णनस्यादितियुटः सिद्धत्वमुक्तम्। मीनाति। मीञ् हिंसायाम्। डुमि
ञ् प्रक्षेपणे। मामाय। उपदायप्रमातव्यम्। उपदातव्यम्। एज्निमित्तइतिविषयसप्तमीतेन क्षत्रोदावात्पश्चात्घत्र। अतायुगितियुक्। उपद
यइति सिद्धमिति। अन्यथा एरचितिकृते नात्वालेउपदाःइतिस्यात्। अदास्तेति। दाङः प्रतिषेधः। स्याद्धोरित्वादि न घुत्वमित्यर्थः इतो निरूपं न भवती
त्यके। अन्येतुस्याद्धोरित्येतनु नत्ववतिदाङो ऽनुकरणेदारूपासंभवेन अनुवृत्त्याल् अतएव प्रणिदातेत्यादौ नेर्गदेतिणत्वमपि नभवतीत्या
हुः। अयं भावः। दो अवखंडने इत्यादेर्दारूपत्वसंभवतीत्यादेचउपदेशइत्यस्यानैमित्तिकत्वात्। दाङः स्थाने ऽज्निमित्तप्रत्ययविषये आत्वंदाङ्ग्य
नुकरणेऽज्निमित्तस्याप्रसक्तत्वाद् घुत्वम्। एवंच घुसंज्ञैवनास्तीति णत्वस्याप्रसक्तिरिति। ड्डुङ् उ नः। ड्डुनुवान्। स्वादिषुपाठसाम
र्थ्यान्निष्ठायामिटाम इटि हिसति प्याव धातादौदित इति शयोगस्तु भौवादिकस्य। निष्ठाशीङ्। स्येत्यत्रनिष्ठेतियोगविभागादकित्वम्
णात्याङ्ङः। प्रीङ् हिंसायाम्। मीञ् इति क्र्यादौ। प्राणवियोगइति। मीयतेप्राणैर्वियुज्यतइत्यर्थः। लीङ् श्लेषणइतिक्र्यादौ पठकेति।
सार्वधातुकेयगितिविहितेन। नवुस्येनेति। अन्यथा लिङ् इत्येव अयादितिभावः। ङकानिर्देशस्यफलमाह। व्रीङोरितिल्यपिवि
लीयोवीलायाव्रीङः। वृणोत्यर्थोवरणंच। वरणइत्यादौपठ्यमानत्वात्। वरणे इतिवक्तव्ये वृणोत्यर्थ इतिवचनंवैचित्र्यार्थम्। आ

चरण इत्यादौ माङः। मायत इति। घुमास्थेतीत्वं तु न। तत्राईधातुक इति। घिकात्। घोऽन्तकर्मनाशनम्। रावर्णस्य रारे घोरित्ग्रावण
माहवर्द्धतिराघवेति संबुद्ध्यंतम्। स्येति लोटाम् ध्यमैकवचनम्। अभिष्यतीति। उपसर्गात्सुनोतीति षत्वम्। अभ्यष्यदिति। प्राक्सितादडु-
व्यवायेऽपीति षत्वम्। अभिषिषासतीति स्थादिष्विति नियमान्न षत्वम्। दो अवखंडने। अवत्युपसर्गप्रयोगो वैचित्र्यार्थः। खंडने इत्युक्तेना
वत्युक्तेऽपीष्टसिद्धेः। प्रणिदातीति। नेर्गदेति णत्वम्। देयादिति। एर्लिङीत्येत्वम्। अदादिति। गातिस्थेति सिचो लुक्। ज्ञा जनो जा। जा-
नाति। शीति किम्। ज्ञाता। जुरिति। ऋस्योच्चारणेऽपि प्रातो दीर्घो यञीति दीर्घसिद्धौ जायहणमंगवृत्तपरिभाषाज्ञापनार्थम्। तेन पाघ्रातोः पि-
बादेशे कृते गुणो न भवतीति पिबादेशस्यादंतत्वाश्रयणं तत्पायांतरमित्याहुः। जिविणि ति चेति। नेति कृत्तूदाहरणं यत्रि। जनः णि
तिहुतिवुञ् जनकः। जनयत। स्वरस्तु उपधावृद्धेरसत्यां जनीत्वषो तिमित्वान्मितांह्रस्व इति ह्रस्वः। यिपादिति। ईदित्वान्निष्ठायामिट् न।
दासः। एवं पूर्वेऽप्याद्यादेशत्वात् पूर्णश्याद्यादि ज्ञेयम्। केचित्विति। तेषां मते इयं चये तप्पतेरस्य प्रयोगो न तु तपतीति। न्यविसतेति। निरवी-
दिशानेर्लुङि शल इगुपधेति क्सः। नेर्विश इति तङ्। आशाशब्दे मे दिवाशास्युस्व। बाभुरराद्य:। ति लिक्षायां मितानु सिञ्चुकि म्घइ
तिसन्। तर्द्वि हिंसायां। हिंसायामित्युक्तम्। इंगुचिरा इदित्वान्नेट्। शुच्यमे। क्लिन्नमित्यर्थः। नेनइति। न हो धइति घत्वम्। चेण्रते पर।
तशब्द इति समध्यात्मनेपदे प्रथमपुरुषैकवचनम्। नशब्दे क्लिन्ने आपत्स्ये। अरापपादीति। चिणोलुगिति नशब्दस्य लुक्। नेर्गदेति ण-
त्वम्। आबाधीति। दीपजनबुधेति चिण्। अनोरध कामे। अनोः परो रध धातुः कामे। काम इच्छा। दिवादिषु पाठसामर्थ्यादुपाधिरस्य
इति श्नमबाधित्वा श्यन्। नाप्यामिति। रजि हशोः सत्यमकितीत्यकित्येव विधानात्। लिश। आतपादिना अनुल्पस्य अल्पभावो
लीभावः। लिलक्षेति। लिङ्सिचावात्मनेपदे इति कित्वान्न गुणः। अलिक्षतेति। शल इगुपधेति क्सः। राधोऽकर्मकाद् भिन्नु कामप-
रायति। अकर्मकादेवेति। राधो वृद्धावेवश्यन्निति व्याख्यायामकर्मकादिति विशेषणं व्यर्थं स्यात्। वृद्धावस्याकर्मकत्वात्। अकर्मकात्किम्।

शात्क्रमपराध्नोति। हिनस्तीत्यर्थः। राधसंसिद्धाविति स्वादेः। राधोहिंसायामित्यनुवादात् हिंसायामप्ययम्। उदाहरणमाहेति। अकर्मक
त्वप्रयोजकस्य कस्यचिदर्थस्येति भावः। अकर्मकेष्वन्तस्य प्रयोगान्दर्शयति। यन्महमित्यादिना। क्षयोपेति। राधो क्ष्यो रिति त्वधं घ।
अपुषदिति। ङित्वाद्गुणाभावः। शुष शोषणे। शोक्ष्यति। श्लिष आलिङ्गन इति स्वचयोगविभागेन व्याचष्टे। श्लिषइति। अनिटः क्लेः
क्स इति। एतच्च श्ले सिचः शल इगुपधादित्यशो न त्वनुवर्त्तत इति भावः। अनिटः किम्। श्लिषु दाहे इति भौवादिकस्य सेटो माभूत्।
अश्लेषीत्। शल इगुपधेति सिद्धे पुनः क्सविधेः फलमाह। पुषादेरङ्ग्रतिसामर्थ्यादिति। यदि हि श्लिष इत्यारभ्य एव क्सो नियम्येत
तर्हि योविभागो व्यर्थः स्यादिति भावः। शल इगुपधादित्यस्यापीति। तेन न कर्मण्यपाताम् स्तीति श्लेषणालिङ्गने सिजेव न चति न तु क्सः।
समाश्लिक्षत जतु भिकाष्ठेरिति। क्सप्रत्ययेसति तु समाश्लिक्षंतेतिस्यादिति भावः। अल्पाक्षरत्वाचेति। आलिङ्गनं हि प्राणिकर्तृकं
तु काष्ठादिकर्तृकमिति भावः। श्लिषः सेरालिङ्गन एव क्स इति व्याख्यानफलं दर्शयति कर्मणीत्यादिना। श्लिक्षाताममित्यादीपि
घपिक्ससिचोर्विशेषोनास्ति क्सस्याजीत्यकारलोपात्तथापि थासादावक्सैवविशेष इति ध्वनयन्नुदाहरति। अश्लिक्षाः। अश्लि
क्षमिति। न्यासकारादय इति। तथा च तन्मते ऽन्त्री नः क्र इति वर्त्तमाने कोत्तवृति। आश्लिष्यान्विषायां नेट्। स्विन्नः। विभाषाभावादि
कर्मणोः। स्विन्नोऽस्वेदितमित्यादि [illegible] षिधुः संराद्धि निष्पत्तिः। उदितो वेति कइति। उदितो वानुदात्तेषु सिध्यतेः पाठो व्यर्थ।
स्यादिति भावः। रधादिभ्यश्च। स्वरतिसूतीत्यस्य तो वेत्यनुवर्त्ततेयोगविभागोवैचित्र्यार्थः। गणनिर्देशाद्यङ्लुकि सा राधितेत्येव न
नुरारद्धेति। नेट्यलिटि रधेरिति। किं। ररंधक। आलिटीति किं। ररंधिव। नु मिक्रतस्स्योगात्परत्वेना कित्वान्न लोपः। नं श्रीतानशोवीति कुत
मि हन शक्यं। नशो न भा भ २ क मिगमीत्यतो नेत्यनुवर्त्तते उदाहरण त्वं न स्यादिति। षस्येत्युक्तेपि पदस्येत्यस्य विशेषणेन षान्तस्ये
तिलाभादतग्रहणं व्यर्थं सत् ज्ञापयतीत्याह भूतपूर्वेति। क्राष्टानमिति। करणस्य शेषत्वविवक्षायां षष्ठी। तत्र यथेति। अनु

दान्तस्य चर्दुपधस्येति विकल्पेन अमागमः। रधादिभ्यश्चेति। रधनशतृपदृपद्रुहमुहष्णुहष्णिह इत्यर्थः। शमु उदित्वात्क्त्वायां वेट्। शमित्वा
शान्त्वा। यस्य विभाषेति निष्ठायामनिट्। शान्तः। तमु अवस्थाने। शेषमिति। ष्यनि दीर्घो लुङि अङि च विशेष उक्तस्ततोऽन्यो दित्यर्थः।
च क्षण्वेति। म्वोश्चेति समस्य नलोपे कृते णत्वम्। शमादिपाठ इति। शमित्यष्टाभ्यो घिनुण्। शमादय इति। शमु तमु दमु श्रमु भ्रमु क्षमु क्लमु मद इ-
त्यर्थः। यसोऽनुया अभवंदति। यस इत्येवास्तु। तत्र समः। नियमार्थमिदम्। सोपसर्गाच्चेत्संश्चेत्संपूर्वकादेवेति। एवं च पूर्वसूत्रेऽ-
नुपसर्गादिति ग्रहणमुत्तरत्र च यसश्चेति ग्रहणं त्यक्तुं शक्यमिति। दाहे पठित इति व्युपदाह इत्यस्मिन्नेव गणे पठित इत्यर्थः। अऽपी-
मिति। दाहे पठितस्य तु सिञ्जेव। अव्योषात्॥ ॥इति दिवादयः॥ ॥षुञ्। सुनोति। लोपश्चास्योत्युकारस्य वा लोपः। सुनवानीति॥
आडुत्तमस्येत्याटि कृते हुश्नुवोरिति यणं बाधित्वा परत्वाद्गुणः। सुनोतेः स्यसनोः। रनपरे तस्मादित्यनुवर्त्तते इत्याह। षोऽनस्या-
दीति। सन्निति अमिषुसः। सन्नन्तादस्मात् क्विपतो लोपे रुत्वे दीर्घे शुसूषतीत्येतनुनोदाहरणम्। स्तौतीति ण्यपरे वषणीति रिनि
पमेनै वषलो भावासिद्धिः। एतच्च काशिकायां स्पष्टं। चिञ्। चयनेऽस्य च नाविशेषः। विभाषा चेः। चजोरिति सूत्रात् कुरनुवर्त-
ते सन्लिटोर्जेरित्यतः स। लिटोरिति च। सत्यमुदाहरणं। चिकीषति। चिचीषति। स्तृञ्। श्रुसंयोगादेः। स्तृ इस इति वेत्यत इट्वेत्यनुव-
र्त्तते लिङ्सिचोरिति सूत्रात् आत्मनेपदेष्विति च तत्राह। इडास्याच ऊतीति। ऊः किम्। अस्तोषीत्। वेभः धातोस्तनौतेश्च थलि
इट्। भावो निपात्यते। तं हिडोता प्रथमो बभूव यायेनातरिक्षमुर्वाततंथ। भाषायां तु बभूविथ तेनिथ। जगृभ्मा ते दक्षिणमिं-
द्र हस्तम्। भाषायां जगृहिम। वृणोतेः थलि क्रादिसूत्रेण इण्निषेधे सिद्धेऽपि नियम एव निषेधो नान्यत्रेति निषेधार्थं ववर्थेय-
हणम्। ववर्थ तं ह्युतो निषायां ववरिथ्यु थ ववृषे। लिङ्सिचोः। वृत इत्यनुवर्त्तते। आत्मनेपदेषु किम्। अवारीत्। अवारिष्टां।
अवारिषुः। सिनिचपरस्मैपदेष्विति निषेधादिह वृतो वेति न दीर्घः। हिनुमीना। प्रमीणाति। हेरचङि। जेघीयते। अचङीति किम्।

अजीहपत्। ह्रूण्यं तस्य धातोरनत्वात्केवलस्य लत्वासंनिमित्तप्रत्ययपरत्वाभावात्कुत्स आक्षेवनास्तीत्यचङि तिनिषेधो व्यर्थः स्यादा
पयति। ण्यधिकस्यापि कृत्स्नं भवतीति तेन जिघयिषतीत्यादि सिद्धम्। आपुक्ष हिति संयोगपर्वत्वात्तु तश्च प्रत्ययादिति हेलुङ नराधीति
सायाम्। अनरत्यनुवर्तमाने पि सामर्थ्यादिकारमात्रस्यानित्वेना आश्रीयते। अश्नोतेश्चात स्मस्नु उ त्यनुवर्ततइत्याह। घो घोरुत्तादीन्।
मु विकरणानिर्देशः किम्। अयादेरशभोजनरत्यस्यमा भूत्। आश। आशतु। जि घषा। भल्लेन घस्तोतिमाग लभ्यते इति स्तु त्वच्यकु अल
घषो। स्वलिन्द घ गिति ह्निनो वि धानादन्यत्रापि परांतविषये कुत्वम्। दंभु दंभु दंतने। लोकवंचनाय विहितकर्मानुष्ठानं दंभः। त्वपा अ
पसे दुः। अनुदात्तेषु श्यना निर्देशात्। अह व्याप्तौ। अस्माद्धकारो णयं दिति अघ इति। तस्यादित उदात्तेमर्ह त्वमित्यस्मान्निरूप
पादितम्। अन्ये लाङ्गः। रात चक्रेयोर् ईषो केनेध्विप्यवत्र घ इति षध्यं तमेव। घेङि नो ति गुणस्त्र अहिशब्दस्य चादेसत्वान्नेति। सि।
एते षट् धातवः। एकएव आज्ञा इति तिप्सनेतु य धातवः॥ ॥ इति स्वादयः॥ ॥ तुदतीति। लघूपधगुणं बाधित्वा नित्यत्वात् शइत्येके।
अश तव्यहपारिसाध्यामुणानभवत्तेत इत्यन्ये। ओस्जी भ्र पाके। भर्जनरूपः पाको ऽत्र धात्वर्थो न तु ओदनादेः पाकस्तत्र प्रयोगाभावादिति
सावादित्पाकः। व्रस्जोरिति केषांचित्पाठे तु ओदितश्चेति। निष्ठानत्वं ग्रसत्यां वृक्षः वाजिनि तिन सिध्येत्। भ्रस्जोरोपधयोः रम्यकार उच्चा
रणार्थः। रमित्यस्य अन्त्यत्वात् परत्वे रोपधयोरिति षष्ठीनिर्देशस्य वैयर्थ्यमाशंक्याह। निवृत्तिरिति। अयमभावः। स्थानि विशेषत्वा
त्वापमित्यस्य करणान्न रोपधयोः स्थाने रमागमः भवति। यत्र तु निर्दिष्टं तत्स्थानि कृत्वा रोपधयोः स्थाने न भवति। एवं चास्य आदेशागम
त्वेसंभवतो यथा अमः अन्त्यागमत्वेइति। अन्ये खेनाद्धर्व्यानमयुक्तमिति मत्वासनः कि चात्यतो लोपमनुवर्त्य भ्रस्जोरोपधयो लोपः रमतु
आगमएवेत्याहुः। अपरे तु भ्रस्जोरं सरन्यतरस्याम् मित्येवसूत्रमस्तु रसः रु इति छेदः रसत्रुइति रेफाकारसकाराणायं संघात
स्यस्य रूपेरत्यादेशस्यादित्यर्थः। तत्र अ। क्ङिति भृज्जको भज्जनं बभर्जेत्यादि सिध्यति। सकाराभावपक्षे तु भ्रज्जाको भ्रज्जनं
बभ्रज्जेत्यादि। क्ङिति तु रेफकारपक्षे भृपि भर्ज्येदि समादि। तदभावे संप्रसारणे सति तत्वैवरूपम्। एवं च बभर्ज्यतइत्यादि

त्वबोधिनी
॥४८॥

रीकोरेफस्यनिवृत्तिंवारयितुमनुदात्तोपदेशइत्यतउपदेशग्रहणमनुवर्त्स्यइदानींतुनानुवर्त्स्यमि।किमितिरमागमंबाधित्वासंप्रसार
णमितिपूर्वविप्रतिषेधश्चनवक्तव्यइतिमुहदेवलाघवमित्याहुः।इस्वरसोर्वचनात्सिद्धमितिवार्तिकाशयवर्णनमेवनतुपूर्ववचना
दित्यस्यवास्यवचनादितिच्छेदोभाष्यकारैस्तुसूत्रंसिद्धवत्तेयथान्यासमेवास्थितिमद्भिरस्यांकल्पनायांदुष्टत्वंसूचितंतच्चमनोरमा
यांस्पष्टमेव।तथाहि।रेफाकारस्यसमुदायस्यरमभावेपतदोषात्अपिलिटिबभ्रज्जतुःबभ्रज्जुरित्यादौध्येतबभ्रजतुःबभ्र
जुरित्यादिस्यात्।नचात्रगुणेननिर्वाहः।रमभावेसतिअसंयोगाल्लिट्किदितिकित्वप्रसंगान्निषेधात्।सनीवंतर्धेतिइड्विक
ल्पाद्बिभ्रक्षतिइत्यादिरिष्यतेबिभर्क्षतीत्यादिस्यात्।रमभावेहलन्ताच्चेतिसनःकित्त्वप्रवृत्तेः।लिङ्सिचावात्मने॰भ्रक्षीष्टअभ्रष्टेत्यादी
ष्यते।भ्रक्षीष्टअभ्रष्टेत्यादिस्यात्।लिङ्सिचावात्मनेपदेष्वितिकित्त्वात्।णिजन्ताच्चङिअबभर्जत्सोदिइष्यतेअबीभ्रजत्इत्यादिस्या
त्।उर्ररारामपवादत्वेनउरदितिरत्वेलघ्वचोसन्वल्लघुनीतिसन्वत्त्वाभावान्नत्यतइतिरत्वेदीर्घोलघोरितिप्रवृत्तेः।यद्यपिउक्ते
दित्यस्यवैकल्पिकत्वादबभर्जदितिसिध्यत्येवतथापिपक्षेअबीभ्रजन्नित्याद्यनिष्टंस्यादितिबोध्यम्।भ्रस्जिभ्रजीभर्जनइतिचान्द्रा
दशांरूपमिष्टमितिचेन्मैवम्।भर्जनार्थमिहतादृक्रूपमिष्टंनतुपाकसामान्ये।उभयोरेकार्थत्वाभ्युपगमेपिप्राचीनाभ्युपगमात्दोषा
स्तुदृष्टाएव।नहितेपिधात्वन्तरेणसुपरिहराः।अपिचलिटिसृजेरपिधातोर्गुणाभावादनुदात्तत्वेनआत्मनेपदित्वाच्चबभर्ज्ज
रित्यादिरूपस्यतेनाप्यसिद्धेः।तथासृजेरनुदात्तत्वेनततःपरंषासन्लिङ्सिचामिडागमश्चोव्यात्।बिसृक्षतीतिसृक्षीष्टअ
सृष्टेत्यादिरपितेननसिध्यति।एतेनभ्रस्जेर्भ्रजिरादेशइतिपक्षोपिनिरस्तः।पूर्वोक्तदूषणसंगात्।किंच।अस्मिन्पक्षे ॥४८॥
यङ्लुकिअधिकोदोषः।चघादेशवत्साभ्यासस्यभृज्यादेशेपुनर्द्विर्वचनस्यदुर्लभत्वात्तस्याऽनिवृत्तेनअनभ्यासस्ये
तिनिषेधात्।स्वीकृतेपिद्विर्वचनेरुग्रिकौकोऽभ्यासस्यस्युरेवेतिरुगादिरहितंबाभ्राजितावाभ्राजिष्यतीत्यादिरूपं

95

नैव सिध्येत्। यदि तु लाघवपक्षपातेन स्वातंत्र्यं चिकीर्ष्यते तर्हि भ्यस्तोरस्सोरिपठित्वा रासिति समुदायस्य अरे वा विधीयतां तथा च न
कोपि दोष इति। अयमत्र संग्रहः। रस्सः श्चेदपि लिट् स्यन् लिङ् सिचू चङ्ः रराणि भ्युते दोषो भ्यस्ते र्गौजौ चेवं दोषो यङ्ः लुकि वा॥ वि
कः। हलाभ्यासस्य हि रेफस्यावोकवेद्वंते व धिपयाधेत्वं पुनर्न लभ्येत स्यात्। निवृत्ताद्धधेरिव। तस्मादस्तु यथान्यासं स्वातंत्र्ये स्तु रस्सोरिति।
एवंविज्ञानिषेधे नेति। नित्यत्वादित्य (पिरुववम्। न च संप्रसारणात्सवं धातोरेफस्य पश्चात्तु रमागमे रेफस्येति रा वांतत्राभ्यासंप्रस
रणस्य नित्यत्वं नेति शंक्यम्। लक्ष्यानुरोधेन कृता लुगप्रसंगित्वेनापि वृत्तिन्त्रित्यत्वस्वीकारात्। विज इट्। इह वद्धि पस्येति सूत्रान्नं
उः कपुत्यापस्यादिरित्यनुवर्त्तते तेन इउ। दिगत्वयोर्लभ्यतद् इति मनोरमायां स्थितम्। न च व्यास्तु इह इ उ इत्येते न उत्तमैकवचनं न ग
घेते तस्यानु। उः सर्वधर्मम्। तन्निमित्तगुणस्यात्रासेरतोलक्षणया इत्तु। नुगं घृतेरट्गत्ययरस्यादिरिति फलितार्थकथनमिउ।
दिगत्वयोः ङिद्वदिति। एवं च इउ। दिति लाघवाय यस्यादिरिति अनुवर्त्तनं क्लेशो व्यर्थ एवेत्याकूः। इह औविजौ तितुदा (रूघादिश्च
ग घते। ननु विजिर पृथक्त्वावइ तिजुहोत्यादिर्व्याख्यानात्। यस्तु चूहरदत्तेन जुहोत्यादेरग्रहणे हेतुरुक्तः तस्यानिक्वादिति त
द्युक्तम्। क्र्यादिनियमेन लिटि दृष्टेसावात्। न च तत्र कित्वेन गतार्थत्वादियो ङित्वं व्यर्थमिति वाच्यम्। अपिल्लिटा कित्वेपि विवेजि
येत्यत्र पित्वेन कित्वाभावात्। वश्चेति। अत्र नव्याः। वश्वेत्यादौ लिट्यभ्यासस्येत्यभ्यासावयवयोर्धापोर्यपियणोः संप्रसारण
प्रसक्तौ पूर्वस्य यणो निषेधाय न संप्रसारणे इति सूत्रं स्वीक्रियते तत्र अत एव ज्ञापकात् परस्य प्रथमं संप्रसारणमिति परिकल्प्य
आपादपरिसमाप्तेरंगाधिकार इति पक्षमभ्युपगम्य हरदत्तस्यांगीक्षिप्तप्रत्ययनिमित्तकत्वस्वीकारादेवा परस्मिन्निति स्था
निवद्भाव प्रवक्ष्या संप्रसारणपूरलमाश्रित्य वकारस्य संप्रसारणनिषेधः कथंचिदुपपाद्यते परस्य संप्रसारणे परस्य यणस्संप्र
सारणमिति वाक्य (यितेतु परस्यैव संप्रसारणं न तु पूर्वस्य यण इत्यर्थलाभात् उक्तक्लेशं विनैव वव्रश्च पुनरं इत्यादि सर्वं सिध्यति।

नचैवंलिटि वयोयः वेञइत्यस्य संप्रसारणनिषेधाय नञोऽनुवृत्तिर्न लभ्येतेति वाच्यम्। न लिटि वयो य इति सञ्ज्ञकरणे बाधको भावोऽम्
असंप्रसारणइतियथाश्रुतसूत्रगणयष नेलतनोगल। साचाङ्गयस्याधिक्याञ्च। एवं च लघूपायेनेष्टसिद्धौ न संप्रसारणइतिसूत्रमारंभो
ज्ञापयति निमित्तभेदात् सावपि स्थानिभेदे पुनरपि कार्यं प्रवर्त्तत इति। तथा घसऌ इपास्य इत्यादौ उकाकारात्परस्य घकारस्य द्वित्वेलतेषु
नरूकारात्परस्य दकारस्यापि द्वित्वमिति। अक्रियाकारादिव्याख्यानं सूत्रकाराभिप्रेतमेवायदि स्थानिभेदेऽपि निमित्तैक्ये कार्याप्रवृत्तिः
कचिद् दृश्यते तत्रतु ज्ञापकसिद्धं न सर्वत्रेति सदोषः परिहीयतामित्याह। अभ्यस्ता दिति। ऊ दित्वात् सक्षेरङ्वा वदङ्गजेतिवद्धेनेटा। तिनि
षेधः। अप्राप्यतीति रको रितिसलोपः। ब्रश्चेतिषः। षढोरिति कः। तेनः सस्य षत्वं। न चात्र शकारस्य कथं लोप इति वाच्यम्। धातुपाठे स
कारस्यपाठात्। तदाऊः। नेकारर जावनुस्वार पंचमौ झलिधातुषु। सकारजः शकारश्चुत्वात् षो टवर्गस्तवर्गजइति। ओव्य वस्थाजीकर श्रेयं
णछघ्न करणमापर्युदासेनेति। असज्यप्रतिषेधे हि वाक्यभेदो ऽसमर्थसमासश्च प्रसज्येतेति भावः। कृन्मात्र विषयत्वादिति। तेनउ
द्विचिताउ द्विविवु मित्यत्र संप्रसारणं भवति। व्याचितो व्यचिष्यतीत्यादौ तु तिङ् विषयेन भवति। विव्याचेत्यत्र कृत्वादित्वे जातेऽपिन भवतिः।
गाउः कुटादिभ्य इति स्वेञ्जृणितः प्रत्ययाः ङितः स्युरिति उक्तत्वात् उत्तमेण। लितु णित्वाभावपक्षे ङित्वात् संप्रसारणं व्याख्यातो
रूहपाठस्तु उछ इतिउञ्छतिरित्यत्र आछी नघोरितिनुम्विकल्पार्थः। पर्वपाठस्तु स्वरार्थः। तथाहि उंछतिउञ्छतीत्यादौ दोषपिद्वचनेशप्
तिबादानामनुदात्ते धातुस्वरेण आद्युदात्तं पदम्। शतृप्रत्ययस्वरेण मध्योदात्तमिति। न च सतिशिष्टस्वरबलीयस्त्वमन्यत्र वि
करणेभ्य इतिवक्ष्यमाणत्वात् कथमिह मध्योदात्ततेति वाच्यम्। कुरुत इत्यादौ तसादेर्विकरत्वेन तत्स्वरस्योदात्तस्य विकरणस्वरापेक्ष ॥४९॥
यागबलत्वेपि शास्य धातोः परत्वेन धातुस्वरापेक्षया शस्वरस्योदात्तस्य प्रबलत्वात्। उपलक्षणत्वादिति। अतएव आउ
पधस्य चेत् अभ्यो तोरेवेति नियममाश्रित्य द्विहल्ग्रहणं भाष्यकारैः प्रत्याख्यातम्। अन्यथानन्तसंग च्छेतेति भावः।

ऽऽनर्छति। आनर्छ इति पूर्ववदासाम्। न्यासस्तु ऋच्छत्यॄतामिति लिटि परे गुणविधानसामर्थ्यादाम्भावः सिद्ध इति इजादेरितिसूत्रे आनर्छ इत्युक्ते
तस्य इष्टसिद्धिप्रतिपत्त्यर्थमित्याहुः। अन्ये तु ऋच्छत्यॄतामित्यत्र दीर्घादिक ऋच्छेरिति सर्वैर्व्याख्यातं तथा गुणान्तरेऽपि ऋच्छिरस्तीत्यनुमीयते तत्र
शितोऽस्तु लिट्याम् निवारणाय आनर्छ इत्येतदावश्यकमित्याहुः। मिच्छ उत्क्लेदः क्लेश उत्क्लेशः। ऋ चस्त्रतो। ऋच्यतेऽस्त्यत एव गत्यादिकमनर्पयति।
स्कुम्बाकुलकादिहकरणे। क्षि। स्त्रोऽसिता। स्त्रो घुति। ताषुसहेति वेद। शिशुं न विप्रा रिहन्ति। नशब्द इवार्थः। विप्रा ब्राह्मणाः शिशुमिव मतिभी रिहन्ति।
हिंसन्ति स्वनीकुर्वन्तीत्यर्थः। स्त्र हिंसायां यनयोः। ईदित्करणं श्वीदितो निष्ठायामिति इण्निषेधार्थम्। यद्यपस्य वेदत्वान्निष्ठायामिण्नि
षेधः सिद्ध एव तथापि यस्य विभाषेत्युस्यानित्यतां ज्ञापयितुमीदित्करणम्। तेन धावितमित्यराजधियेत्यादि सिद्धमित्याहुः। कुर शब्दे। क
रोतेरेव सुप्रसिद्धत्वात्। कुर्यादित्युक्तेर्हि लोकानां करोतेरेवोपस्थितिर्भवति। न त्वेतस्येति भावः। मुर संवेष्टने। इगुपधलक्षणः कः। मुरो
दैत्यः मुरारिर्विष्णुः। क्षुर विलेखने। विलेखनं छेदनम्। केशान् क्षुरति। इगुपधेति कः। क्षुरः शस्त्रम्। तिल स्नेहने। तिलति। इगुपधेति कः अस्य
येत्वः। तिल गतौ। तेलतीति शपि। लिख अक्षरविन्यासे। लिखितुं लिखिल्ल लिलेखिषतीति प्रयोगः प्रामादिकः। यच्च केचित्कुटस्यादिः के
टादिः। कुट आदिर्येषां ते कुटादयः। कुटादिश्च कुटादयश्च कुटादयश्च इत्येकशेषं स्वीकृत्य लिखितुमित्यादि समर्थितं तदसत्। लेखिता ले
खिष्यतीत्यादिगुणनिषेधापत्तेः। नेष्टापत्तिः। वृत्तिकारहरदत्तादिग्रन्थविरोधात्। गाङ्कुटादिभ्य इत्येव सर्वत्र चितव्ये कुटादिभ्य इति प
ठनस्य स्वारस्यभङ्गापत्तेश्च। किं च। शकुनिषाल्पे वने इति सौत्रप्रयोगोऽपि विरुध्यत इति भ्रमप्रमोऽपि प्रागेवोक्तत्वात्। तावत् लिखाप
तीति प्रयोगस्तु मनोरमायामित्थं समर्थितः। आपनम् आपः। आप्तिः। लिखस्यापो लिखापस्तं करोतीति। स्फुट विकसने। स्फुटत्येषोऽस्मा
दिति स्फोटः। स च पदस्फोटवाक्यस्फोटादिभेदेनानेकविधः। कुङ् मदे। कुटादिकार्यस्याभावेऽपि ङित्त्वानुरोधेनायं कुटादौ पठितः। स्वादौ प
ठितस्य पुनरत्र पाठः शतुर्नुम्विकल्पार्थः। पूर्वपाठस्तु इच्छतीत्यादौ विकरणीत्यादावाद्युदात्तार्थः। स्फुरति रचुलत्सोः सिवादि
नामित्यतो वेत्यनुवर्त्तनादाह। चलवास्यादिति। परिणते ति। ऋषुकः कितीति इण्निषेधः। मियते ऌ लि ईनम्श्च। चातरिल इति ग्रा

त्वबोधिनी·

॥५०॥ हृष्यते तदाह। शितश्च प्रकृति कुटादित्वात् ङित्। आत्मनेपदमित्यर्थः। तेन क्रियमाण इति सिद्धं स्वरसाम्यमितीमादिमते सत्रतास्यनु
दात्ते। ङिद् उपदेशाल्लसार्वधातुकस्यानुदात्तत्वे कृते धातुरुदात्तः। ङित्वाभावे तु प्रत्ययस्योदात्तत्वे धातुरनुदात्तः स्यात्। न च सिज्लोपस्या
सिद्धत्वात् ङितः परत्वं लसार्वधातुकस्य उपपादमिति तस्य कथमनुदात्तः स्यादिति शंक्यम्। ङित्वसामर्थ्यात् सिज्लोपस्यासिद्धत्वं नेति
सुवचत्वात्। आम ते त्यत्राडागमस्योदात्तत्वात् मडौ ङित्वस्य न किंचित् प्रयोजनमिति ज्ञापनिवारणाय माहिते तिमाङः प्रयोगः। तिङ् तिङः इति
घातेऽपि ङित्वं व्यर्थमिवस्यादिति हिशब्दप्रयोगः। हिप्रयोगे तु हि चेत्यनेन तिङन्तनिघातनिषेधादिष्टस्वरः सिध्यतीति बोध्यम्। रिपि
गतौ। परत्वाल्लघूपधगुणः स्यादित्याशंकायामाह। अन्तरंगत्वादिति। किरतौ लवने। उपात्प्रतियत्नेति सुडुपादिति वक्ष्ये तौ लवने किर।
उपकिरति। हिंसायां प्रतेश्च। चाडुपात् उरो विदारं प्रतिचस्करे न खैरिति माधवः। कर्मणि लिट्। ऋच्छत्यृतामिति गुणः। दृङ् आदरे। तथा द्रि
यते न बुधाः सुधामपीति श्रीहर्षः। प्रच्छ ज्ञीप्सायाम्। ज्ञातुमिच्छा ज्ञीप्सा। आप्ज्ञप्यृधामीत्। अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः।
ण्वुल्। प्रच्छकः। पृच्छाशब्दात्तु करोतीति णिजन्तात् ण्वुल्। पृच्छकः। पृच्छाशब्दस्तु भिदादेराकृतिगणत्वात् अङि संप्रसारणे बोध्यः। कि
रादयो वक्ष्या इति। एते च भक्षाकर्मकिरादिसनामिति वक्ष्यमाणादिनिषेधवार्तिके उपयोक्ष्यन्ते। किरश्च पञ्चभ्य इत्यत्र पञ्चभ्य इत्येतदुत्तरस
येऽनुवृत्त्यर्थमिति बोध्यम्। ससञ्जेथेति। विभाषसृजिदृशोरिति थलि वेट्। विछ गतौ। तुदादिपाठसामर्थ्यादायप्रत्ययान्ताद पि शो नद
श। तेन विच्छायति विच्छायन्ति इति। आर्धधातुके त्वनुम् विकल्पः। केचित्तु तुदादिपाठसामर्थ्यादायप्रत्ययस्यापाक्षिकत्वं स्वीकृत्य विच्छति विच्छन्ती
इति नुम्विकल्पं विच्छति विच्छतीत्यादि स्स्रोणि चोदाज कुरुते षां तु मते तुदादिपाठस्य केवले चरितार्थत्वा आयप्रत्ययान्तादेवेति नैव
च्छायन्तीति नित्ये वृशापु श्यनोरिति नुम्। पठितस्येति। पठि अस्मिन्नेव गणे परस्मैपदिषु पठितस्येत्यर्थः। तङर्थ इति। पूर्वपाठस्तु सम्लत्व ॥५०॥
णे कर्त्रभिप्रायेऽपि परस्मैपदार्थः। षिच क्षरणे। विषिचि दिति केचिद्दिरितं पठति तच्चु फलाभावादुपेक्ष्यम्। इह लिपि सिचि ह्वश्चेति
च्लेरङ् विधीयते स्वचाप्राप्तविधेः इरितस्तु विकल्पेन प्राप्तौ नित्यार्थो विधिरिति फलाभावः। पिंश दीप्तौ। दीपयतीत्यर्थः॥

इति तुदादयः ॥ ॥ रुधादिभ्यः श्नम् । प्रत्ययत्वेऽपि मित्त्वादन्त्यात्परः । प्रत्ययसंज्ञाफलं तु शास्त्रे संज्ञाशास्योच्चारणं तु श्नसोरल्लोपः श्नां
न्लोपः इत्यत्र विशेषणार्थं ननु सार्वधातुकसंज्ञार्थं फलाभावात् । न चापित्सार्वधातुकस्य ङित्त्वे गुणनिषेधः फलमिति शंक्यम्मृडिगंत
स्योगत्वाभावात् । आरुणदिति । सिपि धातो रुर्वा । एवमभिनदित्यत्रापि । छिदिर । ऊकारः क्त्वायामिड्विकल्पार्थः । छृत्वा छर्दित्वा । इट्
पक्षे न क्त्वा सेडिति कित्त्वनिषेधाद्गुणः । श्नान्नलोपः । अस्य मुख्योदाहरणम् । आनक्ति । तनक्ति । श्नादिस्तु स्पष्टमकारानुबंधस्य श्नमो
ग्रहणमित्याह । श्नमः परस्येति । एवं च यजयाच्येति विश्वशब्दस्याभिनुट् विश्वानामित्यत्र लक्षणप्रतिपदोक्तप्रत्ययग्रहणपरिभाषया प्र
वृत्त्यान्नलोपशंकैव नास्तीत्याहुः । इन्धेः इन्धे । श्नमो नकारस्यानुस्वारपरसवर्णौ । अनिदितामिति नलोपस्तु न भवति अल्लोपस्य सिद्ध
वदत्रेत्यसिद्धत्वात् स्थानिवत्त्वाद्वा । भंजो ओदित्करणं निष्ठानत्वार्थम् । भग्नः । भुज पालनादौ । भुजोऽनवन इत्यात्मनेपदं वक्ष्यते । भुंक्ते ।
भुंजाते । भुंजते । तृणह इति वक्तव्ये श्नमो ग्रहणं विशेषविहितेन इमां श्नमो बाधा मा भूदित्येवमर्थम् । ननु तौदादिकस्य तृह इत्यस्य
व्यावृत्त्यर्थमेवास्त्विति शंक्यम् । ततः परस्येह हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानात् । नाप्यस्तस्यापि पितीत्यतः पितीति
तृणोर्वृद्धिरित्यतो हलीति च वर्त्तते तदाह । हलादौ पितीति । प्रत्ययलोपे प्रत्ययलक्षणमिति सत्रस्था । भाष्यकारायनिकृष्टं तु हली
ति नानुवर्त्तते त एव । तेन तृंढ इत्यत्र नातिप्रसंगः । न च हलीत्यननुवृत्तौ । तृणं स्निग्धता । आंजेः सिचि नित्यमिट् स्यादिति । विभाषाया ग्र
हणं नानुवर्त्तत इति भावः । सिचि किम् । अंक्ता । एचौ । ईदित्त्वान्निष्ठायां नेट् । पक्तः । अपृक्त एकालित्यचनूपदः ॥ ॥ इति रुधादयः ॥ ॥ अ
